प्रयोगे अदक्षिणत्वसर्वस्वदक्षिणैककर्तव्यताविवप्रकचन्द्रघटादिप्रपंचे सत्यत्वमिथ्यात्वयोरपि विरुद्धत्वात् दृष्टो

मनुक्तान्त्यापच्छेदे सति पश्चादुक्तान्त्यापच्छेदे नादक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेतेति श्रुतिनिरीक्षणेन जाता
ज्ञात्यापच्छेदनिमित्तकर्तव्यताबुद्धिः पश्चात्प्रतिहर्त्रपच्छेदे सति यदि प्रतिहर्ता पच्छेद्येत सर्ववेदसं दद्या
दिति श्रुतिनिरीक्षणेन जातया तद्विरुद्धप्रतिहर्त्रपच्छेदनिमित्तकर्तव्यताबुद्ध्या बाध्यते एवं पूर्वं घटा
दिसत्यत्वप्रमयेऽपरया तन्मिथ्यात्वश्रुतिजन्यबुद्ध्या बाध्यते न चोदाहृतस्थले पूर्वनैमित्तिककर्तव्यताबुद्धेः प
रनैमित्तिककर्तव्यताबुद्ध्या बाधेऽपि पूर्वनैमित्तिककर्तव्यताबुद्धिजनकं शास्त्रं यत्रोक्तात्मात्रापच्छेद उभ
योरपि युगपदपच्छेदो वा उक्तान्त्यापच्छेदस्य परत्वं वा तत्र सावकाशं प्रमत्वं तु दृष्टान्तस्थले तु नाबाध्ये विषयान्तरा

सिद्धि

भावाद्बाध्यबाधकभाव इति भावः न चोदाहृतस्थलत्विति यत्र प्रथममनुक्तान्त्यापच्छेदस्तत्रेत्यर्थः शास्त्रमिति यदि उक्ता
पच्छेद्येतेति शास्त्रमित्यर्थः युगपदिति उक्तान्त्यप्रतिहर्त्रपच्छेदयोर्यौगपद्यस्थले उक्तान्त्यापच्छेदनिमित्तक
मेव प्रायश्चित्तमनुष्ठेयमिति सापेक्षत्वाबाधेन वाचाविरुद्धत्वादिति भावः प्रतिहर्तेति दृष्टान्ते सत्यत्वप्रमात्वमित्यर्थः दृष्टे
न्तस्थले तिष्ठेत मिथ्यात्वश्रुतेरित्यर्थः विषयान्तराभावादिति दृष्टान्तप्रपंचे प्रतीयमानसत्यत्वस्य श्रुत्याबाधे सति तस्य स
त्तान्तराभावात् सत्यत्वप्रमात्वं निर्विषयं स्यात् चेत् युज्यते प्रमात्वज्ञानस्य निर्विषयत्वादर्शनात्तदनुपगमात्र

सिद्धि॰
द्वि॰
२५

75

तस्यापीत्यनुष्ठानाशक्तेरित्यर्थः तत इति प्रत्यक्षविरोधादित्यर्थः तत एवेति अनुष्ठानाशक्तेरेव न तत्प्रत्यक्षविरोधा
दतो न प्रत्यक्षप्राबल्यस्यौत्सर्गिकत्वं आगमबाधानामागमानैत्यप्रत्यक्षादीनां भूयसां प्रदर्शितत्वादित्यर्थः त
स्मादिति आगमप्राबल्यस्यौत्सर्गिकत्वसंभवादित्यर्थः न कश्चिद्बाध इति आगमस्य प्रत्यक्षात्प्राबल्ये यजमा
नः प्रस्तर इत्यादावपि यजमानप्रस्तराभेदादिसिद्धिप्रसंग इति यो बाधप्रसंगो शंकितः पूर्वं स नास्ति तस्य वक्तु
भिः प्रकारैः परिहृतत्वादित्यर्थः अपच्छेदन्यायं प्रकृते योजयितुमादिशति अथ कथमिति कथं चाद्भि
सूचितत्वात्तेषां विवरणेन तन्निराकरणं च यत्त्विमादिना भविष्यति अथ मतेन्यायं प्रकृते योजयति उ

न चानुष्ठेयत्वाभिमतस्य प्रत्यक्षविरोध एवानुष्ठानाशक्तिरिति शाखान्तरेण व्यवहितयत्न इति
वाच्यं आर्चिमंडलं कांतिमत्स्यादिति विधावनुष्ठेयत्वाभिमतस्यार्चिमंडले कांतिमत्त्वस्य प्रत्य
क्षाविरोधेप्यनुष्ठानाशक्तिदर्शनेन तस्यास्ततोभिन्नत्वा तथा च तत एव तत्र लक्षणाश्रयणं
तस्मादपच्छेदन्यायादिसिद्धस्य श्रुतिबलीयस्त्वस्य न कश्चिद्बाध इति अथ कथमत्रापच्छेद
न्यायप्रवृत्तिः उच्यते यथा ज्योतिष्टोमे बहिष्पवमाने सर्पतां

च्यत इति बहिष्पवमानं स्तोत्रमुद्दिश्य यान्त्यारब्ध्यतयागाद्बहिर्गतामृत्विजां मध्ये उद्गातुरपच्छेदे सति आरब्धक्र
तुमदक्षिणेन यागसमाप्य पुनः स एव क्रतुरनुष्ठेय इति तदपच्छेदनिमित्तकमारब्धक्रतोरदक्षिणेन यागसमा
पनं प्रायश्चित्तं तया विहितं तथा प्रतिहर्त्रपच्छेदनिमित्तकं सर्वस्वदानरूप दक्षिणादानविशिष्टतया आर
ब्धस्यैव क्रतोः समापनरूपं प्रायश्चित्तं विहितं तथा च एकस्मिन्प्रयोगे दैवात् क्रमेणोभयोरपच्छेदे सति विरु
द्धयोरुक्तप्रायश्चित्तयोरनुष्ठानमशक्यत्वादन्यतरस्यानुष्ठेयत्वे स्थिते सति किं पूर्वनिमित्तकप्रायश्चित्तमनु

णपूर्वनैमित्तिककर्तव्यताज्ञापनेनास्यान्येन च निमित्तेन पूर्वकर्तव्यतानाशापूर्वकमनन्तरनैमित्तिककर्तव्यतोमा
यनत्वर्थः ततः किं तत्राह नूपद्धमज्ञानवदिति तथा चोत्तरभाविनिमित्तापच्छेदवत्यपि कृतो पूर्वनैमित्तिक
शास्त्रस्य नाप्रामाण्यमिति तस्याप्रामाण्यसंरक्षणमेव तथाकल्पकमिति भावः उत्तरनिमित्तोपजननात्प्राक् पूर्व
नैमित्तिककर्तव्यतावस्तुतआसीदित्यत्र संमतिमाह अतएवेति पूर्वं वस्तुतस्तदभ्युपगमादेवेत्यर्थः उत्तर
भाविप्रतिहर्त्रपच्छेदजननात्प्रागन्यथाप्रदक्षिणतयावस्तुतः कर्तव्योपि कृतः पश्चात्प्रतिहर्त्रपच्छेदद
यनिमित्ते सत्यन्यथासर्ववेदसंदक्षिणतयाकर्तव्यइतिशंकाभिप्रायानुसारेणवचनार्थः क्रमेणविकल्पा

त्वावकर्तव्यताज्ञानद्वयमपि प्रमाणमेवेति नयरेण पूर्वज्ञानबाधेऽपच्छेदन्यायउदाहरणं अतएवाप
च्छेदाधिकरणेनैमित्तिकशास्त्रस्यास्यमर्थः निमित्तोपजननात्प्रागन्यथाकर्तव्योपि कृतनिमित्ते सत्यन्य।
थाकर्तव्यइतिशास्त्रदीपिकावचनमिति तत्र अंगस्यमतः कर्तव्यत्वेन च पश्चाद्भाविप्रतिहर्त्रपच्छेद
वतिकृतो पूर्वशतोद्गात्रपच्छेदनैमित्तिकस्यप्रायश्चित्तस्यांगत्वमस्ति आहवनीयशास्त्रस्य पदहोमा
तिरिक्तहोमविषयत्वव्यवस्थानेतिशास्त्रस्यपश्चाद्भाविप्रतिहर्त्रपच्छेदरहितकृतुविषयत्वात्

७६

पच्छेदद्वयवतिकृतो पूर्वनैमित्तिकस्यकर्तव्यतानिष्पत्तौमानंनास्तीतितत्रपूर्वप्रायश्चित्तस्यानंगत्वादन्यांगत्वंचतद्धोप
कमानाभावात्तचपूर्वनैमित्तिकशास्त्रंतत्रमानंतस्यप्रयोगांतरेषुसावकाशत्वेनतत्राप्यंगबोधकत्वाभावादित्याशये
नदूषयति तत्रेति आहवनीयेति आहवनीयेजुहोतीतिहोममात्रेआहवनीयविधानंपदहोमस्यसामान्यशास्त्रस्यहो
मविशेषेपदहूपाधिकरणेविधायकविशेषशास्त्रवशेनपदहोमातिरिक्तहोमेष्वाहवनीयविधायकत्ववदित्य
र्थः कृतुविषयत्वादितिताहृशक्रतावेवउद्गात्रपच्छेदनिमित्तकप्रायश्चित्तस्यांगत्वबोधकत्वादित्यर्थः ॥

द्वैतप्रपंचे पारमार्थिकसत्त्वस्याप्रसक्तत्वेपि व्यावहारिकस्य तत्सत्त्वस्य तत्प्रसक्तत्वात् सत्त्वप्रत्यक्षस्य निरवकाश-
त्वमिति परिहरति यद्वेति विषयमिति सत्त्वरूपमिति शेषः ननु ब्रह्मणि सत्त्वं पारमार्थिकं घटादिप्रपंचे सत्त्वं व्यावहा-
रिकं शुक्तिरजतादौ सत्त्वं प्रातिभासिकमिति सत्ता त्रैविध्यपक्षे घटादिसत्त्वप्रत्यक्षस्य विषयांतरं नान्वेषणीयं व्यावहा-
रिकसत्त्वस्य घटादौ विद्यमानस्यैव तद्विषयस्य लाभादेकैव सर्वत्र सत्तेति पक्षे व्यावहारिकसत्त्वप्रातिभासिकसत्त्वयोर-
भावात् सत्त्वप्रत्यक्षस्य विषयांतरमन्वेषणीयमेव यथा उत्तरभाविविकल्पापच्छेदस्थले सर्वेषां बाधितस्य पूर्वापच्छे-
दनिमित्तकप्रायश्चित्तशास्त्रस्यैतस्यांशेव्याहतत्वादुत्तमीमीति द्वैतसत्त्वप्रत्यक्षं च घटादिद्वैते सत्तामलभमानमपि तन्नि-

यत्र घटादौ श्रुतिबाध्यं प्रत्यक्षं प्रवर्तते तेन तत्र व्यावहारिकं विषयं लब्ध्वा कृतार्थस्य तस्य परापच्छेद-
स्थले सर्वेषां बाधितस्य पूर्वापच्छेदशास्त्रस्येव विषयांतरान्वेषणाभावा- दिहापि सर्वे प्रत्यक्षे यत्र
ह्यसत्तायां सावकाशं प्रत्यक्षमिति वक्तुं शक्यत्वाच्च यत्रैकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ता-
भ्यां कृतौ तत्र तन्नैमित्तिककर्तव्यतयोः बदरफलेष्वामरक्तरूपयोरिव क्रमेणोत्पादादित्यर्थ

रवकाशं पूर्वापच्छेदनिमित्तकप्रायश्चित्तशास्त्रस्य प्रयोगांतरे सावकाशत्ववदिहापि घटादिद्वैतादन्यत्र तत्-
धिष्ठानभूतब्रह्मसत्तायां सावकाशत्वसंभवादित्यर्थः ब्रह्मस्वरूपसत्ताया प्रत्यक्षविषयत्वे कैमुतिकन्यायम-
भिप्रेत्याह सर्वेति सर्वप्रत्यक्षवेद्यत्वं सत्ताविशेषणं लोके हि यद्यत्तु मनसि स्फुरति तत्सर्वं सदित्येव प्रतीय-
तेऽतः सर्वस्य जगतः सत्ता सर्वप्रत्यक्षवेद्या सा च सर्वाधिष्ठानब्रह्मसत्तैव न तु तदतिरिक्ता कल्पनागौरवा-
दिति भावः पूर्वकर्णशष्कुलीगतमात्रपांसिदानीमुद्भावयति यद्वेति बदरफलेइति यथा तत्र पूर्व-
श्यामरूपमुत्पद्यते तत्रैव पश्चात् पूर्वरूपनाशपूर्वकं रक्तरूपमुत्पद्यते तथापूर्वनिमित्तेन जातमात्र

सि॰ ले॰ दि॰ २२

परोदाहृतवचनस्य शास्त्रदीपिकागतपूर्वग्रंथस्य चसारिणमर्थमाह निमित्तोपजननं विनेति क्रमेण विकल्पद्वापक्षे
दद्यपवतिकतो यदिहितो यनिमित्तोपजननं न स्यात्तदा पूर्वनिमित्तवशादन्यथा कर्तव्यो भवेदप्यपक्रतनेनेतदस्तो
नेतदर्थपरोयं ग्रंथपरत्वमर्थः पराभिमतं तद्वचनार्थं निषेधति नतिति तिष्ठतु मीमांसकाः दर्शितदर्शिनः क्रमालेर
स्वाभिः कल्पितस्य स्वग्रमर्थस्य कानुपपत्तिरिति शंकते आत्मामिति उत्तरं नैमित्तिककर्तव्यतोत्पत्तिमानाश्रयत्वेन
पराभिमतपूर्वनिमित्तिकस्य कर्तव्यत्वमेव तावद्दुर्निरूपं तथाहि तत्किं कृतिसाध्यत्वयोग्यत्वं किं वा फलस्य

योपसंहारपठितत्वान्निमित्तोपजननात्प्राक् निमित्तोपजननं विना निमित्तोपजननाभावे सत्यन्यथाक
र्तव्यो यो नित्यकृत्वा चिंतामात्रपरं न तु तत्र निमित्तोपजननात्प्राक् पूर्वनैमित्तिककर्तव्यतावलात् आसी
दित्येवंपरं पूर्वग्रंथसंदर्भविरोधापत्तेः आत्मांमीमांसकमर्यादा पथामर तेषान्यायेन क्रमिककर्तव्य
तावृयोरभ्युपगमे को विरोधः उच्यते किं तत्कर्तव्यत्वं यन्मरनैमित्तिककर्तव्यतोत्पत्त्या निवर्तते ननाव
त्पूर्वनैमित्तिकस्य कृतिसाध्यत्वयोग्यत्वं तस्य पश्चादप्यनपायात् नापि फलस्य तु विस्कृतिसाध्यत्वं तत्सत्

27

वं कृतिसाध्यत्वं वा तत्वैकस्य प्रयोजकानुष्ठानप्रतियोग्यननुष्ठानप्राक्कालित्वं वा आत्मगतत्वं वा अन्यद्वा किंचिदिति विक
ल्पं मनसि विधायाद्यं दूषयति नतावदिति अनपायादिति तथा चोत्तरनैमित्तिककर्तव्यताकालेप्यनुवर्त
मानतया पूर्वकर्तव्यतायाः तत्राश्रयतायोगेन वदरफलगतश्यामरक्ततयोरिव तयोः क्रमिकत्वाभ्युपग
मविरोध इति भावः द्वितीयं दूषयति नापि फलेति अजननादिति तथा च पूर्वनैमित्तिककर्तव्यताया
नस्य मीमांसकमर्यादापि सिद्धं भ्रांतित्वमेवायाति न त्वदभिमतश्यामताज्ञानस्यैव प्रमात्वमिति भावः ॥

पु॰ २२

उक्तार्थे संमतमाह उक्तं हीति लक्षणरूपस्य प्रमत्तासिद्धस्य साधारणस्य होममात्रे यागस्याहवनीये जुहोतीति
शास्त्रस्य विशेषशास्त्रेण यः संकोचः सः प्राप्तबाधोऽभिधीयते यथा सामान्यशास्त्रस्य विशेषशास्त्रं बाधकं तथा
सामान्यशास्त्रयोरेव क्वचिद्विषयविरोधे सति पूर्वप्राप्तस्य पश्चात्प्राप्तं परत्वाद्बाधकं भवति यथा विरुद्धाप
च्छेदनिमित्तकशास्त्रयोस्तथा च विशेषविषयादिनेत्यादिपदं परत्वादिसंग्रहार्थमिति श्लोकार्थः तत्रैवं स
तीति अपच्छेदस्थले उत्तरज्ञानेन पूर्वज्ञानबाधे सतीत्यर्थः इष्टव्यमिति पश्चाद्भाविप्रतिहर्त्रेऽप

उक्तं हि न्यायरत्नमालायां साधारणस्य शास्त्रस्य विशेषविषयादिना संकोचः लक्षणरूपस्य
प्तबाधोऽभिधीयते उक्तलक्षण प्राप्तबाधविवेचने तत्रैवं सति शास्त्रार्थो भवति पश्चा
द्भाव्युद्गातुः पच्छेदविधुरस्य प्रतिहर्त्रेऽपच्छेदवतः क्रतोः सर्ववेदसदानमङ्गमेव मुद्गातुरपच्छे
देऽपि दृष्टव्यमिति यत्तु शास्त्रदीपिकावचनमुदाहृतं तदपि तेनोत्पन्नमपि पूर्वप्राप्तमपि त्विज्ञानमि
त्याभवति बाधितत्वात् उत्तरस्य तु न किंचिद्बाधकमस्तीति पूर्वकर्तव्यता बाधितप्रतिपादकं यं

च्छेदविधुरस्योद्गातुः पच्छेदवतः क्रतोरदक्षिणेन याकल्पसमापनमङ्गमिति ज्ञातव्यमित्यर्थः शास्त्रदी
पिकावचनमपि न तदभिमतार्थपरं तत्पूर्वं यं पविरोधात्पूर्वं यं यार्थनियमनरूपस्य तदुदाहृतवचनस्य पू
र्वग्रयात्वनुसारेणैव नेतव्यतावेत्याह तदपीति तदपि कृत्वा चिंतामात्रपरमिति संबंधः कृत्वाचिंतापरत्वे
हेतुमाह तेनेत्यादिना तेनेत्यस्य लक्षणपूर्वप्रवृत्तिनैमित्तिकशास्त्रेणेत्यर्थः

सि. ले.
द्वि.
२८

तद्रूपकर्तव्यतायाश्च उत्तरं नैमित्तिककर्तव्यतानाशपत्त्वाभ्युपगमभंगापत्तेः द्वितीयकल्पे च पूर्वं प्रायश्चित्तानन्तुष्ठा
नस्य क्रतुवैकल्यव्याप्यत्वं द्वितीयनिमित्तजननात्प्रागेवास्ति तज्जननानन्तरं तु नास्तीति पर्यवसिते तथा पूर्वं
प्रायश्चित्तेऽगत्वरूपाकर्तव्यता पूर्वं प्रायश्चित्तस्य द्वितीयनिमित्तजननात्प्रागेवास्ति पश्चात्तु नास्तीति पर्यवसिति
तथा च व्याप्यत्वकारणत्वयोः स्वाश्रये कदाचित्कत्वमभ्युपगन्तव्यं स्यात्तच्च न संभवतीत्यनुभवमेव वदत्पति नही
त्यादिना तस्मात्तयोर्यावदाश्रयभावित्वं तद्रूपस्वाभाविकत्वनिर्वाहाय क्रमिकविरुद्धापद्धेदवक्रतुव्यावर्त
कविशेषणमुपपन्नमपि देयमित्याह पश्चाद्भावीति असंभवादिति तथा च क्रमिकविरुद्धापद्धेदवत्तिरुक्तौ

मित्तिके क्रत्वंगत्वस्य तदनन्तरक्षणे नैक्रतुवैकल्यप्रयोजकत्वस्य वा पाश्चात्त्यापद्धेदोमन्तेः पूर्वमसंभा
वात् नहि वस्तु किंचिद्वक्त्वं तरं प्रति किंचित्कालं व्याप्यं पश्चान्नेति वा किंचित्कालं कारणं पश्चान्नेति वा
क्वचिद्दृष्टं युक्तं वा नापि कर्तव्यत्वं नाम धर्मान्तरमेवागमायापयोग्यं कल्पनीयं मानाभावात्॥

28

पूर्वं नैमित्तिककर्तव्यताज्ञानं भ्रान्तिरेवेति भावः तयोः कादाचित्कत्वायोगे हेतुमाह नहीति धूमादौ वह्न्या
दिव्याप्यतायाः वह्न्यादौ धूमादिकारणतायाश्च कादाचित्कत्वादर्शनादित्यर्थः ननु दृष्टमपि युक्तं चेत्तस्या
स्यमेव नेत्याह युक्तं वेति वाकारेण तर्कोत्कर्षणमर्थः तयोः कादाचित्कत्वपक्षे धूमादौ कदाचिद्वह्न्यादेः
व्याप्यत्वाभावापत्त्या तदभावप्रयोजकोपाधिमत्त्वप्रसंगः स्यात् वह्न्यादेः कदाचिद्धूमादिकारणत्वाभावा
पत्त्या धूमादिकार्यार्थिनो वह्न्याद्युपादाने तत्कारणत्वाभावाशंकया निष्कंपप्रवृत्तिर्न स्यादतस्तयोः कादा
चित्कत्वमयुक्तमित्यर्थः एवं मतं निराकरोति नापीति प्रथमनिमित्तजननानन्तरमेवागमयोग्यं द्वितीयनि
मित्तजननानन्तरमेवागमायोग्यं चेत्यर्थः

कु.
२८

तृतीयचतुर्थावनुवदति नापियदिति यस्यानुष्ठानाभावे कृतौ वैकल्यं भवति तत्कृतवैकल्यप्रयोजकानुष्ठानप्रतियो ।
ग्यनुष्ठानशालिपर्यवसिततत्त्वमित्यर्थः यत्र प्रथममुद्गातुः पच्छेदः पश्चात्प्रतिहर्तुः पच्छेदः तत्रोद्गातुः पच्छेदप्रा
यश्चित्तानानुष्ठाने कृतवैकल्यप्रयोजकं तत्प्रायश्चित्तं तत्र कृतौ वैगुण्यमिति च वदतां वक्तव्यं पूर्वप्रायश्चित्तानानुष्ठानस्य
कृतवैकल्यस्यापि प्रयोजकत्वं किं वैकल्योत्पादकत्वं किं वा तद्व्याप्यकत्वं वा नाद्यः अभावरूपस्यानुष्ठानस्यानु
त्पादकत्वासंभवात् कृतवैकल्यस्यापि कृतूपकारप्रागभावरूपतया तदुत्पाद्यत्वायोगाच्च न द्वितीयः प्रत्ये
कृतृमात्रापच्छेदवति कृतौ तत्प्रायश्चित्तं कृतं कारणेन राद्धे कल्पं च तत्र तत्र कृतवैकल्यसत्त्वेपि उद्गातुः प

नापि यदननुष्ठाने कृतौ वैकल्यं तत्त्वमंगत्वं वा अननुष्ठाने कृतवैकल्यप्रयोजकत्वस्य नियमविशेष
रूपत्वेन कर्मागत्वस्य फलोपकारित्वस्य सन्निपतित्वस्य वा कारणत्वविशेषरूपत्वेन च तस्यैव कदाचित्क
योगेन स्वाभाविकत्वनिर्वाहाय पश्चाद्भाविविरुद्धापच्छेदाभाववतः कृतोः पूर्वापच्छेदनैमित्तिकमंगं त।
दैव तदननुष्ठाने कृतवैकल्यप्रयोजकं इति विशेषणीयतया पाश्चात्यापच्छेदवति कृतौ पूर्वापच्छेदनैमि

च्छेदप्रायश्चित्तानानुष्ठानाभावेन व्यभिचारान्नन्वमानुतीयः परिशिष्यात इत्याशयेनाह नियमविशेषरूपत्वेनेति
व्याप्यत्वरूपत्वेनेत्यर्थः फलोपकारित्वं परमापूर्वरूपफलं प्रत्यदृष्टद्वारा कारणत्वं यथा प्रयाजादीनां सन्निप
त्योपकारकत्वं च यथा स्वरूपोत्पादकत्वं यथावद्यादेवतादेरस्तु तयोरन्यतररूपत्वमिति चेन्न तत्र वक्तव्यं क्रमि
कविरुद्धापच्छेदद्वयवति कृतौ पूर्वप्रायश्चित्तानानुष्ठानगतं कृतवैकल्यव्याप्यत्वरूपं कृतवैकल्यप्रयो
जकत्वं पूर्वप्रायश्चित्तगतमंगत्वं च द्वितीयनिमित्तजननानन्तरमप्यनुवर्तते तेन वैतिप्रायश्चिक्तृवैकल्यप्र
योजकानानुष्ठानप्रतियोग्यनुष्ठानशालित्वरूपायाः पूर्वप्रायश्चित्तकर्तव्यतायाः तत्प्रायश्चित्तगतायाः ।

मि॰ लो॰
द्वि॰
२५

हारयोर्वा क्रमेणोपि स्तुत्यैकार्थ्यं दर्शितं तत्त्वात्तयोरेकवाक्यत्वमवगतं तत्संरक्षणाय तयोरेकार्थपर्यवसानं वक्तव्यं उपक्र
मोदात्तविशिंषिविधत्ते उपसंहारः प्रतिगृहीतत्वविति यथाश्रुतवाक्यार्थाभ्युपगमे प्रतीतैकवाक्यत्वं न स्यादित्यर्थः ॥ मि
एकवाक्यत्वप्रतीतस्थल एवोत्तरस्य पूर्वार्थे हेतत्कार्थंदा ।
नर्थमिति प्रतिगृहीमादित्यस्य प्रतिग्राहयेदित्यर्थः ॥ नन्वेकस्मिन्नतिरात्रक्र
दर्शेपि एकवाक्यत्वप्रतीत्यभावस्थले उत्तरेण पूर्वं नादर्त्तव्यमित्याशयेनाह यद्यपीति किंत्विति प्रयोगभेदेन विरो
तो षोडशिग्रहणतदभावयोर्विरुद्धत्वाद्वाक्यद्वयं कथं प्रमाणं स्यादिति शंकते

णां स्तुतः कपालान्निर्वपेदित्युपसंहारगतं पदजातमुपसंजातप्रतिपत्तित्वाच्छ्रुतार्थसमर्पणेन त
देकवाक्यतामप्रतिपद्यमानमेकवाक्यतानिर्वाहाय गौणार्थमंतर्भाव्य तदानुगुण्येनैवात्मानं लभत उप
क्रमस्य प्राबल्यं यत्र तु परस्परमेकवाक्यतानप्रतीयते तत्रैव पूर्ववृत्तमविगणय्य लब्धात्मकं विरुद्धा
र्थकं वाक्यं स्वार्थबोधयत्येवेति न तत्र पूर्वप्रवृत्तस्य प्राबल्यं अत एव षोडशिग्रहवाक्यं पूर्ववृत्तमविगणय्य
यत तदग्रहवाक्यस्यापि स्वार्थबोधकत्वमुपपद्यते किंतूभयोर्विषयांतराभावाद् गत्यंतरैव विकल्पानुष्ठा
नमिष्यते एवं चाद्वैतागमस्य प्रमहत्त्वेनैकवाक्यताशंकाभावात्पूर्ववृत्तमपि तदविगणय्य स्वार्थबोध
कत्वमप्रतिहत

ये समाधानमाह उभयोरिति नन्वग्रहणवाक्यं तन्निषेधवाक्यं च क्रतुभेदेन व्यवस्थितं किं न स्यादित्यत आह
विषयांतराभावादिति तयोर्वाक्ययोरेकप्रकरणगतत्वादित्यर्थः गत्यंतरेति एकस्य बाधस्यासंभवेनेत्यर्थः
तत्रैवेति अतिरात्र एवेत्यर्थः एवं चेति उपक्रमन्यायस्य प्रतीतैकवाक्यतायामेव विषयत्वे सतीत्यर्थः शंकाभा
वादिति तथा च प्रमहत्त्वस्य श्रुत्यपेक्षया प्राबल्यशंकेति भावः

29

उ॰
२५

पूर्वनैमित्तिकशास्त्रस्यावहनीयादिशास्त्रवदन्यत्रसावकाशानाभावः उक्तत्वेन तथैवेनाह श्रायर्थे मानत्वायोगादिमाशंक्ये
नाह विरुद्धेति क्रमिकविरुद्धापच्छेदवतिक्रमोपूर्वनैमित्तिकार्थवाक्यत्वज्ञानस्यप्रमात्वासंभवात् सतिविरोधेउ
त्तरज्ञानेन पूर्वज्ञानबाधे अपच्छेदन्यायउदाहरणं भवत्येवेमामायेनोपसंहरति तस्मादिति नन्वपच्छेदन्याये
नश्रुतेः प्रत्यस्तापेक्षया प्राबल्यावगतिवदुपक्रमाधिकरणन्यायेन प्रथमस्यापि श्रुतस्यापेक्षया प्राबल्यावग
मान्नयोर्बाध्यबाधकभावे विनिगमनाविरहइत्याशयेन शंकते ननुचेति असंजातेति यथाउपक्रमवा।
क्यार्थज्ञानकालेउपसंहारवाक्यार्थज्ञानाभावेन विरोधस्फुरणाभावादुपक्रमस्यासंजातविरोधित्वं तथा

विरुद्धापच्छेदशास्त्रयोः यदाहवनीयशास्त्रवदुभयस्योपपत्तेः तस्माद्विरोधं वनं क्रमिकार्थत्वमाह
योसन्निवचः ननुचोपक्रमाधिकरणन्यायेनासंजातविरोधित्वात्प्रथमस्यैवागमाद्बलीयः किंन
स्यात् उच्यते यत्रैकवाक्यता प्रतीयते तत्रैकस्मिन्नर्थे पर्यवसानेन भावेऽवयवभेदे सतीतैकवाक्यताभं
गप्रसंगात् अतस्तत्रप्रथमस्यसंजातप्रतिपत्तेर्गणप्रजापतिर्दर्शनाश्वमनयदित्यादुपक्रमेणप्र
रक्तप्तिसरूपार्थवादेनदात्तविरोधो बुद्धिमधिरोपितापांतहिकरंइयावनोऽश्वान्प्रतिगृह्णीयान्नावलोवाक्

दैतमस्वप्रमस्तप्रवृत्तिकालेदैतमिथ्यात्वबोधकश्रुमयानुभवाभावेन विरोधस्फूर्त्यभावात् प्रथमस्यासंजा
तविरोधित्वमित्यर्थः दृष्टांतेवैषम्येणपरिहरति उच्यतइति अश्वमनयदिति अश्वंदत्तवानित्यर्थः परस्यप्र
जापतेः कृतिस्तु प्राप्तं परकृतिः परकृतिपदं तत्प्रतिपादकवाक्यपरं तत्सहपाठार्थवादेनेत्यर्थः प्रजापतेः
कर्माधिकाराभावेनवस्तुतस्तत्प्रतिपादकत्वाभावादितिमत्रूपेत्यर्थः दातेति स्पष्टतंवाकणांचलक्षपाठे
मपश्यन्नित्तिरवयदित्युपक्रमेश्रवणादितिभावः स्वयमेनेनप्रकृतः प्रजापतिः परामृष्यतेउपक्रमो यस्ते

तथा च वर्णपदादिस्वरूपस्यैवाभावाद् उपजीव्यविरोधो दुर्वार इत्याह नहीति इह ब्रह्मणि ज्ञानाभिन्नं वस्तु किंचिदपि ना
स्तीत्यर्थः स्वरूपोपमर्दमनपेक्ष्यैव तु उपजीव्यविरोधं परिहरति अत एव केचिदाहुरिति प्रपंचस्य मिथ्यात्वपक्षेऽपि दृश्यमानये
त्युदाहरणानुरोधेन भ्रमप्रमासाधारणमेव शाब्दप्रमात्वं शाब्दबोधोपजीव्यमिति वक्तव्यमस्माकं तु निषेधश्रुति
प्रामाण्यात् सर्वत्र भ्रमरूपमेव प्रमात्वं शाब्दबोधे व्यवहारान्तरे च कारणमिति विशेष इति नोपजीव्यविरोधः
शाब्दस्वरूपस्यानुपजीव्यत्वादित्यर्थः उपजीव्यविरोधं प्रकारान्तरेण परिहरति अन्ये त्वाहुरिति प्रथमं पूर्वमतस्य
स्वरसं दर्शयन्ति शाब्दप्रमिताविति अनपेक्षायामपीति अत्रापि प्राह्हेन वक्तॄणां नयेक्षानास्तीति सूचितं तथा

नेह नानास्ति किंचनेत्यादिश्रुतिभिः स्वरूपेणैव प्रपंचाभावबोधनात् अत एव केचिदाहुः दृश्यमानयेत्यादिवा
क्यश्रवणदोषाद् दृश्यमानयेत्यादिरूपेणाश्रुतवतोऽपि शाब्दप्रमितिदर्शनेन शाब्दप्रमितौ वर्णपदादिप्रमात्वं प्र
माभ्रमसाधारणमेवापेक्षितमिति सिद्धे तथा भ्रमेन वर्णपदादिप्रमात्वमात्रमुपजीव्यस्वरूपोपमर्देऽपि नोपजीव्यवि
रोध इति अन्ये त्वाहुः शाब्दप्रमितौ वर्णपदादिस्वरूपसिद्ध्यनपेक्षायामपि योग्यशाब्दप्रमितिमनु तदुपायो
ग्यता स्वरूपसिद्ध्यपेक्षास्ति

हि पूर्वमते प्रमात्वज्ञानमात्रमुपजीव्यं विषयो वर्णपदादि
तत्त्वेनोपजीव्य इत्युक्तं तदयुक्तं निर्विषयप्रमात्वज्ञानायोगात् ततो वर्णपदादिस्वरूपमपि स्वीकर्तव्यमेव तथा
च उपजीव्यविरोधे पूर्वसमाधानं न साध्विति भावः आस्तीति तथा च योग्यताया उपजीव्यत्वमवर्जनीयमिति तद्वि
रोधः पूर्वमतेऽप्यावश्यक इति भावः नन्वेतावता पूर्ववाद्यभिमतस्य कृत्स्नप्रपंचस्य स्वरूपं न सिध्यतीति वाच्यं
शाब्दप्रमितिलक्षणकार्यानुरोधेन ब्रह्मातिरिक्तयोग्यतास्वरूपसिद्धौ तद्वदेव जलाहरणादिकार्यानुरोधेन
घटादिस्वरूपमपि सिध्यमेवमाशयात्॥

अपच्छेदन्यायप्रवृत्तिप्रकारं तेषां काम्यमाधानाभावेन निरूपयितुमारभते तदर्थमिति पूर्वमिति क्रमिकविरुद्धापच्छेदवति
क्रतौ प्रथमापच्छेदनिमित्तकप्रायश्चित्तकर्त्तव्यताज्ञानं पूर्वं यथा द्वार्थः उत्तरनैमित्तिककर्त्तव्यताज्ञानं परस्माद्वार्थः
पूर्वेण परस्य बाधाभावे हेतुमाह अज्ञातत्वादिति परस्यानन्यथा पूर्वज्ञानबाधमन्तरेण उत्पत्त्ययोग्यत्वाद्य
यस्याबाधेन परस्य संभवो नास्तीति ज्ञो कार्थः पूर्वप्रवृत्तज्ञानस्य प्रत्यक्षस्यापि परेण शास्त्रेन बाधे उदाहरणमाह
अत एवेति परत्वादेवेत्यर्थः नन्विति यद्यपीयं शंका न चैवमनुपजीव्यप्रत्यक्षविरोध इत्यादि इत्यादिना निरा

तदर्थबोधजननेन च पूर्वं परमज्ञातत्वादबाधितत्वेनावगम्यते परस्यानन्यथोत्पादात्ऽस्याऽबाधेन संभव
इत्यपच्छेदन्यायस्यैव प्रवृत्तेर्नोपक्रमन्यायस्य अत एव लोकेऽपि प्रथमप्रवृत्तं शुक्तिरूप्यप्रत्यक्षमाप्तोपदे
शेन बाध्यत इति ननु तथाप्युपजीव्यत्वेन प्रत्यक्षस्यैव प्राबल्यमुत्तरापच्छेदशास्त्रयोर्हि न पूर्वपरस्यो
पजीव्यमिति प्रकृतः परेण पूर्वस्य बाध इत्युक्त्वा वर्णपदादिस्वरूपं याह कतयामिथ्यात्वबोधकागमस्य प्रतिप्र
सक्तस्योपजीव्यत्वादागमस्यैव तद्धि रूढमिथ्यात्वबोधकत्वरूपो बाधो युज्यते न च मिथ्यात्वस्य भाव
र्णपदादिसत्त्वांशेनापमर्दः प्रत्युपजीव्यत्वरूपांशेनापमर्दाभावान्नोपजीव्यविरोध इति वाच्यं

कृत्वा पूर्वमेव तथापि तत्रोक्तं परिहारमात्ते नैतत्संका परिहारो पुनर्लिखितं विति तथापीति आगमस्य प्रत्यक्षस्य
स्वतः प्राबल्याभावेऽपीत्यर्थः नन्वपच्छेदन्यायेन श्रुतेरपि प्राबल्यमङ्गीकृतं तथा च बाध्यबाधकभावविनिगम
नाविरह एवेति शंकाकारणे पूर्वसिद्धिः प्रत्यक्षेण श्रुतिबाधस्य तद्धितत्वादिमापीनुयापच्छेदन्यायानवतारस्य
कः प्रकृते दर्शयति अपच्छेदशास्त्रयोर्हीति उपजीव्यविरोधशंकायां पूर्वोक्तपरिहारं स्मारयति न च
मिथ्यात्वश्रुतेरिति श्रुत्या प्रपंचसत्यत्वमात्रप्रतिषेधे सति तथा परिहारो युज्यते यावत्प्रपंचस्वरूपमेव निषेधति

सि॰ ले॰
द्वि॰
२२

अन्यत्रेति अधिष्ठानादन्यत्र देशे काले वेत्यर्थः नन्वप्रकारान्तरेणासत्त्वनिर्वचनमस्तु न चास्य प्रपंचे तदभावान्न तस्या
सत्त्वप्रसक्तिरिति नेत्याह विधान्तरेणेति प्रसिद्धासत्त्वः शशशृंगादेः कालत्रयेणासिद्धत्वमस्ति प्रपंचेपि तल्लक्षणस
त्त्वान्न तस्यासत्त्वापत्त्या तद्विलक्षणत्वाभ्युपगमपूर्वकं वैधर्म्योक्तिरयुक्तेति शंकितुः शंकां तदेवासिद्धं मानाभा
वात् कथं मानाभाव इति चेन्न तत्र वक्तव्यं किमसत्त्वः उक्तलक्षणयोगे प्रत्यक्षं प्रमाणं किं वागमः अथवा
नुमानमिति विकल्पं मनसि निधाय आद्यद्वितीययोर्निराकरणपूर्वकं तृतीयं परिशेषयति असत्त्वइत्यादि

२१

न चासत्त्वस्याधिष्ठाने स्वरूपेण निषेधेऽन्यत्र तस्य स्वरूपेण निषेधः स्वतःसिद्ध इति तस्य सर्वदे
शकालसंबंधिनिषेधप्रतियोगित्वाऽप्रत्यक्षत्वं दुर्वारं सर्वदेशकालसंबंधिनिषेधप्रतियोगित्व
मसत्त्वमित्येवासत्त्वनिर्वचनात् विधान्तरेण तन्निर्वचनायोगादिति वाच्यं असत्त्वः सर्वदेशकालसं
बंधिनिषेधप्रतियोगित्वस्यापगाह्नतानस्यतथात्वे प्रत्यक्षस्य सर्वदेशकालयोः प्रत्यक्षीकरणायोगेन
आगमस्य तादृशागमानुपलंभेन च प्रमाणयितुमशक्यत्वात् अनुमानमेव प्रमाणयितव्यमिति ।
तदनुमाने यस्य साध्याद्दृन्नलिंगं वाच्यं तस्यैव अप्रमप्रतीतस्यासत्त्वनिर्वचनोपपत्तेरित्याकूतः

प्रत्यक्षस्यागमस्य च प्रमाणयितुमशक्यत्वयोरिति संबंधः तादृशेति शशशृंगादिकं सर्वदेशकालसंबंधि ।
निषेधप्रतियोगीत्येवमाकारकागमानुपलंभेन चेत्यर्थः अस्तु तर्हि परिशिष्टमनुमानमेव तत्र मानमिति
नेत्याह तदनुमानइति यदिति निःस्वरूपत्वमित्यर्थः (अस्तु तर्हि परिशिष्टमनुमानं) वाच्यमिति तत्र ये
तिशेषः विनिगमनाविरहं परिहरति अप्रमप्रतीतस्येति उपपत्तेरिति तथा तु प्रपंचस्य ज्ञाननिवर्त्यस्व
रूपांगीकारान्न निःस्वरूपलक्षणसत्त्वं नास्तीति तस्य शशशृंगादिवैधर्म्योक्तिर्युक्तेति भावः

उ॰
२२

ननु यदि चैतन्यव्यतिरिक्तं कृत्स्नं जगद्रूप्यं प्रपञ्चे तर्हि तत्कुतो हि प्रमत्वादेः सविषयस्योपजीव्यत्वान्न विरोध इत्यत आह तदपे
क्षायामपीति निषेधश्रुतयोऽविरुद्धस्य प्रपंचस्वरूपस्य स्वाभिरत्यंगीकारान्नास्माकं मते उपजीव्यविरोध इति भावः
प्रसद्विलक्षणस्वरूपानंगीकारे बाधकं सूचयन् मतान्तरवर्तिनं प्रत्याह प्रत्यक्षेति प्रपंचसत्यत्ववादिभिरंगीकृते न चेति न
नु ब्रह्मणि प्रपंचस्तन्निषेधश्च युगपदेकस्मिन्कोदोष इत्याशंक्याह निषेधस्येति भूतलादौ घटादिभावस्य प्रतियोगि
स्थितिविरोधित्वदर्शनादिति भावः व्याघातादिति निषेधस्य व्याघातादित्यर्थः कल्पितपदार्थप्रतियोगिकाभावस्य

तदपेक्षायामपि नोपजीव्यविरोधः नेह नानास्तीति श्रुत्या निषेधेऽपि यावद्ब्रह्मज्ञानमनुवर्तमानस्यार्थक्रियासं
वादिनः सद्विलक्षणस्य प्रपंचस्वरूपस्यांगीकारात् प्रत्यक्षादेः सत्त्वादीनां व्यावहारिकप्रामाण्यानां निर्विषयत्व
प्रसंगात् न च स्वरूपेण निषेधे कथं स्वरूपप्रपंचस्यात्मलाभः निषेधस्य प्रतियोगिप्रतिक्षेपरूपत्वे व्याघा।
तादिति वाच्यं शुक्तावपीदं रजतं नेदं रजतमिति प्रतीतिदर्शनात् रोधेनाधिष्ठानगतात्यन्ताभावस्य बाधप
र्यन्तानुवृत्तिकासद्विलक्षणप्रतियोगिस्वरूपसहिष्णुत्वाभ्युपगमात् एतेन प्रपंचस्य स्वरूपेण निषेधे शश
शृंगवदसत्त्वमेव स्यादिति निरस्तं ब्रह्मज्ञाननिवर्त्यस्वरूपांगीकारेणैव धर्म्यात्

धिष्ठानास्यत्र सदा प्रतियोगिविरोधित्वेऽप्यधिष्ठानेऽकालिकत्वं प्रतियोगिस्थितिसहिष्णुत्वस्वभावः कल्पितेन तत्त्वा
कल्पकाभावः इत्यत आह प्रत्यक्षादेर्निषेधश्रुतेश्च यानुत्तार्थ्या परमते घटात्मनाभावस्य सार्धिकरणमात्रे प्रतियो।
गिप्रतिक्षेपकत्वेऽपि संयोगाद्यमंताभावस्य कपित्वाद्यधिकरणे प्रतियोग्यप्रतिक्षेपकता प्रतीतिबलात् स्वीक्रियते
तद्वदिति समाधानाभिप्रायं मनसि निधाय पूर्वमतमधिकृत्य तदसोपपत्तिकमाह शुक्ताविति एतच्छ्रुत्यर्थमाह
ब्रह्मज्ञानेनेति वैषम्यादिति शशशृंगादिवैषम्यादित्यर्थः

गतस्वार्थतात्पर्यवतीनां भूयसीनां निषेधश्रुतीनां भूयसी निर्विषयत्वप्रसंगात् किंतु व्यावहारिकसत्यत्वादिरूपं तत्क
ल्पितेतत्तेन सत्यत्वनिषेधानुपपत्तिरिति परिहरति अन्यत्वस्येति न चैवं सतीति प्रपंचसत्यत्वस्य व्यावहारिक
त्वांगीकारे इत्यर्थः दृष्टांतपूर्वकं प्रसक्तिमाह यथा शुक्ताविति नेदं रजतमिति निषेधप्रसक्तस्य सत्यरजतनि
षेधविषयकत्वे वक्तव्ये प्रातिभासिकरजताधिकरणे शुक्तिघाकरेकल्पितरजताभावस्यास्मिन्मते नंगीका
रेणावाधप्रसक्तस्य तद्विषयत्वायोगादिति भावः शुक्त्यादौ निषिध्यमानस्य देशांतरस्थत्वे नियामकमाह

तिनिषिध्यमानस्यान्यत्र सत्त्वमवगम्यते एवं सत्यत्वाभासप्रतीतिरेव सत्यत्वप्रसक्तिरिति तन्निषेधोपप
त्तेः अतो वर्णपदयोगपत्तादिस्वरूपोपमर्दशंकाभावान्नोपजीव्यविरोध इत्याह अन्ये तु ब्रह्मणि पार
मार्थिकसत्यत्वं प्रपंचे व्यावहारिकसत्यत्वं सत्यत्वाभासरूपं शुक्तिरजतादौ प्रातिभासिकसत्यत्वं त
त्रापि निकृष्टमिति सत्तात्रैविध्यं नोपेयते अधिष्ठानब्रह्मगतपारमार्थिकसत्तानुवेधादेव घटादि
सत्वाभिमानोपपत्त्या सत्वाभासकल्पनस्य निःप्रमाणकत्वात्

अत एवेति प्रपंचपारमार्थिकसत्यत्वस्य प्रसक्त्यभावान्निषेधानुपपत्तिरिति शंकायां सत्त्वत्रैविध्यमतमा
लंब्य परिहारो दर्शितः इदानीं सर्वत्र सत्त्वैकापत्ते प्रसक्त्यभावशंकां परिहरति अन्ये त्विति प्रथमसत्ता
त्रैविध्यपक्षं दूषयति ब्रह्मणि स्वादिना ब्रह्मगतेति पारमार्थिकसत्तायाः ब्रह्मरूपत्वेपि भेदकल्पन
यातद्गतत्वोक्तिः अनुवेधादेवेति प्रतीतेरेवेत्यर्थः ॥

दुपजीव्यविरोधं प्रकारांतरेण परिहरंति अपरे त्विति अपेभ्यादित्यनेन यथा चाभावाधिकरणमात्रे प्रतियोगिमिथ्यात्वयो
गात् प्रपंचाधिकरणे ब्रह्मणि तदभावोनेन निषेधश्रुतिगम्य इति भावः ननु सत्यत्वेन ब्रह्मणि प्रपंचनिषेध इति म
तेपि किं सत्यत्वविशिष्टप्रपंचाभावो ब्रह्मणि विवक्षितः किं वा सत्यत्वधर्मावच्छिन्नप्रतियोगिकः प्रपंचमात्रप्रति
योगिको निषेधो ब्रह्मणि विवक्षितः नोभयथापि संभवति प्रतियोग्यधिकरणे तदभावानंगीकारात् प्रपंचे
सत्यत्वस्यानंगीकारेण तस्य प्रतियोगिकोटिप्रवेशप्रतियोगितावच्छेदकत्वयोरसंभवाच्चेति चेदुच्यते प्रपं

अपरे त्विति नेह नानास्तीत्यादिश्रुतेः सत्यत्वेन प्रपंचनिषेध एव तात्पर्यं न स्वरूपेण स्वरूपेण निषेधस्य स्वरूपा
ऽप्रतिक्षेपकत्वेन स्वलन्निषेध्यत्वायोगात् तत्प्रतिक्षेपकत्वे प्रत्यक्षविरोधात् ननु सत्यत्वस्यापि सन्घ
ट इत्यादिप्रत्यक्षसिद्धत्वात्तेनापि रूपेण निषेधो युक्त इति वाच्यं प्रत्यक्षस्य श्रुतिविरोधाय सत्यत्वा
भासरूपव्यावहारिकसत्यत्वविषयत्वोपपत्तेः न चैवं सति पारमार्थिकसत्यत्वस्य ब्रह्मगतस्य प्रपंचे प्रस
क्त्यभावान्नेन रूपेण प्रपंचनिषेधानुपपत्तिः यथा शुक्तौ रजताभासप्रतीतिरेव सत्यरजतप्रसक्तिरि
ति तन्निषेधः अत एव नेदं रजतं किंतु न तत् नेयं मदीया गौः किंतु शैवनाद्यवर्तमानत्वेन किंत्वपवरकेउ

चे धर्मिणि सत्यत्वनिषेधे श्रुतेस्तात्पर्यमित्येतन्मताभिप्रायः ननु यथाश्रुतार्थे तात्पर्यमस्य मतस्यानपवदति सत्य
त्वाभासप्रतीतिरेव सत्यत्वप्रसक्तिरिति तन्निषेधोपपत्तेरिति चेत्तर्हि व्याकोशप्रपंच एव सत्यत्वनिषेधः स्पष्टप्रतीयते
अतो नास्मिन्मते प्रतियोगितदभावयोरैकाधिकरण्यं काचक्षतिः ननु ब्रह्मणि प्रपंचस्वरूपं यथा प्रमत्वादि
सिद्धमस्तीति तथा प्रपंचे सत्यत्वमपि प्रमत्वादिसिद्धमस्त्वेवेति तन्निषेधेपि श्रुतेस्तात्पर्यं कल्पयितुं न शक्यमिति
शंकते नन्वेति प्रमत्वादिग्राह्यं प्रपंचसत्यत्वं ब्रह्मसत्यत्ववत् परमार्थं न भवतीति तथा सति उपक्रमाद्यव

प्रतिबिंबस्य बिंबाभिन्नत्वेपि प्रतिबिंबापरोक्ष्यं संभवतीति न साक्षीकार्यमत आह स्वकीयइति मुखइति प्रति
बिंबत्वेनोपेतइतियोषः नासादीति मुखेसन्निकर्षसंभवादिमर्थः यद्विबिंबप्रतिबिंबयोरभेदे प्रतिबिंबापरो
क्ष्यंस्वमुखे प्रतिबिंबस्थलेन संभवति नहि प्रतिबिंबोबिंबात् भिन्नः मिथ्याभूतएवास्तु का हानिरद्वैतवादिन
इतिशंकते नचेति तस्यहानिंपूर्ववादी दर्शयति ब्रह्मप्रतिबिंबेति जीवोब्रह्मणः सकाशात्स्वरूपतोभि
द्यते ब्रह्मप्रतिबिंबत्वात् सामान्यव्याप्तौमुखप्रतिबिंबवत् तथ्वजीवोमिथ्या ब्रह्माभिन्नत्वात् घटादिवदि

स्वकीये ग्रीवास्थे मुखेनासाद्यवच्छिन्नप्रदेशापरोक्षत्वसंभवेपि नयनगोलकललाटादिप्रदेशापरोक्ष्या
योगात् प्रतिबिंबभ्रमेण नयनगोलकादिप्रदेशापरोक्ष्यदर्शनाच्च नच बिंबातिरिक्तप्रतिबिंबाभ्युप
गमेद्वैतापत्तिः ब्रह्मप्रतिबिंबजीवस्यापि ततोभेदेन मिथ्यात्वापत्तेः अत्र विवरणानुसारिणः
प्राहुः ग्रीवास्थ एव मुखे दर्पणोपाधिसन्निधानदोषाद्दर्पणस्थत्वभ्रमः मुखव्यक्तिबिंबभेदा
नामध्यासासंभवान्न दर्पणे मुखाध्यासः कल्पनागौरवात्

मर्थः बिंबप्रतिबिंबयोर्लौकिकभेदाभावान्नोक्तदोषइतिपरिहरति अत्रविवरणेति ननु दर्पणे मुखस्या
प्यध्यासोन कल्पनीयः गौरवादित्ययुक्तं प्रतिबिंबमुखे दर्पणे मुखमितिदर्पणस्थत्वानुभवात् ग्रीवा
स्थमुखस्य दर्पणस्थतायोगान्नथा प्रतिबिंबमुखस्य ग्रीवास्थमुखंप्रतिआभिमुख्यानुभवात् मुखप्रतिमु
खयोरभेदपक्षे तस्यैवतदाभिमुख्यायोगात् तयोर्भेदस्यैवस्फुटमनुभवाच्च तस्मादनुभवत्रयानुरोधेनोपा
धावनिर्वचनीयप्रतिबिंबाध्यासउपेयः गौरवंच प्रामाणिकत्वान्नदोषावहमित्याशंक्य तदनुभवत्रयस्या
प्यसिद्धमाह ग्रीवास्थएवेति धर्मिकल्पनापेक्षया वरं धर्मकल्पनमपि तद्विति भावः

एवं चेति सन्घट इत्यादिप्रतीतेर्घटादितादात्म्यापत्तेः सन्निति प्रतीयमाने सद्रूपत्वं स्वरूपे ब्रह्मण्येव सत्ताविषयकत्वम
सन्घट इति प्रतीतेरिव सदंशे मूलविषयकत्वं ब्रह्मणि सत्ताप्रतीतिवशादेव घटादौ सत्त्वव्यवहार इति स्थिते सतीय
र्थः यत्तु भेदवादिभिरुच्यते प्रपंचेषु सत्त्वासत्त्वनिषेधो न संभवति प्रपंचे सत्त्वगोचरप्रमात्वप्रतीतिविरो
धादिति तत्र हेत्वसिद्धिरित्याह प्रपंच इति यद्योक्तेन तस्य प्रसक्तप्रतिषेध इति तत्राह तत्तादात्म्येति तत्पदं घटादि
परं प्रपंचब्रह्मणोर्भेदाग्रहेण ब्रह्मणि या सत्ताप्रतीतिः सैव प्रपंचे सत्त्वप्रसक्तिर्भवति तन्मूलस्यैव तत्र व्यवहार इ
त्यर्थः नोपजीव्यविरोध इति श्रौतमिथ्यात्वबोधं प्रत्युपजीव्यस्य वर्णपदादिप्रत्यक्षस्य सत्त्वानभ्युपगमा

एवं प्रपंचे सत्यत्वप्रतीत्यभावात् तत्तादात्म्यापत्तेर्ब्रह्मणि तत्प्रतीतेर्वाऽविवेकेन प्रपंचे तत्प्रसक्त्युपप
त्तेश्च सत्यत्वेन प्रपंचनिषेधेनोपजीव्यविरोधो न वाऽप्रसक्तनिषेधता ननु ब्रह्मगतपारमार्थिकसत्ता
तिरेकेण प्रपंचसत्ताभासानभ्युपगमे व्यवहितसत्यरजतातिरेकेण शुक्तौ रजताभासोत्पत्तिः किमर्थ
मुपेयते इति वाच्यं व्यवहितस्यासन्निकृष्टस्यापरोक्ष्यासंभवात्तन्निर्वाहाय तदुपगमात् नन्वेवं प्र
तिबिंबभ्रमस्थलेपि ग्रीवास्थमुखातिरेकेण दर्पणे मुखाभासोत्पत्तिरूपेया स्यात्

तदबाधाच्चेति भावः ननु यदि घटादिप्रपंचे ब्रह्मसत्तयैव सत्त्वव्यवहारसिद्धौ पृथक् सत्त्वं न कल्प्यते तत्कल्प
नेमानाभावात् ग्राह्यबाधाच्च तर्हि तत्र प्रसंग इति शंकते ननु चेति किमर्थमिति तत्कल्पने गौरवात् तथा चानिर्वचनी
यरजताद्यसिद्धिरिति शंकाभिप्रायः गौरवं प्रामाणिकत्वान्न दोषायेत्याशयेन परिहरति व्यवहितस्येति अ
सन्निकृष्टस्येति अभिव्यक्तचैतन्यतादात्म्यशून्यस्येति यावत् नन्वेवमिति आपरोक्ष्याय रजताभासो
त्पत्त्यभ्युपगम इत्यर्थः ॥

सि-ले-
टि-
२५

ननु प्रतिबिंबाध्यासवादिना सन्निकृष्टस्यैव बिंबत्वेनांगीक्रियते अन्तोग्रीवास्थमुखस्य बिंबत्वनिर्वाहाय स्वचक्षुः स
न्निकर्षापेक्षाभावान्नायं नियमस्तेनादर्शव्यवहितमप्याह तन्नियमानभ्युपगमस्तु बिंबसन्निकर्षस्य चाक्षुषप्रति
बिंबाध्यासहेतुत्वे व्यवहितस्यापि चाक्षुषप्रतिबिंबप्रसंगः विनानेन विशेषणेन नमस्यकस्यापि प्रतिबिंबापत्त्या
परमाणोर्वायोश्च तत्प्रसंगात् तदुत्तरार्थः प्रतिबिंबाध्यासे बिंबसन्निकर्षस्य हेतुत्वं विनैव उक्तातिप्रसंगं परिहर
ति प्रतिबिंबाध्यासवादी न चाव्यवहितेति तथा च कुड्यादिव्यवहितमुखादेः परमाणोर्वायोश्च न चाक्षुषप्रतिबिंबा
पत्तिरिति भावः द्रव्यचाक्षुषं प्रति द्रव्यगतमहत्त्वोद्भूतरूपवत्त्वयोः कारणत्वं क्लृप्तं तथा कुड्यादेः सन्निकर्षविघ
टनद्वारा वा स्वस्वगोचरप्रत्यक्षप्रतिबंधकत्वं क्लृप्तं तथा च बिंबप्रतिबिंबयोरभेदपक्षे बिंबचाक्षुषत्वात्

तन्नियमानभ्युपगमे परमाणोः कुड्यादिव्यवहितस्थूलस्यापि चाक्षुषप्रतिबिंबभ्रमप्रसंगात् न चाव्यवहि
तस्थूलोद्भूतरूपवत एव चाक्षुषप्रतिबिंबो नान्यस्येति नियम इति वाच्यं बिंबस्योद्भूतरूपयोः क्लृप्ते
न चाक्षुषज्ञानजननेनोपयोगसंभवे विधांतरेणोपयोगकल्पनानुपपत्तेः

बिंबभूतमुखादिगतयोः स्थूलत्वोद्भूतरूपयोः क्लृप्तं न चाक्षुषभ्रमत्वादन्यत्र कारणत्वं न कल्पनीयमिति लाघवं शुक्तिरज
तादिवत् साक्षिभास्यप्रतिबिंबाध्यासात्मपक्षे तु बिंबसन्निकर्षस्य प्रतिबिंबाध्यासहेतुत्वानुपगमे न वायुपरमा ।
ण्वोश्चाक्षुषप्रतिबिंबवारणाय बिंबभूतद्रव्यगतयोर्महत्त्वोद्भूतरूपयोः स्वाश्रयगोचरचाक्षुषत्ववत् स्वाश्रयद्रव्यरूपवि
बहेतुकप्रतिबिंबाध्यासोत्पत्तावपि हेतुत्वं कल्पनीयमिति गौरवं तथा बिंबप्रतिबिंबाभेदपक्षे नयनरश्मीनां परावृत्त्या बिंब
संबंधाभ्युपगमेन प्रतिबिंबभ्रमस्थलेपि बिंबसन्निकर्षस्य हेतुत्वसत्त्वात् घटादिचाक्षुषत्ववत् प्रतिबिंबचाक्षुषेपि कुड्या
देः सन्निकर्षविघटनद्वारैव प्रतिबंधकत्वेन तत्र क्लृप्तत्वात् साक्षात्प्रतिबंधकत्वं कल्पनीयमिति लाघवं प्रतिबिंबसन्नि
कर्षस्य हेतुत्वानुपगमे न कुड्यादेः सन्निकर्षविघटकत्वस्य क्लृप्तत्वस्य प्रतिबिंबभ्रमस्थले वक्तुमशक्यतया प्रतिबिंबा
ध्यासं प्रति साक्षादेव प्रतिबंधकत्वं व्यवहितस्य प्रतिबिंबवारणाय कल्पनीयमिति गौरवमित्याशयेन दूषयति बिंब

२१

ननु प्रतिबिंबस्य बाधदर्शनाभिप्रायांशहेतुसिद्धिमाह दर्पणइति मात्रपदं प्रतिबिंबवस्तुस्वरूपबाधाभावार्थकं बाधादित्यनेन
र्दर्पणस्य तत्स्वरूपसंसर्गस्य मिथ्यात्वं प्रतिबिंबस्य सतत्वं चेति शेषः विपक्षे दोषमाह मिथ्यावस्त्वंतरत्वइति नन्वेवं भू
तले घटो नास्तीत्यत्रापि घटसंसर्गाभाव एव प्रतीयते न तु घट इत्यापत्तेः ननु तर्हि भूतले घटाभावो न सिध्येदिति चेन्न
घटाभाववद्भूतलमिति प्रतीत्या तत्संभवादिति भावः बिंबप्रतिबिंबयोर्भेदमात्रकल्पनायां स्वरूपाभेदप्रत्यभि
ज्ञानमप्यनुकूलयइति दर्पणे ममेति लाञ्छनसमुच्चयार्थश्चकारः यद्वा प्रतिबिंबस्य सत्यत्वे बिंबाभिन्नत्वे हेतुमभिप्रेत्य त
त्रमानमाह दर्पणे ममेति चकारो बाधाभावसमुच्चयार्थः तथा च न प्रतिबिंबस्य मिथ्यात्वं बाधाभावात् बिंबाभिन्नत्वाच्चे
त्यर्थः एवं लोके प्रतिबिंबस्य बिंबाभिन्नत्वसत्यत्वयोः प्रसाधनेन ब्रह्मप्रतिबिंबस्य जीवस्य ब्रह्माभिन्नत्वमिथ्यात्वप्रसंगो

दर्पणे मुखं नास्तीति संसर्गमात्रबाधात् मिथ्यावस्त्वंतरत्वेनेदं मुखमिति स्वरूपबाधापत्तेः दर्पणे मम
मुखं भातीति स्वमुखाभेदप्रत्यभिज्ञानाच्च न च ग्रीवास्थमुखस्याधिष्ठानस्यापरोक्षासंभव उपाधिप्रतिहत
नयनरश्मीनां परावृत्त्या बिंबग्राहकत्वनियमाभ्युपगमाच्च नादि

निरस्तः यश्च तयोरभेदपक्षे ग्रीवास्थमुखस्य
नयनगोलकादिप्रदेशेषु स्वचक्षुःसन्निकर्षाभावेन प्रतिबिंबस्य साकल्येन प्रत्यक्षत्वं न संभवतीत्युक्तं तद्दूषयति निरा
करोति न चेत्यादिना अधिष्ठानस्येति प्रतिबिंबत्वप्रत्यभिज्ञाविषयत्वदर्पणस्थत्वप्रतिबिंबभेदानां कल्पनाधिष्ठानस्ये
त्यर्थः असंभवो न चेत्यत्र हेतुमाह उपाधिप्रतिहतेति नयनरश्मयः चक्षुर्गोलकाद्बहिर्निर्गत्य दर्पणाद्युपाधिं प्राप्य
तेन प्रतिहताः पुनरावृत्त्य ग्रीवास्थमुखं तदवयवैः संसृज्यंते ततश्चाभिमुखावयवरूपांतरमुखस्य साक्षात्कारवत्सा
कल्येन स्वग्रीवास्थमुखस्य साक्षात्कारः संभवति न च परावृत्तनयनरश्मीनां गोलकद्वारांतः प्रवेशस्यैवानुपपत्तेस्त
न्नत्वादत्र तथाकल्पने गौरवमुक्तमिति वाच्यं प्रतिबिंबोत्पत्तिवादिनापि चक्षुःसन्निकृष्टस्यैव बिंबता यावत्त
त्वेन उक्तनियमस्य तेनापि स्वीकार्यत्वादतः संप्रतिपन्नत्वात् गौरवं न दोषायेति भावः ॥

सि॰ ले॰
टि॰
२५

एवकारव्यवच्छेद्यमाह नशिलादीति शिलादौ प्रतिबिंबादर्शनादिति भावः ननु स्वच्छतात्वादेः प्रतिबिंबग्राहित्वेन शि
लादिवैलक्षण्येप्यत्यंतस्वतिहतानां दर्पणादिप्रतिहतानामिव नयनरश्मीनां प्राकल्पेन मुखादिग्राहकत्वं स्यादत आह
मलिनोपाधीति संस्थानविशेषः नयनगोलकादिः फलबलानुसारिपदार्थस्वभावकल्पनेन दोषांतराण्यपि निर
स्तानीत्याह साक्षादित्यादिना साक्षात्त्वादिति साक्षात्स्वरूपावलोकनरूपमर्थः ननु प्रतिबिंबोपाधिभूतजलेन प्रतिह
तानां नयनरश्मीनां बिंबदेशप्राप्त्युपगमे जलांतर्गतसिकतादिप्रमत्वं न स्यात् सन्निकर्षाभावादिति दूषणमपि
निरस्तमित्याह जलाद्युपाधीति ननूपाधिप्रतिहतानां बिंबदेशप्राप्त्युपगमे दृष्टमागव्यवहितपदार्थस्यापि

नशिलादिप्रतिहतानामनतिस्वच्छतान्यादिप्रतिहतानां मलिनोपाधिसंबंधदोषान्मुखसंस्थानविशेषा
ग्राहकत्वं साक्षात्स्वरूपप्रेक्षणं मिवोपाधिप्राप्त्यनिष्टानां नलपासो वतेजसा प्रतिहति प्रतिबिंबरूपा
वलोकने साक्षात्तदवलोकनरूपत्वनाशकत्वं जलाद्युपाधिसन्निकर्षकेषांचिदुपाधिप्रतिहतानां बिंब
प्राप्तावपि केषांचित्तदंतर्गतसिकतादिग्रहणमित्यादिकल्पनानुकश्चिद्दोष इति अद्वैतविद्याकृत
स्तु वस्तुप्रतिबिंबस्य मिथ्यात्वमभ्युपगच्छतां त्रिविधजीववादिनां विद्यारण्यगुरुप्रभृतीनामेव मभिप्रा

तिबिंबप्रसंग इति चेत् नायं दोषः फलबलेन शरीरावयवानां सन्निकर्षविघटकत्वकल्पनादित्यभिप्रेत्याह दृश्या
दिकल्पनादिति नयनरश्मीनां परावृत्य बिंबग्राहित्वस्य रेखारूपाचार्यैरुक्तं दर्पणाभिहता दृष्टिः परावृत्य स्वमाननं
व्याप्नुवत्याभिमुख्येन व्यक्तं दर्शयेन्मुखमिति बिंबप्रतिबिंबयोर्भेदपक्षनिराकरणपूर्वकं तदभेदपक्षो निरूपि
तः इदानीं तदभेदनिराकरणपूर्वकं भेदपक्षं निरूपयति अद्वैतविद्याकृतस्त्विति पारमार्थिकव्यावहारिकप्राति
भासिकभेदेन जीवस्त्रिविध इति पक्षः प्रथमपरिच्छेदे निरूपित इति बोध्यं एवमिति वक्ष्यमाणप्रकारेणेत्य

टे॰
२५

रुद्देति प्रतिबिंबभ्रमस्थलइत्यर्थः नचैवं लमस्य कल्पनागौरवदोषः दोषांतरमपि प्रसज्यतइत्याह तथैवेति सन्निक
र्षविघटनं विनैवेत्यर्थः तथाचोक्तगौरवादिदोषपरिहाय परावृत्तेति नियमम्युपेयः बिंबसन्निकर्षायेतिभावः चाक्षुष
प्रतिबिंबभ्रमस्थले बिंबसन्निकर्षस्य त्वयापि वाच्यत्वात् परावृत्तेति नियमो नाप्रयोजक इत्याह दर्पणेमिथ्येति कार
णत्रयेपि दोषसंप्रयोगसंस्काररूपकारणत्रयेत्यर्थः स्वस्वविषयस्य चक्षुःसन्निकर्षानुपगमे दर्पणादावारोप्य प्रतिम

कुड्यादिव्यवधानस्य प्रतिहतनयनरश्मिसंबंधविघटनं विनैवेह प्रतिबंधकत्वे तथैव घटप्रसक्त्यादि
स्थलेपि तस्य प्रतिबंधकत्वसंभवेन चक्षुःसन्निकर्षमात्रस्य कारणत्वलोपप्रसंगाच्च दर्पणे मिथ्यामुखा
ध्यासवादिनापि कारणत्रयांतर्गतसंस्कारसिद्ध्यर्थं नयनरश्मीनां कदाचित्परावृत्त्या स्वमुखग्राहकत्वकल्प
नयैव पूर्वानुभवस्य समर्पणीयत्वात् नचनासादिप्रदेशावच्छिन्नपूर्वानुभवादेव संस्कारोपपत्तिः तावता
नयनरश्मिजालकादिप्रतिबिंबाध्यासानुपपत्तेः तटाकसलिले तटविटपिसमारूढाहष्टचरप्रकृष्टप्र
तिबिंबाध्यासस्थले कथमपि पूर्वानुभवस्याऽदृष्टत्वात् एवं चोपाधिप्रतिहतनयनरश्मीनां बिंबप्र
ध्यतङ्ग्राहकत्वेऽवश्यवक्तव्ये फलबलाद्दर्पणाद्यभिहतानामेव बिंब

एवसजातीयस्वमुखस्याध्यासाकारस्य कदाप्यसं
भवेनाध्यासकारणभूतस्याप्यसजातीयगोचरपूर्वानुभवजन्यसंस्कारस्याभावात् प्रतिबिंबरूपाद्यध्यासस्योप
त्तिर्नस्यादतः स्वस्वविषयस्य चक्षुःसन्निकर्षत्वाभावायउक्तनियमस्यावश्यकत्वादितिभावः तावतेति नासादिप्रदेशावच्छिन्न
पूर्वानुभवमात्रेणेत्यर्थः इदमपि कश्चित् दुर्लभमित्याह तटाकेति अहष्टचरेति कदाप्यदृष्टेत्यर्थः एवं चेति उक्तप्रका
रेणेत्यर्थः उक्तनियमस्यातिप्रसंगं परिहरति फलबलादिति दर्पणादौ प्रतिबिंबभ्रमदर्शनलक्षणफलानुरोधा

सि॰ ले॰ टि॰ २६

बालानामिति बालाश्चेल्लजलधयादौ भयंकरं प्रतिबिंबं दृष्ट्वा तं विहाय पलायन्ते सौम्यं प्रीतिकरं प्रतिबिंबं दृष्ट्वा
तस्योपादानमिच्छंति प्रतिबिंबदर्शं गाच्छंति चेति सर्वानुभवसिद्धं तदुक्तं कर्णामृताचार्यैः रत्नस्थले जानुचरः
कुमारः संक्रांतमात्मीयमुखारविंदं आदातुकामस्तदलाभखेदात् विलोक्य धात्रीवदनं रुरोद इति कुमारः श्री
कृष्णरूपः शिशुः निर्मलरत्नमयवेदिकायां जानुभ्यां संचरन् तत्र संक्रांतं प्रतिबिंबितं विविधैः कुंडलादि
भूषणैर्भूषितं निःसीमसौंदर्योपेतं गोपीजनमनोहरं ब्रह्मादिभिरपि सदा स्पृहणीयं स्वकीयमुखारविं

२६

बालानां प्रतिबिंबे पुरुषांतरभ्रमस्य हानोपादित्साद्यर्थक्रियापर्यंतस्योपलम्भितत्वमप्राकृत्वात्
न च भ्रमेत्तावतामपि स्वमुखविशेषपरिज्ञानाय दर्पणाद्युपादानदर्शनादभेदज्ञानमप्यर्थक्रिया
पर्यंतमिति वाच्यं

दनुपलभ्य लोकसिद्धां बालचेष्टामनुवर्तमानः तदादानेच्छयापि
रकालं हस्तव्यापारं कृत्वापि यदा तन्न लब्धवान् तदा तदलाभखेदेन धात्र्या मुखं दृष्ट्वा त्वया इदं गृहीत्वा मह्यं
देयमिति अभिसंधिमान् मुक्तकंठं तथा रोदनं कृतवानित्यर्थः अभेदज्ञानस्याप्यर्थक्रियापर्यंतत्वं समानमित्या
शंक्य निषेधयति न चेत्यादिना यदि बिंबप्रतिबिंबयोर्वस्तुतो भेद एव तदा परीक्षकाणां तद्भेदनिर्णयः आवश्यक
इति तेषां स्वमुखगतविशेषनिर्णयाय दर्पणाद्यादानं न स्यात् तेषामपि तद्दर्शनादभेदनिश्चयस्तेषां वाच्य इत्यर्थः

उ॰ २६

चैत्रेति चैत्रोऽपदाद्दर्पणे स्वमुखं पश्यति तदा पार्श्वस्थैश्चैत्रग्रीवायां बिंबभूतं स्वमुखं दर्पणे चैत्रमुखप्रतिबिंबं च परस्परं भि
न्नत्वेन परस्परं सदृशत्वेन चासंदिग्धाविपर्यस्तमनुभूयत इत्यर्थः । सेति स्वरूक्तलगतात्सत्यरजताद्भिन्नत्वेन तत्सदृ
शत्वेन चानुभूयमानं शुक्तिरजतं यथा तद्भिन्नं मिथ्या च तद्वदित्यर्थः । अभेदज्ञानमप्रसिद्धमित्याह स्पष्टेति उदाह
तरजतयोरभेदज्ञानादर्शनादिति भावः । आदिपदं प्राङ्मुखत्वं तद्ग्रीवास्थत्वं दर्पणस्थत्वं तत्रात्र पारतन्त्र्यादि संग्रा
हार्थं तर्हि सर्वानुभवसिद्धस्याभेदव्यपदेशस्य का गतिः ज्ञानपूर्वकत्वाद्व्यपदेशस्येत्याशंक्यानाप्यभेदव्यपदेश उ

चैत्रमुखाद्भेदेन तत्सदृशत्वेन पार्श्वस्थितैः स्पष्टं निरीक्ष्यमाणं दर्पणे तत्प्रतिबिंबं ततो भिन्नं स्वरूपतोऽस्मि ।
क्षेव स्वकरगतादिव रजताच्छुक्तिरजतं नच दर्पणे मम मुखं भातीति बिंबाभेदज्ञानविरोधः स्पष्ट
भेदद्वित्वप्रत्यङ्मुखत्वादिज्ञानविरोधेनाऽभेदासंभवात् दर्पणे मम मुखमितिव्यपदेशस्य स्वच्छत्वापात्तमु
खे स्वमुखव्यपदेशवद्गौणत्वाच्च नचाभेदज्ञानविरोधाद्भेदव्यपदेश एव गौणः किं न स्यादिति शंकां

माह दर्पणे ममेति स्फुटभेदज्ञाने व्यपदेशायोगादिति भावः न स्वदर्पणे मम मुखं भाति मम मुखं मलिनं भा
ति मम मुखं दीर्घं भाति मम मुखं ग्रीवास्थमेव न दर्पणगतमिति अभेदानुभवानामपि स्फुटत्वाभ्युपगमात्त्वादभेदव्य
पदेशो मुख्यः अभेदानुभवविरोधेन भेदानुभवस्यैवासंभवात् भेदव्यपदेशमात्रमवशिष्यते तत्र च बिंबप्रति
बिंबयोर्वस्तुगत्याभेदाभावेऽपि कल्पितभेदसत्त्वादुपपद्यत इति वैपरीत्यमाशंक्य निषेधति नचेत्यादिना ॥
प्रतिबिंबगोचरप्रत्यक्षादिदर्शनं तस्य बिंबाद्भेदं विना नास्ति ध्यातीति विनिगमकमाह ॥

सि· ले· द्वि· २७

स्फुटत्वाभावादयं चैतेषामभिप्रायः कूटस्थदीपे यथाप्रभावेत्त्वंसमामिति वार्त्तिकवचनोदाहरणेन स्पष्टः तच्च वचन-
मादावेवोदाहृत्य व्याख्यातमिति संक्षेपः प्रतिबिंबस्थले दर्पणास्थत्वादिरूपसंसर्गमात्रबाधस्तत्र मनुष्यप्रतिबिं-
बाप्रतिबिंबस्वरूपबाधं साधयति यत्त्विमादिना प्रापितेति तत्स्थानेवशुक्तिरजतोद्धा निर्वचनीयत्वं सिद्धं तादृश
तेनस्यादिति भावः अत्र यद्यपि तादात्म्यमात्रस्य बाध्यत्वेपि रजतस्यानिर्वचनीयस्यात्यन्तिकनिवार्यादेशान्तरस्थरज।

यत्तु नात्र मुखमिति दर्पणे मुखसंसर्गमात्रस्य बाधो न मुखस्येति तन्न नेदं रजतमित्यत्रापि इदमर्थे
रजततादात्म्यमात्रस्य बाधो न रजतस्येत्यापत्तेः परिच्छेदमंशो रजतस्य तादात्म्येनाध्यासात् नेदं रजतमि-
ति तादात्म्येन रजतस्येव बाधो न च तादात्म्यमात्रस्य तद्वद्दर्पणे मुखस्य संसर्गितयाध्यासात् नात्र मुखमि-
ति संसर्गितया मुखस्येव बाधो न संसर्गमात्रस्येति तत्स्पष्टत्वधर्मिणोप्यध्यासकल्पने गौरवमिति न
इजताभासकल्पनागौरववत्प्रामाणिकत्वान्न दोषः स्वनेत्रगोलकादिप्रतिबिंबभ्रमस्थले बिंबा-
परोक्ष्यकल्पनोपायाभावात्

२७

तादेः संविदभिन्नत्वाभावेन पुरोवर्त्यभिन्नतयाप्रसन्नत्वान्नुपपत्तिरित्युक्तत्वात्तथापि शुक्तिरजतस्य बाधोप्युपपाद-
यितुं शक्यत इति मत्वा बिंबप्रतिबिंबाभेदवादी शंकते यदि चेति संसर्गितयेति आद्यपक्षेयमर्थः प्रामाणिक-
त्वादिति बाधकप्रमाणस्य शुक्तिरजत इव प्रतिबिंबेपि सत्त्वेनाध्यासकल्पनागौरवस्य तन्मूलकत्वाविशेषा-
दित्यर्थः अभेदपक्षे स्वमुखगतनयनगोलकादिप्रतिबिंबस्यापरोक्षासंभवाच्च तदध्यासकल्पनागौरवं
प्रामाणिकमित्याह स्वनेत्रेति

उ· २७

तेषांब्रह्मत्वेनान्यथासिद्धिमाह भेदेपीति बिंबप्रतिबिंबयोः स्वरूपतोभेदसत्त्वेपीत्यर्थः परीच्छकत्वादेवतेषामुक्तोपपत्तिभिः
भेदनिश्चयवत्वेनियमविशेषज्ञानवत्वेनचसंभवतीतिभावः ननुबालानांप्रतिबिंबयोश्चब्रह्मानादिक्रियापिबिंबसउपाधिस्थ
त्वभ्रमादेवसंभवतीत्यन्यथासिद्धिः तत्रापिकल्पनात्यथाचबिंबप्रतिबिंबयोर्भेदाभेदानुभवानांभेदाभेदप्रयुक्तार्थक्रियाणांचतुल्य
त्वेसत्यभेदस्यस्वाभाविकत्वकल्पनमेवयुक्तंलाघवाद्बिंबप्रतिबिंबभावापन्नयोश्रुतिसिद्धतजीवब्रह्मणोरभेदप्रतिपत्त्युपयो
गितयालौकिकबिंबप्रतिबिंबाभेदकल्पनस्याभेदश्रुत्यपेक्षितत्वाच्चप्रतिबिंबजीवस्येवब्रह्माभेदसंभवेतदतिरिक्तपार
मार्थिकावच्छिन्नजीवकल्पनायायोगरवदयुक्तत्वाच्चयथासंयंज्योतिरात्माविवस्वानिमादिमंत्रस्सतयोरभेदपक्षएवस्वार
स्याच्चनत्वहियथाविवस्वदादेर्बहुरूपाधिषुप्रतिबिंबतत्वप्रयुक्तंनानात्वंतत्त्वतएकत्वंतथाचैतन्यस्यबहुरूपाधिप्रतिबिं
बतत्वप्रयुक्तंनानात्वंस्वतएकत्वमितिप्रतिपाद्यतेतच्चबिंबप्रतिबिंबयोर्भेदपक्षेनसंभवतितत्पक्षेहिबिंबचैतन्यस्यैका

भेदेपिप्रतिबिंबस्यबिंबसमानाकारत्वनियमविशेषपरिज्ञानादेवतदुपादानोपपत्तेः

त्वंप्रतिबिंबानांनानात्वमितिपर्यवसानेनैकस्यैवोपाधिकनानात्वपर्यवसानासंभवात्तस्माच्चैतन्यप्रतिबिंबांगीकारप
क्षेलोकेचैत्रप्रतिबिंबस्थलेचबिंबप्रतिबिंबयोरभेदपक्षएवविवरणकाराभिमतः श्रुपानितिचेत् सत्यंसूत्रमहष्याए
वमेवश्रुतएवभामतीनिबंधनादिषुजीवब्रह्मणोरभेदेपिलौकिकबिंबप्रतिबिंबयोरिवकल्पितभेदसत्त्वाद्धर्मव्यवस्थे
तिसार्वत्रिकोव्यवहारः श्रीचारणपगुरुप्रभृतिभिस्तुमंदाधिकारिणांतत्वेत्तुध्यारोहायप्रतिबिंबोमतिप्रक्रियाउपपादि
तामंदाधिकारिणांहियथाकर्तृत्वभोक्तृत्वादिसंसाराश्रयश्चिदाभासोमिथ्याभूतः सचात्मानभवतिआत्मात्वसंगचैत
न्यरूपः नसंसाराश्रयइतिप्रक्रियपातत्वंबुद्धाबाधोहतिनतथान्मनोब्रह्मप्रतिबिंबस्यस्वतःसिद्धब्रह्मत्वमतःकारणतादा
त्म्यात् संसाराश्रयत्वमितिप्रक्रियपातत्वंबुद्धाबाधोहतिलौकेविरुद्धधर्माश्रयस्यधर्मिभेदस्थलेनउवधर्मिभेदस्थले

सि. ले.
कि.
२८

ननोपि किं न त्याह तत्संसर्गे वेति पित्तादिदर्शनकाले पित्तादिना प्रतिहताः नयनरश्मयः स्वस्वात्मगतनयनगोलका
दिभिः संसृष्टाश्चेत् संसृष्टं नयनगोलकादिकं कथं न साक्षात्कारयेयुः साक्षात्कारयेयुरेवेत्यर्थः ननु दोषबलात् संसृष्ट
मपि न साक्षात्कारयेयुः अतो नोक्तदोष इत्यत आह दोषेणापिहीति दृश्यत इति शुक्तिरजतादिभ्रमस्थलेष्वपीति
शेषः तथा च पित्तादिसन्निकर्षकाले स्वस्वात्मादिसामान्यरूपेणावास्वस्वात्मसाक्षात्कारप्रसंग इति भावः वस्तुतस्त्वन्य
नन्यथासिद्धफलबलात् स्वच्छद्रव्यसंसृष्टस्य वा प्रतिबिंबोदयप्रयोजकत्वस्यैव प्रतिघातकत्वमुपेयते अतो नोक्तं ।

२४

तत्संसर्गे वा संसृष्टं किं न साक्षात्कारयेयुः दोषेणापि हि विशेषांशग्रहणमात्रं प्रतिबध्यमानं दृश्यते न
तु सन्निकृष्टधर्मिस्वरूपग्रहणमपि प्रतिमुखाध्यासपक्षे तु न किंचिद्दृष्टविरुद्धं कल्पनीयं तथा सत्य
वहितस्थूलोद्भूतरूपस्यैव चाक्षुषाध्यासदर्शनाद्धि वर्गा तस्योद्भूतरूपयोः स्वाश्रयसाक्षात्कारका
रणत्वेन हेतुतयोः स्वाश्रयप्रतिबिंबाध्यासेऽपि कारणत्वं ।।

दोष इति बोध्यं एवं बिंबप्रतिबिंबाभेदपक्षे दृष्टविरोधबाहुल्यमापाततो दर्शयित्वा प्रतिबिंबाध्यासोपपत्तिपक्ष
मुपपादयति प्रतिमुखाध्यासपक्षे त्विति कारणत्वं प्रतिबंधकत्वं च कल्पनीयमिति संबंधः स्वाश्रयेति म
हत्वोद्भूतरूपाश्रयद्रव्यगोचरचाक्षुषत्वावच्छिन्नं प्रति घटादिचाक्षुषे तु तयोरित्यर्थः द्वितीयः स्वपदम
पि स्थौल्योद्भूतरूपपरं अध्यासेपीति बिंबभूतमुखादिचाक्षुष इव स्वाश्रयमुखादेर्यः प्रतिबिंबरूपोऽध्या
सः तदुत्पत्तावपीत्यर्थः ।।

उ.
२६

सूर्याकोपायमनूद्य निराकरोति नयनरश्मीनामिति किरणसमूहमिति सूर्यकिरणसमूहमित्यर्थः नन्वत्र जलस्य प्रति
घातकत्वं न कल्प्यते किंतु जलांतर्गतसिकतादीनामतो न नितांतमृदुत्वं यथा सूर्यादिकिरणानां स्वतस्तृणादिदाहक
त्वाभावेपि सूर्यकांतमणिप्रतिहतानां तद्दाहकत्वं तथा नयनकिरणानां स्वतः सूर्यकिरणप्रतिघातकत्वाभावेपि प्रति
तिबिंबोपाधिप्रतिहतानां तद्विजयेसामर्थ्यमिति प्रायकल्पनोपपद्यते तथा च नोक्तदोष इत्यस्वरसादाह कथं चेति
कथं चाप्यायनेनेत्यादिति संबंधः अमृतमिव शीतलं यन्नयनस्य चंद्रप्रतिबिंबस्य बिंबतत्संनिकर्षाविशेषादित्यर्थः आप्यायनं

नयनरश्मीनामुपाधिप्रतिहतानां बिंबप्राप्तिकल्पने हि दृष्टविरुद्धं बह्वापद्यते कथं हि जलसंनिकर्षे केचिन्नय
नरश्मिमप्रतिहतमंतर्गच्छंत्यन्ये जलसंबंधेनापि प्रतिहन्यमानाः नितांतमृदवः सकलनयनरश्मिप्रतिघाति
नं किरणसमूहं विजित्य तन्मध्यगतं सूर्यमंडलं प्रविशेयुः कथं च चंद्रालोकनइव तत्प्रतिबिंबालोकनेपि अमृ
तशीतलतद्बिंबसंनिकर्षाविशेषे लोचनयोः शैत्याभिव्यक्त्या आप्यायनं न स्यात् कथं च जलसंबंधेनापि प्रति
हन्यमानाः शिलादिसंबंधेन न प्रतिहन्येरन् तत्प्रतिहतमपराह्णेवा नयनगोलकादिभिर्न संसृज्येरन्

शैत्यशांतिः यद्वानुमानयोग्यत्वः स्वच्छजलाशयादौ चंद्रमंडलप्रतिबिंबेनैवं तर्पणोपपत्तिनदालोचनयोः शैत्याभिव्य
क्त्यादिकं स्यात् बिंबप्रतिबिंबयोरभेदेन प्रतिबिंबसंनिकर्षस्यैव संनिकर्षत्वादित्यर्थः ननु लोचनयोः शैत्याभि
व्यक्तिश्चंद्रसंनिकर्षादिकृता न भवति किंतु तयोश्चंद्रकिरणसंसर्गसंततिकृता तथा चायोग्यत्वस्य लोचनयोस्त
दभावाच्चंद्रसंनिकर्षे तद्दर्शने सत्यपि न शैत्याभिव्यक्त्यादिप्रसक्तिरित्यस्वरसादाह कथं च नलेति कथं च न प्र
तिहन्येरन्निति संबंधः प्रतिहन्येरन्नेवेत्यर्थः ततः किं तत्राह तत्प्रतिहतमेति नयनगोलकादिभिः कथं संसृज्येरन्निति संबंधः

सि॰ले॰
द्वि॰
५६

कद्वारा शरीरांतःप्रवेशानियममित्यर्थः ननु प्रतिनिहतन्निनियमाभावपक्षेपि विंबसन्निकर्षघटकव्यवधानाभावापेक्षास्ति
अवनतमौलिनयनरश्मीनां सूर्यप्राप्तिस्थले उक्तचक्षुषा दर्पणे विलोक्यमाणे दर्पणप्रतिहतानां पार्श्वस्थपुरुषप्राप्ति
स्थले च सन्निकर्षविघटकाभावात् तत्प्राप्तिः संभवति प्रकृते च रत्नद्रव्यवानामव्यवधायकानां सत्ता दर्पणप्रतिहतानां न
पृष्ठभागव्यवहितवस्तुप्राप्तिरिति निस्वरसादाह नयेति उपाधिप्रतिहतनयनरश्मीनां प्रतिनिहतन्निनियमाभावपक्षे पृष्ठभा
गव्यवहितस्य प्रतिविंबापत्तिवन्नीरूपवाय्वादेरपि चाक्षुषप्रतिविंबापत्तिरिति दूषणं तत्समनन्तरपार्श्वस्थाशङ्कः ननु रूपस्या
पि वाय्वादेर्दर्पणगुणपगतरूपोपधानेन चाक्षुषप्रतिविंबभ्रमविषयत्वं तु वारयितुमनुपपन्नं द्रव्यस्य चाक्षुषप्रतिविंबभ्रमे विंब
गतस्य महत्त्वत उद्भूतरूपस्यापि कारणत्वादिमांशंकां द्रव्यगोचरचाक्षुषप्रतिविंबभ्रमे विंबगतरूपस्यानुपयोगान्निर्वामित्या

शंक्य मुखस्य ग्राहकत्ववचनवदन प्राचीकरणाभावेप्युपाधिप्रतिहतानां पृष्ठभागव्यवहितग्राहकत्वं तावत्तु वोरं उ
पाधिप्रतिहतनयनरश्मीनां प्रतिनिहतन्निनियमं विहाय पयत्रविंबं तत्रैव गमनोपगमात् नया मलिनदर्पणेप्यामतया
गौरस्य मुखस्य प्रतिविंबस्थले विद्यमानस्यापि विंबगतगौररूपस्य चाक्षुषत्वानेऽनुपयोगितया पीतशंखभ्रमस्यापेनारो
प्यरूपवैशिष्ट्येनैव विंबमुखस्य चाक्षुषत्वनिर्वाहस्मिति तथैव नीरूपस्यापि दर्पणोपाधिरूपामत्ववैशिष्ट्येन चाक्षु
षप्रतिविंबभ्रमविषयत्वमपि तु वोरं

४७

ह मलिनेति मलिनदर्पणे गौरस्य मुखस्य प्रतिविंबे सति प्रतिविंबं श्यामरूपेणोपहितस्य गौरमुखस्य चाक्षुषत्वं निर्वास
मित्यर्थः आरोप्यरूपेणैव कचिद्द्रव्यस्य चाक्षुषत्वे दृष्टान्तमाह पीतशंखेति कचिता किंकमनोपपादनावसरे शंखस्यारोप्य
पीतरूपविशिष्टतयैव भ्रमस्थले चाक्षुषत्वेनानपेक्षत्वकमिति भावः वस्तुतस्तु द्रव्यचाक्षुषे द्रव्यगतमेवोद्भूतरूपं कार
णमिति नीरूपद्रव्यस्य चाक्षुषप्रतिविंबभ्रमविषयत्वं प्रसज्जते मलिनदर्पणे गौरमुखप्रतिविंबस्थले पीतशंखा
दिभ्रमस्थले च श्यामं मुखं पीतः शंख इत्यादिभ्रमप्राचीनधर्मिज्ञाने स्वप्नासकारणभूते गौरशुक्लादिरूपस्य कारणा
नतीयपयोगाभावासिद्धेः द्रव्यचाक्षुषे रूपविषयकत्वनियमाभावस्य कचिता किंकग्रंथव्याख्यानावसरे दर्शितत्वपी
तयाह्व भ्रमसंभवात्रेति वोध्यं

उ॰
५६

यद्युक्तं प्रतिबिंबाध्यासं प्रतिकुड्यादेः साक्षात्प्रतिबंधकत्वस्वीकारेऽन्यत्रापि तथात्वापत्त्या सन्निकर्षमात्रविलोपप्रसंग इति तन्न सन्नि
कर्षहेतुतद्ग्राहकप्रमाणानुरोधेन सन्निकर्षघटनद्वारैव तस्य प्रत्यक्षप्रतिबंधकत्वाभ्युपगमादित्याशयेन सन्निकर्षस्य हेतुतद्ग्रा
हकप्रमाणं सूचयति तथेंद्रियेति तथेंद्रियस्य विषयं प्राप्यैव विषयप्रत्यक्षकारित्वदर्शनात् दृष्टांतेन मनआदेरपि प्राप्यका
रित्वमवगन्तमित्यर्थः व्यवहितेति छेदः व्यवहितप्रतिबिंबेति कुड्यादिव्यवहितसमुदायादेः प्रतिबिंबाध्यासस्य साक्षात्प्रतिबंध
कत्वं कल्पनीयं अन्यथा प्रतिबिंबोत्पत्तिपक्षे बिंबसन्निकर्षस्य हेतुत्वानुपगमेन व्यवहितस्यापि प्रतिबिंबप्रसंगस्य प्राग्द
र्शितत्वादित्यर्थः तत्र कल्पने को विरोध इति संबंधः तस्मिन्कल्पने इत्यर्थः अव्यवहितत्वस्थूलत्वादितद्रूपाणां ग्रहणादिप्रति
बिंबाध्यासेऽपयोगकल्पनस्य प्रयोजनमाह एतेनेति आदिपदं स्थौल्यसंग्रहार्थः उक्तेति व्यवहितादिप्रतिबिंबप्रसंग इत्य

कुड्यावरणादन्यस्तत्वेंद्रियस्य प्राप्यकारित्वावगतेन पन सन्निकर्षविघटनद्वारा व्यवहितवस्तुसाक्षात्कार
प्रतिबंधकत्वेन क्लृप्तस्य व्यवहितप्रतिबिंबाध्यासेऽपि विनैव द्वारान्तरं प्रतिबंधकत्वे च कल्पनीये तत्र को विरोधः क्वचि
त्कारणत्वादिना क्लृप्तस्य फलबलादन्यत्रापि कारणत्वादिकल्पने एतेनोपाधिप्रतिहतनयनरश्मीनां बिंबप्राप्त्यनुप
गमे व्यवहितस्थौल्यतद्रूपादिरहितस्य च चाक्षुषप्रतिबिंबप्रसंग इति निरस्तं किंच तदभ्युपगमे एवोक्तदूषणप्रसंगः
कंपसाक्षात्सूर्यावलोकनस्य विना चक्षुर्विक्षेपमवनतमौलिना निरीक्ष्यमाणे सलिले ततः प्रतिहतानां नयनर
श्मीनां ऊर्ध्वमुत्पत्य बिंबसूर्यग्राहकत्ववत्तिर्यक्चक्षुर्विक्षेपं विना अग्रतश्चक्षुषा दर्पणे विलोक्यमाने तत्प्रतिहतानां प

र्पः प्रसंगप्रकारान्भिन्नः एवेति तमुपमिनोति माहसाक्षादिति गगनस्थसूर्यावलोकने चक्षुर्विक्षेपः तत्र तं विनेत्यर्थः अ
वनतमौलिना अधोमुखेन तिर्यग्दिनिस्वाभिमुखे दर्पणे स्वप्रतिबिंबग्रहणकाले स्वपार्श्वस्थितपुरुषप्रतिबिंबग्रहणमप्युक्ति
प्रतिबिंबाभावकाले स्वपार्श्वस्थितपुरुषग्रहणाय स्वचक्षुषस्तिर्यग्विक्षेपो ऽतिरश्चक्षुषा स्वाभिमुखपुरुषस्येव स्वपार्श्व
स्थितपुरुषस्य ग्रहणं दर्शनात्तथा स्वाभिमुखे दर्पणे स्वपार्श्वस्थितपुरुषप्रतिबिंबग्रहणाय चक्षुषस्तिर्यग्विक्षेपं विना
दर्पणप्रतिहतानां स्वपार्श्वस्थितपुरुषग्राहकत्ववदित्यर्थः वदनेति वदनेसादिकरणानाम चक्षुषस्थपृष्ठभागवत्व्यवहि
तपदार्थग्रहणानुकूलो वदनव्यापारः प्रतिनिवृत्तिनियमं मितिन यनगोलकाभिमुखविषय प्रतिहतानां पुनर्गोल

आदौ त्रिविधजीववादिनामिति विशेषणेन सूचितं परिहारमाविष्करोति प्रतिबिंबजीवस्येति मुक्तिभाक्त्वं ब्रह्माभेदः
प्रतिबिंबस्य मिथ्यात्वादापाततस्तत्वमतं दूषयितुमनुभाषते यदपीति ननु दृष्टान्तादिच्छायायाः नैल्यदर्शनात् प्रति
बिंबे धूम्रायमाणे नैल्यादर्शनेन च्छायावैलक्षण्यमतात्प्रतिबिंबस्य छायारूपत्वमनुपपन्नमिति शंकां निराकरणपूर्वं वि
शेषयदं तथाच बिंबभिन्नोपि मुखच्छायाभासः शुक्तिरजतादिवत् प्रातिभासिको न भवति किंतु बिंबवत्सत्यः छायावि।
शेषरूपत्वाभ्युपगमात्तस्येत्यर्थः छायायां नीलरूपवत्त्वनियमात्तद्विशेषरूपत्वं प्रतिबिंबस्य न संभवतीति छायास्वरू

प्रतिबिंबस्य तथात्वेप्यवच्छिन्नजीवस्य सत्यत्वान्मुक्तिभाक्त्वोपपत्तेरिति यत्तु प्रतिबिंबं दर्पणादिष्वसत्त्वेच्छाया।
विशेषरूपत्वात्सत्यमेवेति कस्यचिन्मतं तन्न छायाहि नाम शरीरादेरालोके कियद्देशाव्याप्यव
रुद्धे तन्नद्देशेऽलवत्वात्मकं तमएव न च मौक्तिकमाणिक्यादिप्रतिबिंबस्य तमोविरुद्धलोहितादिरूपवत्त्वात्तमो
रूपच्छायात्वं युक्तं न वा तमोरूपच्छायारहितत्वादिप्रतिबिंबस्य तथात्वमनुपपन्नं ननु तर्हि प्रतिबिंबस्य रूपच्छायाया
स्तमोरूपत्वासंभवे द्रव्यांतरत्वमस्तु तस्य द्रव्यान्तर्भावे तमोवद्द्रव्यांतरकल्पनोपपत्तेरितिचेत् किंतद्द्र
व्यांतरं प्रतीयमानरूपपरिमाणसंस्थानविशेषवत्स्वभावत्वादिधर्मयुक्तं तद्रहितं वा आद्ये प्रथमेन तेन
द्रव्यांतरेण रूपविशेषादिघटितप्रतिबिंबोपलंभनिर्वाह इति व्यर्थं तत्क

ल्पनपूर्वकं दूषयति तन्नेति शरी
रादेः छायानाम तमएव नान्यदिति प्रसिद्धमित्यर्थः कियद्देशाव्यापिन्यालोके शरीरादेवयवैर्निरुद्धे सतीति संबंधः
न चेति मौक्तिकस्फटिकादिप्रतिबिंबस्य सितरूपवत्त्वतः तद्विरुद्धतमोरूपच्छायात्वेन युक्तं तथा माणिक्यकनकादिप्रति
बिंबस्य लोहितपीतरूपादिमत्त्वात्तद्विरुद्धच्छायात्वेन युक्तमिति विभज्य योजनीयं न यत्नादेश्छायैव नास्तीति तत्प्रति
बिंबस्य छायारूपत्वमनुपपन्नमेवेत्यर्थः तमोवदिति यथा तमसो द्रव्यस्य तस्य द्रव्यान्तर्भावे सिद्धांते दशम द्रव्यांत

आरोप्यरूपविशिष्टतयैव चाक्षुषत्वे उदाहरणांतरमाह स्वतइति संप्रतिपन्नेरित्यापाततः गगनस्य चाक्षुषत्वन्निर्विषयत्वं
कवितार्किकमात्रसंमतेन तु पूर्वाचार्यसंमतं आचार्याणां मते तु गगनव्याप्तिसौरालोकादिगोचरचाक्षुषत्वमात्रालो
काद्यवच्छिन्नचैतन्याभिव्यक्तिकाले आलोकानुगतगगनावच्छिन्नचैतन्यस्याप्यभिव्यक्तिं स्वीकृत्याभिव्यक्ते गगनावच्छिन्ने
साक्षिणि नेत्राध्यासाभ्युपगमेन नेत्रादिविशिष्टगगनस्य साक्षिमात्रभास्यत्वादिति ध्येयं तस्मादिति इष्टविरोधरू
पबाधकाभावात् साधकत्वाच्चेति भावः श्रेयानिति मंदाधिकारिणः प्रतीतिवस्तुगतिः उपाधिप्रतिहतानां बिंबप्रा

स्वतोनीरूपस्यापि नभसोऽध्यस्तनैल्यविशिष्टेन चाक्षुषत्वसंप्रतिपत्तेः तस्मात्स्वरूपतः प्रतिमुखाध्यास
पक्षएव श्रेयान् नचतत्रापि पूर्वानुभवसंस्कारदोषेंद्रियसंप्रयोगरूपसामग्र्या सामान्यानुभवसंस्कारमात्रेण स्वप्नेप्यदृष्टचरस्व
रूपाध्यासवन्मुखसामान्यानुभवसंस्कारमात्रेण दर्पणे मुखविशेषाध्यासोपपत्तेः इयांस्तु भेदः स्वप्ने
शुभाशुभहेतुत्वदृष्टानुरोधेन पुरुषाकृतिविशेषाध्यासः इह तु बिंबसन्निधानानुरोधेन मुखाकृति ।
विशेषाध्यास इति नच प्रतिबिंबस्य स्वरूपतो मिथ्यात्वे ब्रह्मप्रतिबिंबस्य जीवस्यापि मिथ्यात्वापत्तिर्दोषः

ध्यासानुपगमे अध्यस्यमानमुखसजातीयगोचरपूर्वानुभवासंभवात् अध्यासकारणसंस्कारानुपपत्तिरित्याशंकामनूद्य नि
राकरोति नचतत्रापीति प्रतिबिंबाध्यासपक्षे संस्कारदोषेंद्रियसमग्र्यपि नचेत्यर्थः अदृष्टचरेति कदाप्यननुभूतेत्यर्थः
ननु मुखसामान्यानुभवजन्यसंस्कारस्य प्रतिमुखाध्यासहेतुत्वे तत्र मुखदर्पणयोः सान्निध्ये सति यस्यकस्यापि मुखस्या
ध्यासप्रसंगः स्वप्नवदेव तत्र नियमेनाभिमुखमुखाध्यास इत्यत्र नियामकाभावात् तस्याह इयांस्तु भेद इति स्वप्नप्रतिबिंबाध्या

प्रतिबंदीमाह तर्हीति पूर्वोक्तदृष्टांते मनसिनिधाय शुक्तिरजतस्यापिकारणं कल्पयति तत्रापीति शुक्तिरजतस्य
लोपीत्यर्थः ननु शुक्तिरजतं सत्यमिति स्वीकारे तस्य शुक्तौ सदासत्वाच्छुक्तिप्रमयतत्काले नियमेन तदपि गृह्येतेत्यतोन
तस्य सत्यत्वं संभवतीत्याशंकां संपरिहरति तथेति ततः किं तत्राह किमिति अर्धरजतीत्यायेनेति जरतीदृष्टा
तस्यार्धं मुखमात्रं वा मयतेनाधः कायमितिते तद्यथोपपत्तिशून्यमेवमिदमपीत्यर्थः ननु प्रसिद्धरजतमयो

32

तर्हि शुक्तिरजतमपि सत्यमस्तु तत्रापि यथा पूर्वं स्थितायामेव तत्तादात्म्यापन्नरजतोत्पादनसमर्थं किं
चित्कारणं परिकल्प्य तस्य रजतस्य दोषत्वाभिमतकारणसहकृतोंऽदृष्टिपर्यासत्वनियमवर्णनोपपत्तेः
किं शुक्तिरजतमसत्यं प्रतिबिंबः सत्यरजतमेव रजतीत्यायेन न च तथा सति रजतमिति दृश्यमानायाः शुक्तेर
अग्निसंयोगे रजतो चित्त द्रवीभावापत्तिः अनलकलशूविकादिप्रतिबिंबसो— मोऽयमादित्यानिमवच्छुक्तिरजतस्य
द्रवीभावयोग्यतारहितत्वोपपत्तेः अथोच्यते तनेदं रजतमित्येव रजतमभादिति सर्वसंप्रतिपन्नबाधान्तशु
क्तिरजतं सत्यमिति

यदि तत् द्रवीभवति शुक्तिरजतं तन्न तथेति तस्य मिथ्यात्वमेवेति मतं आशंकते न च तथा सतीति तस्य सत्यत्वे सती
त्यर्थः प्रतिबंदीं समर्थयते अनलेति यद्यप्यत्रोष्मापत्तिरेव प्रतिबिंबसत्यत्ववादिमते शुक्तिरजतादेरपि सत्यत्वसं
भवात् तथापि प्रतिबंदीव्याजेन शुक्तिरजतादेः अपि मिथ्यात्वनिरूपणेनात्यर्थं वा अप्प्रतिबंद्याः परिहारशंकातेप्र
तिबिंबसत्यत्ववादी अपोच्यते॥

प्रथमेकथं समस्तानिर्वाह इति संबंधः यद्येकमपि दर्पणं विशालं स्यात्तदानेकप्रतिबिंबानामसंकीर्णतयावस्थानं संभवेदि
त्याशंकावारणायाह अल्पेति अल्पपरिमाणेनापि दर्पणेनानेकत्वे सत्येकैकस्मिन् दर्पणे एकैकप्रतिबिंबस्य सं
कीर्णतयावस्थितेस्तदपि नास्तीत्याह एकस्मिन्निति एकस्मिन्नल्पपरिमाणेपि दर्पणे क्रमेणानेकप्रतिबिंबानामसंकी
र्णतया स्यात्तदपि नास्तीत्याह युगपदिति प्रतिबिंबस्य मिथ्यात्वेन तदा यदा दोषो भवति स्वप्नदशायामल्पेपि शरीरस्यांतराकाशे
रथगजादिपदार्थानां तदुचितदेशकालस्य चाध्यासवदल्पपरिमाणेपि दर्पणे परस्परमसंकीर्णतयाप्यनेकप्रतिबिंबा
नां तदुचितदेशकालस्य चाध्यासंसंभवादिति भावः कथं च द्वयोस्तस्योत्पत्तिरिति संबंधः समस्येति शेषः सामग्र्यभावाच्च न
तस्योत्पत्तिः संभवतीत्याह किं चेति दर्पणस्य यो वर्णः स एव प्रतिबिंबस्यापीति नियमस्तत्वेन दर्शितः किं चित्कारणं द

मूलम्

अथैकमेकस्मिन्नल्पपरिमाणे युगपदसंकीर्णतया प्रतीयमानानां महापरिमाणानामनेकसावयवप्रतिबिंबा
नां समस्तानां निर्वाहः कथं च न विडंबनमेवाचप्सूते दर्पणे तेष्वेवावतिष्ठमाने तदंतर्हेतुनास्थिकास्यनेकानिमित्तानि तत्प्रदे
शावतो द्वयोस्तस्योत्पत्तिः किं चासितरक्तपीताद्यनेकवर्णादिमतः प्रतिबिंबस्याप्यतो दर्पणमध्ये स्थितत्वं तत्संनि
हितेन तादृशाकारेणमालि यद्युक्तोपाधिमध्यविश्रांतियोग्यपरिमाणानामेव प्रतिबिंबानां महापरिमाणानां
न तादृशानिमित्तानां तादृशानां च भ्रम एव यथापूर्वं दर्पणे तद्देवपद्मावस्थानाविरोधेन तादृशप्रतिबिंबोत्पादनसम

र्पणसंभावो लापिनत्वेन दृष्टिदर्पणारूपविलक्षणानानारूपवतां प्रतिबिंबानामनुभवादित्याह अनेकेति सितपीतर।
क्ताद्यनेकवर्णयुक्तानां बिंबानामेव कारणत्वमस्तु नेत्याह दर्पणमध्यस्थितमिति तेषां निमित्तत्वेप्युपादानत्वेन संभव
त्प्रतिबिंबोत्पत्तिदेशे तेषामभावादित्यर्थः तादृशामिति सितपीतरक्ताद्यनेकवर्णयुक्तानां कारणं प्रतिबिंबोदयकाले
नियमेन तास्यानुपलंभादित्यर्थः प्रतिबिंबं हि दर्पणस्यांतः दर्पणस्य पृष्ठभागे दर्पणसंनिहितमनुभूयते न तु दर्पण
गतरूपपरिमाणादिवद्दर्पणस्योपरिभागे तत्तत्कारणेनार्पितं नैव भवतश्च मितिमत्वाद्दर्पणमध्यस्थितं तत्संनिहि
तमित्युक्तं मध्यशब्दोत्तरं र्थकः प्रतिबिंबस्वरूपमात्रं संमतं न प्रतीयमानधर्मोत्तमत्वादित्युपपत्तिरेवेति तत्संमतेभिनिवेश

आद्येनाभिप्रायमनुवदति यद्यपीति सर्वात्मनेति शुक्तिरजताध्यासात्पूर्वमिदंत्वात्मना साक्षात्कारसत्वेऽपि शुक्तित्वादि
विशेषात्मना साक्षात्कारो नास्तीति तत्राधिष्ठानविशेषांशावरणमज्ञानमुपादानं लभ्यते प्रकृते तु चक्षुःसंनिकृष्टे दर्प
णे प्रतिबिंबाध्यासात् पूर्वमिदंत्वात्मनेव दर्पणत्वादिविशेषात्मनापि साक्षात्कारसत्वेन सर्वात्मनाधिष्ठानसाक्षा
त्कारोस्ति तथा च तेनाधिष्ठानविशेषावरणस्याज्ञानस्य निवृत्तत्वान्न तदुपादानं संभवतीत्येतद्युक्तमेवेत्यर्थः अपि
रवधारणे निवर्त्तकमिति प्रतिबिंबाध्यासस्येति शेषः कथं तर्ह्युपादानादिलाभः तत्राह तथापीति तदेवेति अधि
ष्ठानाज्ञानमेवेत्यर्थः सर्वात्मनाधिष्ठानसाक्षात्कारेणाप्यज्ञानैकदेशस्यैव निवृत्तिर्न तु कार्त्स्न्येनेति फलबलाद्

यद्यपि सर्वात्मनाधिष्ठानज्ञानानन्तरमपि जायमाने प्रतिबिंबाध्यासेनाधिष्ठानावरणमज्ञानमुपादानं न वा
धिष्ठानविशेषांशाज्ञानं निवर्त्तकं तथाप्यधिष्ठानाज्ञानस्यावरणशक्त्यंशेन निवृत्तावपि विक्षेपशक्त्यंशेना
नुवृत्तिसंभवात्तदेवोपादानं बिंबोपाधिसन्निधिनिवृत्तिसचिवं चाधिष्ठानज्ञानं सोपादानस्य तस्य निवर्त्तकमि
ति अन्येतु ज्ञानस्य विक्षेपशक्त्यंशं विहायावरणशक्त्यंशमात्रनिवर्त्तकत्वं न स्वाभाविकं॥

32

स्यत इति भावः निवर्त्तकज्ञानं च निरूपयति बिंबेति बिंबोपाध्योः सन्निधिनिवृत्तिसहकृतं दर्पणे मुखं नास्तीति ज्ञा
नमेव प्रतिबिंबाध्यासस्य निवर्त्तकमित्यर्थः दर्पणाद्यवच्छिन्नचैतन्ये दर्पणाद्युपादानभूतं मूलाज्ञानमेकमस्ति दर्प
णादिज्ञाननिवर्त्यमवस्थारूपाज्ञानमप्यपरमस्ति तत्र मूलाज्ञानस्यैव दर्पणाद्युपादानत्ववत् प्रतिबिंबाध्यासोपाद
नत्वमपीति परिहारांतरमाह अन्येत्विति ननु पूर्वोक्तमतरीत्या शुक्तिरजतादेरिव प्रतिबिंबाध्यासस्याप्यवस्था
ज्ञानपरिणामत्वसंभवे किं मूलाज्ञानस्य तत्कल्पनयेति नेत्याह ज्ञानस्येत्यादिनेति

परिहारमाह तर्हीति मिथ्यैवास्त्विति बिंबप्रतिबिंबाभेदपक्षे प्रतिबिंबमिथ्यात्वानुभवः प्रतिबिंबत्वविशिष्टवेषेण प्रति
बिंबगोचरो न स्वरूपेणेति बोध्यं ननु तर्हि शुक्तिरजतमिथ्यात्वानुभवोऽपीदमर्थतादात्म्यापन्नतयैव रजतगोचरः न
स्वरूपेणेति वक्तुं शक्यतया रजतेदमर्थयोस्तादात्म्यमात्रं कल्पितं रजतं तु न कल्पितमिति प्रसज्येतेति चेन्न रजतस्य शु
क्त्यावच्छिन्नचैतन्यसंविदभिन्नत्वाभावेन प्रत्यक्षानुपपत्तेस्तस्य तदोत्पत्तिरपरिहार्या तदुत्पत्तौ चान्वयव्यतिरेकाभ्या
मनिर्वचनीयाज्ञानमेव कारणं नान्यदिति प्राक् प्रतिपादितत्वेन तस्य मिथ्यात्वोपपत्तेः पूर्वोक्तरीत्या बिंबप्रतिबिं
बाभेदसाधकप्रमाणसत्त्ववच्छुक्तिरजतसत्यत्वसाधकानन्यथासिद्धप्रमाणाभावेन शुक्तिरजतमिथ्यात्वानुभ
वस्य रजतस्वरूपगोचरत्वोपपत्तेश्च तस्य मिथ्यात्वमिति भावः तस्मादिति बिंबभिन्नस्य प्रतिबिंबस्य सत्यत्वे मा

तर्हि दर्पणस्थं मुखं नास्ति मिथ्यैवात्र दर्पणे मुखं भाति इत्यादि सर्वसिद्धबाधात् प्रतिबिंबमपि न सत्यमिति
प्रत्युक्तं तस्मादसंगतः प्रतिबिंबसत्यत्ववादः ननु तन्मिथ्यात्ववादोऽप्ययुक्तः शुक्तिरजतवत्कस्यचिदन्व
यव्यतिरेकशालिनः कारणस्याज्ञानस्य निवर्तकस्य ज्ञानस्य चानिरूपणात् अत्र केचित्॥

नाभावादिमर्थः नन्विति प्रतिबिंबाध्यासपक्षेऽपि हि तस्योपादानमज्ञानं वाच्यं न च तत्संभवति सर्वात्मना दर्पणादिरूपाधि
स्थानुगोचरस्याज्ञाताकारेण दर्पणाद्यवच्छिन्नचैतन्यनिष्ठाज्ञानस्यानिवृत्तत्वान्नाहमाभासाज्ञाताकारे सत्यपि वा तद्वर्तमानस्य प्र
तिबिंबाध्यासस्य तन्निवर्त्यत्वायोगात् तन्निवर्तकज्ञानान्तरानुपलंभाच्च ज्ञाननिवर्त्यत्वं विना तस्य मिथ्यात्वानुपपत्तेः त
स्मात् तन्मिथ्यात्वाभ्युपगमोऽसंगत इत्याद्येपाभिप्रायः यथा शुक्तिरजते शुक्त्यज्ञानस्य तत्कारणस्यान्वयव्यतिरेकसिद्ध
स्य पूर्वं निरूपणं कृतं तथा प्रतिबिंबाध्यासे दर्पणाद्यज्ञानेऽसति बिंबाध्यासः तदभावे तदभावः इत्यन्वयव्यतिरेकशा
लिनस्तत्कारणस्याज्ञानस्य कस्यचिदनिरूपणात् तन्निवर्तकज्ञानस्य चानिरूपणादित्यन्तरार्थः परिहरति अत्र के

सि-ले-
टि-
३३

अवगतिप्रकारमाह दर्पणइति प्रतिबिंबाध्यासमपह्नुत्य संसर्गितया प्रतिभासविशेषाध्यासोपगममाह दर्पणे चैत्रमुखं ना।
स्तीति अनेन प्रकारेण दर्पणे चैत्रमुखाभावे प्रत्यक्षतोवगम्यमान इत्यर्थः एवं मतभेदेनाधिष्ठानभेदे तत्साक्षात्काराका
रभेदयोः प्रदर्शनार्थमेव चैत्रमुखे दर्पणे च पूर्वापरक्रमेण सप्तमीनिर्देशः कृतः मतभेदज्ञापनार्थश्च वाकारः तत्कालमिति
अधिष्ठानभूतचैत्रमुखे दर्पणे च विक्षेपशक्त्या सहाज्ञाननिवर्तकसाक्षात्कारोत्पत्तेर्द्वितीयक्षण इत्यर्थः तयोरिति
चैत्रमुखदर्पणयोः संनिधाने सत्यधिष्ठानसाक्षात्कारतो विस्मृतिग्रस्य दर्पणे चैत्रमुखमिति यः प्रतिबिंबभ्रमो भ
वति तस्याभावप्रसंगादित्यत्र हेतुमाह उपादानभावेनेति तत्र हेतुमाह विक्षेपशक्त्यंशस्यापि निवृत्त्यवश्यंभावे

दर्पणे चैत्रमुखाभावे वा प्रत्यक्षतोवगम्यमाने विक्षेपशक्त्यंशस्यापि निवृत्त्यवश्यंभावेन तत्कालं तयोः स
न्निधाने सत्युपादानाभावेन प्रतिबिंबभ्रमाभावप्रसंगात्‌ अतो मूलाज्ञानमेव प्रतिबिंबाध्यासोपादानं न चा
त्राप्युक्तदोषतोऽसंजडविषयवृत्तिपरिणामानां स्वस्वविषयावच्छिन्नचैतन्यप्रदेशे मूलाज्ञानावरणशक्त्यं।
शाभिभावकत्वेपि तदीयविक्षेपशक्त्यंशानिव

नेति अतइति अवस्थाज्ञानस्य प्रतिबिंबाध्यासे कारणत्वायोगादित्यर्थः नन्वस्मिन्पक्षेपि बिंबोपाधिसन्निधानात्‌
पूर्वक्षणे सत्त्वे चैत्रमुखादिसाक्षात्कारेण चैत्रमुखाद्यवच्छिन्नचैतन्यावरकमूलाज्ञानस्यापि निवृत्तत्वादुपादानाज्ञा
नाभावदोषस्तुल्यः तेन तन्निवृत्तौ च चैत्रमुखाद्यनवभासप्रसंगः यत्किंचिदावरणस्य सत्त्वादित्याशंक्याह न चा
त्रापीति ब्रह्मज्ञानस्यैव मूलाज्ञाननिवर्तकत्वं जडविषयकवृत्तिरूपाणामंतःकरणपरिणामानां तु स्वस्ववि।
षयचैतन्यस्थमूलाज्ञानस्य योयमावरणांशः तदभिभावकत्वमात्रं यावद्विषयस्फुरणमंगीक्रियते तेन त्वव
स्थाज्ञानविक्षेपांशानिवर्तकत्ववन्मूलाज्ञानविक्षेपांशानिवर्तकत्वमपीत्यर्थः ॥

33

टी-
३३

ज्ञानस्यावरणमात्रनिवर्तकत्वे स्वाभाविकं किं वा विक्षेपपर्यन्तं शान्तिवृत्तिप्रतिबंधकसत्त्वप्रयुक्तं नाद्य इत्यत्र हेतुमाह
ब्रह्मज्ञानेनेति तस्येति द्विविधस्याप्यज्ञानस्य निवर्तकाभावेन विक्षेपशान्तिसहस्रं तस्य विदेहकैवल्यापत्तवृत्तिप्र
संगादित्यर्थः द्वितीयमनुवदति न चेति तदिति आवरणमात्रनिवर्तकत्वमित्यर्थः विक्षेपशान्तिमदज्ञानांश
निवृत्तिप्रतिबंधकप्रारब्धनाशे सति ब्रह्मज्ञानसंस्कारविशिष्टचैतन्यमात्रादेव विक्षेपांशनिवृत्तिसंभवा
न पूर्वोक्तदोषइतिमत्वा दोषमाह बिंबोपाधिसन्निधानात्स्यामिति बिंबोपाध्योरभिमुख्यलक्षणसन्निधाना
त्पूर्वलक्षण एवेत्यर्थः बिंबप्रतिबिंबाभेदपक्षे प्रतिबिंबोत्पन्नाभावेपि चैतन्यस्य सत्त्वे प्रतिबिंबभूतेर्बिंबत्वप्र

ब्रह्मज्ञाने मूलाज्ञानस्य नाशादिज्ञानेनावरणाज्ञानस्य चावरणांशमात्रनिवृत्तौ तस्य विक्षे
पपर्यन्तं सर्वदानुवृत्तिप्रसंगात् न च तर्हि बिंबोपाधिसंनिधिरूपविक्षेपशान्त्यंशनिवृत्तिप्रतिबंध
कप्रयुक्तं बिंबोपाधिसन्निधानात्यागे बिंबे चैतन्यस्य दर्पणसंसर्गाद्यभावे ॥

ति बिंबत्वदर्पणस्थत्वादेरनिर्वचनीयस्योत्पत्तेरयोगेन तस्य चैतन्यस्यावबद्धिन्नचैतन्यनिष्ठावस्थाज्ञान
मेव कारणं वाच्यं तच्च चैतन्यस्य दर्पणाभिमुख्यात् प्राक् बिंबभूमिचरणनिरोधमाणे सति तदा प्रतिबं
धकाभावाच्चैतन्यस्य गोचरेण बिंबभूमिद्वीपसाक्षात्कारेण विक्षेपशान्त्या सह निवर्तते उत्तरक्षण एव चैतन्य
स्य दर्पणाभिमुख्ये सति बिंबभूमिवत्स्य दर्पणे चैतन्यस्यमिति प्रतिबिंबभ्रमो भवति तत्र चैतन्यस्य दर्पण
स्थत्वादेरुत्पत्तिर्नेष्यानुपादानाभावादित्याह बिंबइति दर्पणसंसर्गो दर्पणस्थत्वमादिपदं प्रत्यङ्मुखत्वा
दिसंग्रहार्थं तथा च संसर्गाद्यभावे प्रत्यक्षतो वगम्यमानशतिसंबंधः चैतन्यस्य दर्पणस्थत्वादिकं नास्तीत्यवगतिप्र

सि. ले
धि
38

ननु प्रतिबिंबाध्यासस्यावस्थाज्ञानोपादानकत्वपक्षे बिंबोपाधिसन्निधिनिवृत्तिसहकृताधिष्ठानज्ञानस्य तदुपा
दानाज्ञाननिवर्तकत्वं लभ्यते तथा च ज्ञानमज्ञानस्यैव निवर्तकमज्ञानकार्यस्य तु उपादानाज्ञाननिवृत्त्या निवृ ।
त्तिरिति पंचपादिकाकारोक्तं संगच्छते तदुपपाशंक्याह अवस्थाज्ञानेति तस्येति अवस्थाज्ञानस्येत्यर्थः प्राची
नेति प्रतिबिंबाध्यासात् प्राचीनेनाधिष्ठानज्ञानेन दर्पणे मुखं नास्तीत्याद्याकारेण निवर्तिता आवरणशक्ति
र्यस्यावस्थाज्ञानस्य तत्तथा तस्येत्यर्थः अज्ञानविषयत्वमज्ञानावृतत्वमावरणनाशे च दर्पणस्य व्यवच्छिन्नं चै

34

अवस्थाज्ञानोपादानत्वपक्षेपि तस्य प्राचीनाधिष्ठानज्ञाननिवर्तितावरणशक्तिकस्य समानविष
यत्वभंगेन प्रतिबंधकाभावकालीनाधिष्ठानज्ञानेन निवर्त्यत्वमशक्यतया प्रतिबिंबाध्यास
मात्रस्यैव तन्निवर्त्यत्वस्योपेयत्वात्

तस्यास्यावस्थाज्ञानविषयत्वाभावादधिष्ठानज्ञानस्यावस्थाज्ञानसमानविषयकत्वं विरोधे प्रयोजकं
भग्नमित्यर्थः प्रतिबंधकपदं बिंबोपाध्योः सन्निधिपरं तस्य निवर्त्यपि तु मशक्यतयेति संबंधः
तन्निवर्त्येति तस्मादमधिष्ठानज्ञानपरं अवस्थाज्ञानोपादानत्वपक्षेपि प्रतिबिंबाध्यासमात्रस्यै
व तन्निवर्त्यत्वस्योपेयत्वादिति संबंधः तथा च पंचपादिकाविरोधः प्रतिबिंबाध्यासस्यावस्था
ज्ञानोपादानकत्वपक्षेपि तुल्य इति भावः

उ.
३५

अन्यथेति विषयचैतन्यस्य मूलाज्ञानस्य विषयज्ञानेन निवृत्तौ दर्पणादीनां व्यावहारिकाणां विक्षेपशक्तिकार्याणाम्
शशृंगः उपादाननाशादित्यर्थः प्रातिभासिकविक्षेपाणामिवेत्यपि शब्दार्थः ननु मूलाज्ञानकार्यस्य दर्पणादेर्व्या
वहारिकत्वदर्शनात्प्रतिबिंबाध्यासस्यापि तत्कार्यत्वेन तदापत्तिरित्याशंक्य निराकरोति नचेत्यादिना मूलाज्ञानका
र्यत्वं व्यावहारिकत्वप्रयोजकं न भवति अनाद्यविद्यादौ तदभावेपि व्यावहारिकत्वसत्वात् किंत्वन्यदेव तत्प्रयो
जकमित्याह अविद्यातिरिक्तेति अनाद्यविद्यादावविद्यादौ तदभावेपि तदतिरिक्तदोषाजन्यत्वसत्वात्तज्ज्ञाप्यमिति
तिभावः प्रतिबिंबाध्यासस्य मूलाज्ञानकार्यस्यापि न व्यावहारिकत्वं तत्प्रयोजकाभावादित्याह प्रकृतेचेति प्रति

अन्यथा तत्त्वदेशस्थितव्यावहारिकविक्षेपाणामपि विलयापत्तेः नच प्रतिबिंबस्य मूलाज्ञानकार्यत्वे व्या
वहारिकत्वापत्तिः अविद्यातिरिक्तदोषाजन्यत्वस्य व्यावहारिकत्वे प्रयोजकत्वात् प्रकृते च तदतिरिक्त
बिंबोपाधिसन्निधिदोषसद्भावेन प्रातिभासिकत्वोपपत्तेः नचैवं सति बिंबोपाधिसन्निधिनिवृत्तिसहकृ
तस्याप्यधिष्ठानज्ञानस्य प्रतिबिंबाध्यासाऽनिवर्तकत्वप्रसंगात्तन्मूलाज्ञाननिवर्तकत्वाभावादिति वाच्यं

बिंबाध्यासत्वर्थः नचैवंसतीति प्रतिबिंबाध्यासस्य मूलाज्ञानकार्यत्वे सतीत्यर्थः तन्मूलेति शुक्तिरजतादि।
मूलाविद्यानिवर्तकशुक्त्यादिसाक्षात्कारस्यैव रजताद्यध्यासनिवर्तकत्वदर्शनादिति भावः विरोधाभावादिति
मूलाज्ञानं ब्रह्मविषयकं प्रतिबिंबाध्यासाधिष्ठानभूतदर्पणावच्छिन्नज्ञानं तु दर्पणावच्छिन्नचैतन्यविषयमिति तयोः स
मानविषयकत्वस्य विरोधप्रयोजकस्याभावेन विरोधाभावादधिष्ठानयाथात्म्यज्ञानस्य ब्रह्माज्ञानानिवर्तकत्वेपी
त्यर्थः तत्पदं ब्रह्माज्ञानपरं विरोधिविषयत्वेपीति दर्पणे मुखं नास्तीत्यादिरूपस्याधिष्ठानयाथात्म्यज्ञानस्य प्रतिबिं

विरोधाभावात् ब्रह्माज्ञानानिवर्तकत्वेपि तदुपादानप्रतिबिंबाध्यासविरोधिविषयकतयाधिष्ठानयाथात्म्यज्ञानस्य प्रतिबंध
कविरहसचिवस्य तन्निवर्तकत्वोपपत्तेः मूल २

सि॰ ले॰
द्वि॰
३४

स्यापन्निरूपनाशो सत्यपि बाधरूपा निवृत्तिर्ब्रह्मज्ञानैकसाध्येति बोध्यं अविद्यातिरिक्तदोषजन्यत्वं प्रातिभासिक
त्वप्रयोजकमिति मतेन स्वप्नाध्यासस्य निद्रादोषजन्यस्य प्रातिभासिकत्वमुपपादितं व्यवहारकाले बाध्यमानत्वं
प्रातिभासिकत्वप्रयोजकमिति मतेन तस्य तदुपपादयति अन्येत्विति भाष्यगतं प्रबोधपदं स्वप्नप्रपंचबंधस्या
विद्याकार्यत्वादविद्यात्मकत्वं प्रत्यनीकत्वं निवर्तकत्वं पंचम्यनंतरं ब्रह्मज्ञानस्येति शेषः यथा जाग्रत्कालीनो
घटादिबोधः स्वप्नबंधनिवर्तकस्तद्वदित्यर्थः उत्थितस्येति मिथ्यैव मया स्वप्ने महाजनसमागमो दृष्टः न
ह्यस्ति महाजनसमागम इत्युत्थितस्य मिथ्यात्वानुभवादित्यर्थः यदि स्वप्नप्रपंचस्य ब्रह्मज्ञानबाध्यत्वमप्युक्तं मि

३५

अन्ये तु बाध्यंते चैते रथादयः स्वप्नदृष्टाः प्रबोधे इति भाष्योक्तेरविद्यात्मकबंधप्रत्यनीक
त्वाज्जाग्रद्बोधवदिति विवरणदर्शनादुत्थितस्य स्वप्नमिथ्यात्वानुभवाच्च जाग्रद्बोधः
स्वप्नाध्यासनिवर्तक इति ब्रह्मज्ञानेतरज्ञानबाध्यत्वमेव तस्य प्रातिभासिकत्वं न चाधि
ष्ठानयाथात्म्यागोचरं स्वोपादानाज्ञानानिवर्तकं ज्ञानं कथमध्यासनिवर्तकं स्यादिति वाच्यं

थ्यात्वं तदा स्वप्नादुत्थितस्य तत्त्वमिथ्यात्वानुभवो न स्यात् ब्रह्मज्ञानात्पूर्वं तद्बाध्ये घटादौ मिथ्यात्वानुभवादर्शनात् अ
तो ब्रह्मज्ञानादितरेण जाग्रद्बोधेनैव बाधः स्वप्नप्रपंचस्यैवेत्याद्युक्तिः शुक्तिरजतादिवद्व्यवहारकालीनबाध
वत्त्वादेव तस्य प्रातिभासिकत्वं व्यवहारकालश्च ब्रह्मतत्त्वज्ञानात्पूर्वकाल इति भावः ज्ञानमिति ब्रह्मज्ञानेतरज्ञा
नमित्यर्थः तस्य स्वप्नाध्यासनिवर्तकत्वाभावे हेतुं सूचयति स्वेति स्वस्य स्वप्नाध्यासस्योपादानं मूलाज्ञानं तद
निवर्तकमित्यर्थः तदनिवर्तकत्वे हेतुं सूचयति अधिष्ठानेति स्वप्नाधिष्ठानस्य पूर्वोक्तस्य याथात्म्यमनव
च्छिन्नब्रह्मचैतन्यादि तदविषयकमित्यर्थः अधिष्ठानयाथात्म्यज्ञानस्यैवाज्ञाननिवृत्तिद्वारा अध्यासनिवर्तक

ॐ
३४

तद्विवरणं प्रकारमाह अथवेति स्वप्नदर्शनप्रतिबिंबाध्यासपरं निवर्त्यएवेति बिंबोपाध्योः सन्निधिविरामकाले प्रति
बिंबाध्यासस्य सत्त्वावस्थालक्षणनाशोसमपि बाधरूपा निवर्त्तिलक्षणा नास्ति स्मात् ब्रह्मज्ञानाधीनेवतदुपादानमूला
ज्ञाननिवर्त्तकत्वादिति भावः ननु ब्रह्मज्ञानबाध्यस्य च शुक्तिरजतादेरिवतदध्यासस्यापि व्यावहारिकत्वापत्तिरितिनेत्याह
व्यावहारिकत्वापत्तिस्त्विति तत्शब्दोवधारणे प्रसक्तेनैवेति संबंधः बिंबोपाधिसन्निधिः दोषः उक्तोन्यायमन्यत्राप्य
तिदिशति एवमिति एवं स्वप्नाध्यासस्यापि मूलाज्ञानकार्यत्वपाप्तविद्यातिरिक्तदोषजन्यत्वेनैव प्रातिभासिक
त्वमिति संबंधः ननु अवस्थाज्ञानकार्यत्वप्राप्ति प्रातिभासिकत्वमित्येवकारार्थः अवस्थाज्ञानस्य स्वप्नोपादानत्वाभावे
हेतुमाह अवस्थारूपाज्ञानशून्येध्यासादिति मतभेदेन स्वप्नाध्यासाधिष्ठानभेदमाह अनवच्छिन्नेति अहंका

अथवा स्वोपादानाज्ञाननिवर्त्तकब्रह्मज्ञाननिवर्त्य एवायमध्यासोस्तु व्यावहारिकत्वापत्तिस्त्ववि।
द्यातिरिक्तदोषजन्यत्वेन प्रसक्तैवाप्रसक्तेः एवं स्वप्नाध्यासस्याप्यनवच्छिन्नचैतन्येहंकारोपहितचैतन्ये वा
ऽवस्थारूपाज्ञानशून्येध्यासात् स्वप्नप्रपञ्चस्यापि तमोज्ञानं यन्मूलं जीवस्वप्नबोधपर्यंतरिता चार्याणां स्वप्नजाग्रत्प्र
पंचयोरेकाज्ञानकार्यत्वोक्तेश्च मूलाज्ञानकार्यत्वपक्षे स्वोपादाननिवर्त्तकब्रह्मज्ञानैकबाध्यस्याविद्या
तिरिक्तनिद्रादिदोषजन्यत्वेनैव प्रातिभासिकत्वमिति के

ऽवच्छिन्नब्रह्मचैतन्यस्य मूलाज्ञानमात्रा
अध्यातादवस्थाज्ञानशून्यत्वमहंकारोपहितस्य साक्षिचैतन्यस्य हातो यधिष्ठानस्यावरणानंगीकारादवस्थाज्ञा
नशून्यत्वमिति भावः अत्राज्ञानकार्यस्य स्वप्नाध्यासस्यावस्थाज्ञानशून्यचैतन्ये अध्यासोक्त्यार्थान्मूलाज्ञानकार्य
त्वमुक्तं तत्र हेत्वंतरमाह स्वप्नप्रपंचस्यापीति स्वप्नेपदाज्ञानावस्थारूपत्वविवक्षया तु स्वप्नप्रपंचस्यापि तमज्ञानस्योक्तं
बीजमुपादानं बोधोजाग्रत्स्वप्नप्रपंचः तस्य शुक्तिरजतादिव्यतिरिक्तस्य मूलाज्ञानकार्यत्वं संप्रतिपन्नमिति भावः
आचार्याणामुक्तेश्चेति संबंधः स्वप्नदर्शनाध्यासपरं ब्रह्मज्ञानैकेति प्रबोधकाले स्वप्नप्रपंचस्य सत्त्वाद

सि॰ ले॰
द्वि॰
३६

ज्ञाया एव भेदरूपत्वसिद्धेरिति संबंधः जाग्रत्काले ब्राह्मणत्वादिरूपमत्ते संशयविपर्ययोरभावमाह असंदिग्धेति
असंदिग्धापर्यस्तं यथा भवति तथा अभिमन्यमानस्येति संदेहविपर्यासभिन्नत्वमभिमानक्रियाविशेषणं स्वपिताम
हात्मपादेनाग्रस्तप्रपंचवृत्तांतस्य तं देवदत्तपुत्रं प्रति सर्वदानानुवृत्तत्वेनैकरूपतयावस्थाने हेतुमाह तदीयेति देव
दत्तपुत्रोहि स्वपितामहादिमरणं प्रथममनुभूय पश्चात्प्रतिमासं प्रतिसंवत्सरं च श्राद्धतर्पणादिकं करोतीति तस्य
तन्मरणादिगोचरानुभवस्मरणाभ्यासः चिरपरिपक्वेन स्वपितामहात्मपादेः संशयादिनिवृत्तिभावत्वलक्षणम्

36

चद्दृष्टो व्यावहारिकजीवस्य मनुष्योहं ब्राह्मणोहं देवदत्तपुत्रोहमित्यादिना स्वात्मानमसंदिग्धाविपर्य
स्तमभिमन्यमानस्य तदीयचिरपरिचयेन तं प्रतिसर्वदानुवृत्तैकरूपस्य स्वपितामहात्मपादिनाग्रस्तप्रपंचवृत्तां
तस्य च स्वप्नकाले केनचिदावरणाभावे जाग्रत्दशायामिव स्वस्नेपि ब्राह्मणोहं शूद्रोहं यज्ञदत्तपुत्रोहमित्या
दिभ्रमस्य स्वपितामहजीवदशादिभ्रमस्य चाभावप्रसंगेन निद्राया एव तत्कालीनव्यावहारिकजगज्जी
वावरकाज्ञानावस्थाभेदरूपत्वसिद्धेः न चैवं जीवस्याप्यावृत्तत्वात् स्वप्नप्रपंचद्रष्टृत्वाभावप्रसंगः॥

उ॰
३६

नावृतत्वं सदा एकरूपेणावर्तनं तदर्थः जागरणे यथा देवदत्तपुत्रस्य ब्राह्मणादिभ्रमाभावः स्वपितामहजीवदशानु
भवाभावश्च तथा स्वप्नेप्यभावप्रसंगेनेत्यर्थः तत्कालेति निद्राकाले तत्सन्निष्ठो व्यावहारिकजगज्जीवयोरावरकोज्ञा
नावस्थाभेदः तद्रूपत्वं निद्राया एव सिध्यति तेनान्यस्यावरणविक्षेपशक्तिमत्त्वेन तस्या उपस्थितत्वादित्यर्थात्तुप
स्थितत्वादित्यर्थः न चैवमिति निद्राया व्यावहारिकजीवाद्यावरकाज्ञानावस्थाविशेषरूपत्वसिद्धौ स्वप्नाभि

ॐ

रज्जुनियमाभिप्रायात् रूपयति रज्जुसर्पेति स्वपदं सर्पाध्यासपरं ज्ञानेनैवेति नायं सर्पः रज्जुरेषेति ज्ञानेनैवेत्यर्थः तत्रैवेति
सर्पाध्यासाधिष्ठानरज्ज्वावेवेत्यर्थः सतिसर्पभ्रमानंतरोत्पन्नेन नायं सर्पः दंडोयमिति भ्रमेणेत्यर्थः निवृत्तिदर्शनादि
तिबाधदर्शनादित्यर्थः अधिष्ठानयाथात्म्यज्ञानस्यैवाध्यासनिवर्तकत्वनियमेपि प्रकृतेनानुपपत्तिरिति मत्वा तद
नुगुणंमतांतरमाह अपरेत्विति अस्मिन्मते व्यावहारिकजीवः स्वप्नप्रपंचद्रष्टुः प्रातिभासिकजीवस्याधिष्ठानं
स्वप्नप्रपंचस्य चएवाधिष्ठानेनतनवच्छिन्नचैतन्यादिकं द्विविधाधिष्ठानावरणद्वारा चनिद्रारूपमवस्थाज्ञानंद
पूद्वयात्मकद्विविधस्वप्नप्रपंचोपादानं ननतमूलाज्ञानं तस्य ब्रह्मचैतन्यमात्रावारकत्वेन व्यावहारिकजीवाद्या

रज्जुसर्पाध्यासस्योपादानअज्ञाननिवर्तकाधिष्ठानयाथात्म्यज्ञानेनैवतत्रैवस्वानंतरोत्पन्नदंडभ्रमे
णापिनिवृत्तिदर्शनादित्याकूः अपरेत्तुजाग्रद्भोगप्रदकर्मोपरमेजाग्रत्प्रपंचद्रष्टारं प्रतिविवरूपंव्या
वहारिकंजीवंतद्दृष्टंजाग्रत्प्रपंचमप्याहृत्यजायमानोनिद्रारूपोमूलाज्ञानस्यावस्थाभेदः स्वाप्नप्रपंचाध्या
सस्योपादानंनमूलाज्ञानं नचनिद्राख्यायाअवस्थाःज्ञानरूपत्वेमानाभावः मूलाज्ञानेनानावृतस्यजाग्रत्प्रप
वरकत्वाभावात् ततश्चव्यावहारिकजीवजाग्रद्भोचरस्यप्रबोधस्याधिष्ठानयाथात्म्यज्ञानरूपत्वात्तेनस्वप्नाध्यासबाधः
संभवतीतितात्पर्यार्थः कर्मोपरमेसतिजायमानइतिसंबंधः आहृत्येत्यनेनउपादानमित्यनेनचनिद्राख्यायाआवर
णविक्षेपशक्तिमत्वरूपमज्ञानलक्षणमुक्तमेव मज्ञानत्वेतस्याः सिद्धेसत्यमपि इति मत्वा तत्तदवस्थारूपत्वंसिध्यति अ
स्मिन्मतेसर्वेषामेववस्थाज्ञानानामादिमत्तस्यप्रथमपरिच्छेदेउक्तत्वादितिभावः संग्रहणेक्तमर्थमाशंकापूर्व
कंप्रपंचयति नचनिद्राख्यायाइत्यादिना मूलाज्ञानेनानावृतस्यव्यावहारिकजीवस्यजाग्रत्प्रपंचवृत्तांतस्यचस्वप्न।
कालेकेनचिदावरणाभावेयत्सदत्तपुत्रोहमित्यादिभ्रमस्यस्वपितामहजीवदशानुभवस्यचाभावप्रसंगेननि

सि॰ ले॰
टि॰
३२

शास्यत्वं वक्तव्यं तथा च तस्य किं साक्षिभास्यत्वमैंद्रियकत्वं वानाद्यदूरस्याह अहंकारेति साक्षिणा इति पंचमी विच्छेदो न तु साक्षिणः
स्वप्नगजादिना सह स्वतः संसर्गाभावो दर्शितः अंतःकरणवृत्तिसंसर्गमनपेक्ष्य स्वाप्नगजादेस्तेन प्रकाशस्य तत्संसर्गमपेक्ष्यते
न प्रकाशस्य चायोगादिति संबंधः तेनेति पदद्वयं साक्षिपरं यथा सावादेः सावादिगोचरांतःकरणवृत्तिसंसर्गमनपेक्ष्य तेन
प्रकाशः तथा तेन स्वाप्नगजादेः प्रकाशायोगादित्यर्थः द्वितीयं निरस्यति चक्षुरादीनामिति द्वितीय इति अहमनुभवगोचरा।
हंकारोपहितचैतन्यस्य स्वप्नाध्यासाधिष्ठानत्वपक्षेऽयमर्थः किं गजादेस्तादात्म्येन तत्राध्यासः किं वा आधाराधेयभावल
क्षणसंसर्गेण आद्यं दूषयति इदं रजतमितिवदिति द्वितीयं निराकरोति अहं सावेति द्वितीये अहं गजः अहं गजवानिति

आद्ये स्वाप्नगजादेरहंकारोपहितसाक्षिणो विच्छिन्नदेशत्वेन सावादिवदंतःकरणवृत्तिसंसर्गमनपेक्ष्य तेन प्रकाश
नस्य चक्षुरादीनामुपरततया तद्वृत्त्यसंभवेन तत्संसर्गमपेक्ष्य तेन प्रकाशस्य चायोगात् द्वितीये इदं रजतमिति
वदहं गज इति वा अहं सुखीति वदहं गजवानिति वाध्यासप्रसंगात् अत्र केचिदाद्यपक्षं समर्थयंते अहंकारा
नवच्छिन्नं चैतन्यं न देहाद्बहिः स्वाप्नप्रपंचस्याधिष्ठानमुपपन्नं किंतु तदंतरेव अत एव हस्तप्रमाणपरिमाणो
चितदेशसंपन्नभावात् स्वाप्नगजादीनां मायामयत्वमुच्यते

वाध्यासप्रसंगादिति योजना अहंकारानवच्छिन्नेति अविद्यायां बिंबभूतमीश्वरचैतन्यमिहानवच्छिन्नचैतन्यं विवक्षि
तमीश्वरचैतन्यस्यैव सर्वाधिष्ठानत्वान्नाविद्याप्रतिबिंबरूपं जीवचैतन्यं विवक्षितमीश्वरचैतन्यस्यैव सर्वाधिष्ठानत्वान्ना।
विद्याप्रतिबिंबरूपं जीवचैतन्यं तस्यानुपादानत्वादिति बाध्यं आंतरचैतन्यस्यैवाधिष्ठाननियामकमाह अत एवेति
आंतरचैतन्यस्यैवाधिष्ठानत्वोपगमादेवेत्यर्थः स्वप्नकाले हस्तप्रमाणपरिमाणवतां गजादीनां शरीरस्यांतः कुचितदेश
संपन्नभावात् प्रातिभासिकत्वमुच्यते सूत्रकारादिभिः शरीराद्बहिस्थचैतन्यस्याधिष्ठानत्वे तु जाग्रद्गजादीनामिव
स्वाप्नगजादीनामपि योग्यदेशलाभाद्व्यावहारिकत्वमेव स्यात् तथा च सूत्रादिविरोध इत्यर्थः ॥

37

उ॰
३२

प्रातिभासिकांतःकरणोपहितचित्प्रतिबिंबरूपस्य जीवांतरस्याप्युपगमान्नैतच्चोद्यावकाश इत्याशयेनाह स्वप्नप्रपंचेन सहेति
एवं चेति व्यावहारिकजीवगतानोरेव स्वाप्नजीवजगदधिष्ठानत्वमिति प्रसक्तोऽर्थः कर्मोद्भूतबोधइति कर्मजन्ये जागरणादु
त्यर्थः जीवस्वरूपज्ञानादिति मनुष्योऽहं ब्राह्मणोऽहं देवदत्तपुत्रोऽहमित्यादिरूपादित्यर्थः उपलक्षणं चैतत् स्वपितामहाप
पादिज्ञानानां तेनापि द्रष्टृत्वं स्वपदं स्वप्नप्रपंच परं न चैवमिति एवं शब्दार्थमेवाह तद्द्रष्टेति तस्य स्वप्नप्रपंचस्य द्रष्टुः व्या
घ्रोऽहं शूद्रोऽहमित्यादिरूपेण स्वात्मानमभिमन्यमानस्येत्यर्थः तत्त्वज्ञानिव्यावहारिकजीवस्वरूपज्ञानादित्यर्थः तस्या
दिति अन्यानुभूतेर्थेऽन्यस्य स्मरणायोगादिति भावः अप्रस्तयेति तथा च व्यावहारिकप्रातिभासिकजीवयोरपि

स्वाप्नप्रपंचेन सह द्रष्टृजीवस्यापि प्रातिभासिकाध्यासात् एवं च पुनर्जागृत्यहोगप्रदकर्मोद्भूतबोधे व्यावहारि
कजीवस्वरूपज्ञानात् स्वोपादाननिद्रारूपाज्ञाननिवर्तकात् द्वैतस्वाप्नप्रपंचबाधः न चैवं तत्र द्रष्टुः प्रातिभा
सिकजीवस्यापि तत्त्वबोधे स्वप्नेककालमनुभूतमित्यनुसंधानं न स्यादिति वाच्यं व्यावहारिकजीवे प्राति
भासिकजीवस्याध्यस्ततया तदनुभवाद्व्यावहारिकजीवस्यानुसंधानोपगमेऽप्यतिप्रसंगाभावादिति नन्व
नवच्छिन्नचैतन्येऽहंकारावच्छिन्नचैतन्ये वा स्वाप्नप्रपंचाध्यासः इति प्रागुक्तं पक्षद्वयमप्ययुक्तं

ष्ठानारोप्ययोः तादात्म्यसत्त्वात् प्रातिभासिकजीवकर्तृकानुभवाद्व्यावहारिकजीवस्य स्वप्नपदार्थानुसंधानं संभ
वतीत्यर्थः अतिप्रसंगेति परदृष्टानुभूतार्थे विस्मृतिरस्याप्यनुसंधानप्रसंगरूपातिप्रसंगाभावादित्यर्थः तयोस्ता
दात्म्याभावादिति भावः न तु जीवचैतन्यपक्षे द्रष्टृरूपात्मकस्वप्नाध्यासाधिष्ठानत्वेनोपगतस्य व्यावहारिकजीवा
देर्मिथ्यात्वेन जडत्वात् स्वप्नप्रपंचावभासकत्वेन संभवति न च चैतन्यमेव तदवभासकमिति वाच्यं तथा सति त
स्यैवाधिष्ठानतया तस्य तात्स्वरूपत्वसंभवे जडस्याधिष्ठानत्वाभ्युपगमप्रयोगात् तर्हि तदेवाधिष्ठानमस्त्विति चे
न्न तत्राप्यनुपपत्तिसत्त्वादित्याह नन्वित्यादिना अनवच्छिन्नचैतन्यस्याधिष्ठानत्वपक्षे स्वाप्नगजादेर्देहान्तर्वास्य दे

अथाहम्मूलकेति शुद्धब्रह्मणस्सर्वज्ञस्य चैतन्यस्यापि यत्तस्यैकगम्यत्वादिति भावः अनवच्छिन्नेत्यविद्याप्रतिबिम्बरूपजीवचैतन्येषा
पूर्ननिरपेक्षाह माकारस्फुरदुपदर्शनात् ब्रह्मचैतन्येऽपि तथा किं न स्यादिति नेत्याह अहंकाराद्यवच्छिन्नचैतन्य इति इदं विषय
सप्तमी आदिपदं शरीरादिसंग्रहार्थं न त्वहंकाराद्यनवच्छिन्नजीवचैतन्य इत्येवकारार्थः जीवचैतन्यापि व्यापकत्वं पदार्थशोध
कश्रुतितदनुकूलन्यायगम्यमेवेति दृष्टान्तासिद्धिरिति भावः तस्मादिति बिम्बभूतानवच्छिन्नब्रह्मचैतन्यस्याधिष्ठानत्वासं
भवादित्यर्थः स्वत इति वृत्तिमन्तरेणैवाभिव्यक्तमित्यर्थः चैतन्यमिति पूर्वमतउक्तं अंतरमेवेति शेषः अत एवेति स्व
तोऽपरोक्षचैतन्यस्यैव स्वप्नाध्यासाधिष्ठानत्वेन स्वीकारादेवेत्यर्थः अपरोक्षरूपाविषयस्य शुक्तिरजतादेर्या भ्रमरूपाधीः
साऽपरोक्षाधिष्ठानमपेक्षा भवति यथा अपरोक्षरूपस्य विषयस्य शुक्तिरजतादेर्या भ्रमरूपाधीः सेत्यर्थः तत्राधिष्ठा

अथाहम्मूलकावच्छिन्नचैतन्यगोचरस्फुरदुपासंभवात् अहंकाराद्यवच्छिन्न एवाहमाकारस्फुरदुपदर्शनात्
तस्मात्स्वतोऽपरोक्षमहंकाराद्यनवच्छिन्नचैतन्यं तदधिष्ठानं अत एव संक्षेपशारीरके अपरोक्षरूपवि
षयभ्रमधीरपरोक्षमास्पदमपेक्ष्य भवेत् मनसा स्वतोऽनयनतो यदि वा स्वप्नभ्रमादिषु तथाप्रमितेः

नापरोक्ष्यं के न भवतीत्यत आह मनसेत्यादिना मनसा स्वतो वा यदि वा नयनत इति योजना अत्र प्रमाणमाह स्वप्नभ्रमा
दिषु तथाप्रमितेरिति अन्वयादिना तथा प्रतीतेरित्यर्थः तथा हि शुक्तीदंमंशस्य नयनसंनिकर्षे सति तत्र रजताध्यासापत्तितमापरो
क्ष्यं भवति नान्यथेत्यन्वयव्यतिरेकाभ्यां क्वचिदधिष्ठानापरोक्ष्यं नयनत इति प्रथितेः तथा गगननैल्याद्यध्यासापेक्षितं गगनाव
च्छिन्नचैतन्यरूपस्याधिष्ठानापरोक्ष्यं मनसा संभवतीति गम्यते मनसेत्यनेन गगनावच्छिन्नचैतन्यव्यंजिकाआलोकादिगोचरचा
क्षुषवृत्तिर्विवक्षिता नीरूपगगनगोचरचाक्षुषवृत्तेरसंभवाच्च चक्षुरुन्मीलनानंतरमेव नीलं नभ इत्यादिप्रत्यक्षेनान्यथेत्यन्व
यव्यतिरेकाभ्यां गगनचैतन्याभिव्यक्तौ चाक्षुषवृत्तेरुपयोगावगमाच्च तथा च फलबलादन्याकारवृत्त्याप्यन्यावच्छिन्नचै
तन्याभिव्यक्तिरिष्यत इदं चाद्वैतदीपिकादौ प्रपंचितमिति बोध्यं ॥

38

एवं चेति अंतरस्यैव चैतन्यस्य स्वप्नाध्यासाधिष्ठानत्वे प्रमाणं सिद्धं सतीत्यर्थः ननु शरीरांतर्गतस्यापि ब्रह्मचैतन्यस्यावृतत्वात् त
दाध्यस्तानां स्वाप्नगजादीनामनवभासप्रसंगः न चांतःकरणवृत्त्यावरणनाशे सति तेषामवभासः संभवतीति वाच्यं स्वप्ने च
क्षुरादीनामुपरतत्वेन वृत्त्यसंभवात् न च स्वप्नमेवांतःकरणवृत्तिस्तदा संभवतीति वाच्यं जागरणेपि तथाप्रसंगेन तदापि चक्षु
राद्यपेक्षाभावप्रसंगादित्यत आह अंतःकरणस्येति स्वप्नमेवेति चक्षुरादिकमनपेक्ष्यैवेत्यर्थः न कांचिदिति अभिव्यक्त
चैतन्यस्यैवाधिष्ठानत्वोपगमेन स्वप्नप्रपंचस्यावभासानुपपत्तिर्वा प्रातिभासिकत्वानुपपत्तिर्वा नास्तीत्यर्थः अंतःकरणवृत्त्यभि
व्यक्तचैतन्यस्याधिष्ठानत्वे संमतिमाह अत एवेति अंतःकरणवृत्त्यभिव्यक्तचैतन्यस्यैवाधिष्ठानत्वोपगमादित्यर्थः विवर्त्त

एवं चांतःकरणस्य देहाद्बहिरसत्वात् जागरणे वा स्वप्ने वा दृश्यमानं नीलं घटादिगोचरवृत्त्यनुत्पादाच्चक्षुराद्यपेक्षाया
मपि देहांतरं तत्करणस्य स्वतंत्रस्य स्वप्नमेव वृत्तिसंभवाद्देहांतरं तत्करणवृत्त्यभिव्यक्तस्यानवच्छिन्नचैतन्यस्या
धिष्ठानत्वेन काचिदनुपपत्तिः अत एव यथा जागरणे ऽप्यंगजन्यवृत्त्यभिव्यक्तिशुक्तीदमंशावच्छिन्नचै
तन्यस्थिताविद्या रूप्याकारेण विवर्तते तथा स्वप्नेपि देहस्यांतरंतःकरणवृत्तौ निद्रादिदोषोपेतायामभिव्य
क्तचैतन्यस्थाऽविद्या दृष्टादृष्टोपस्थितनानाविषयसंस्कारसहिता प्रपंचाकारेण विवर्त्ततामिति विवर
णोपन्यासे भारतीतीर्थवचनमिति अन्ये त्ववच्छिन्नचैतन्यं न वृत्त्यभिव्यक्तं सत्स्वाप्नप्रपंचस्याधिष्ठानं
तत्परिणामत इत्यर्थः ननु अंतःकरणे चक्षुरादिनिरपेक्षतया वृत्तेः सदा संभवात् तदभिव्यक्तचैतन्ये सदा सुलभे सदा स्व
प्नाध्यासप्रसंग इत्यत आह निद्रादीति पित्तादिदोषाद्यादिपदार्थः दोषोपस्थितायां वृत्तावभिव्यक्तं यच्चैतन्यं तत्राविद्यमा
वियत्यर्थः स्वप्नप्रपंचवैचित्र्यप्रयोजकमाह नानाविषयेति जागरणे नानाविधविषयानुभवजनिताः संस्काराः
अंतःकरणेति संस्थिता तैः दृष्टादृष्टोपस्थितैः सहिताविद्या विचित्रप्रपंचाकारेण परिणमत इत्यर्थः इदानीमविद्याप्र
तिबिंबभूतमनवच्छिन्नजीवचैतन्यमेवाधिष्ठानमिति मतांतरमाह अन्ये त्विति पूर्वमते अनुपपत्तिमाह अवच्छि

तदन्यमिति विवर्त्तभूतमिति पाठः

एवं चेति स्वतोपरोक्षजीवचैतन्यस्याधिष्ठानत्वे सतीत्यर्थः तत्रैव निपततीति यद्वा गजादिरध्यस्यते तदेवाधिष्ठानगो
चरान्तःकरणवृत्तिरविद्यावृत्तिर्वा जायते तयाऽवच्छिन्नगजाद्यधिष्ठानचैतन्यस्य वृत्तिद्वारा वृत्तिमदन्तःकरणसंबंधे
न प्रमातृत्वप्राप्तौ सत्यां प्रमातृफलद्रष्टृत्वं संभवतीत्यर्थः अभेदाभिव्यक्तेरिति उक्तप्रकारेण प्रमातृविषयचैतन्ययोरभे
दाभिव्यक्तेरित्यर्थः द्वितीयमिति अवच्छिन्नचैतन्यस्वाज्ञाध्यासाधिष्ठानमिति अयं गज इति भ्रमस्य स्थाने अहं गज इत्या
दिभ्रमस्य प्रसंगवारणाय यद्यहंकारांशस्याधिष्ठानत्वं नाङ्गीक्रियते चेत्तर्हि अनवच्छिन्नस्याधिष्ठानत्वमागतमिति पूर्वो।
क्ताभेदप्रसक्तिरिति शंकते किन्त्विति अन्तःकरणे चैतन्यप्रतिबिंबभूतं यज्जीवचैतन्यं तन्मात्रमधिष्ठानमुपेय

एवं चाहंकारानवच्छिन्नचैतन्येऽध्यस्यमाने स्वाज्ञगजादौ तत्समनियताधिष्ठानगोचरान्तःकरणादिवृत्तिकृता
भेदाभिव्यक्त्या प्रमातृचैतन्यस्यापीदं पश्यामीति व्यवहार उपपन्नः अपरे तु द्वितीयपक्षं समर्थयन्ते अहंकारा।
वच्छिन्नचैतन्यमधिष्ठानमित्यहंकारस्य विशेषणभावेनाधिष्ठानकोटिप्रवेशो नोपेयते किन्त्वहंकारोपहितं त
त्प्रतिबिंबरूपचैतन्यमात्रमधिष्ठानमित्यतो नाहं गज इत्याद्यनुभवप्रसंग इति

तेन स्वापरिच्छिन्नमेव उपाधेः परिच्छिन्नत्वादिति परिह अहंकारोपहितमिति अत इति अहमुल्लेखप्रयोजकस्य।
अहंकारात्मकान्तःकरणस्याधिष्ठानकोटावननुप्रवेशादित्यर्थः अविद्यायां बिंबभूतब्रह्मचैतन्यस्य तस्यां प्रतिबिंब
भूतजीवचैतन्यस्य वा स्वप्रपंचाध्यासाधिष्ठानत्वमते तयोः सर्वप्रमातृसाधारणत्वात् स्वप्नप्रपंचस्यापि सा।
धारण्यं स्यात् अन्तःकरणप्रतिबिंबचैतन्यस्य तदधिष्ठानत्वे तु साधारण्यप्रसंगदोषो नास्तीत्याशयेनाह द्वि।
तीयपक्षस्य प्रवृत्तिरिति बोध्यं

उदाहृतश्लोकस्य तात्पर्यमाह उक्तश्लोकेनेति अत्रेति प्रकृतेपि भ्रमे स्वप्नाध्यासरूपे स्वतोऽपरोक्षचैतन्यमधिष्ठानमि
त्यर्थः अत एव संक्षेपशारीरके स्वप्नाध्यासे स्वतोऽधिष्ठानापरोक्ष्यमुदाहृतमिति संबंधः स्वप्नाध्यासाधिष्ठानचैतन्या
परोक्ष्यस्य स्वतःसिद्धत्वमाक्षेपसमाधानाभ्यां दर्शयति नचाहंकारानवच्छिन्नेति मात्रपदं कात्स्न्यार्थकं तथा च शारी
रांतर्गतमपि चैतन्यमावृतमेवेति भावः वृत्तिमिति वृत्तिरप्यनवच्छिन्नगोचरप्रावृत्तमंतरेण न संभवतीति प्रागुक्त
मिति शेषं अनावृतमिति तदेव स्वप्नाध्यासाधिष्ठानमिति भावः ननु सर्वगतस्य जीवचैतन्यस्यानावृतत्वे तस्य बाह्य

उक्तश्लोकेनापरोक्षाध्यासापेक्षितमधिष्ठानापरोक्ष्यं कथं चित्स्वतः कथं चिन्मानसवृत्त्या कथं चिद्बहिरिंद्रियवृ
त्त्येत्यभिधाय स्वतोऽपरोक्ष्यं चितिरत्र विभ्रम इत्याद्यनंतरश्लोकेन स्वप्नाध्यासे स्वतोऽधिष्ठानापरोक्ष्यमुदाहृतं
नचाहंकारानवच्छिन्नचैतन्यमात्रमावृतमिति वृत्तिमंतरेण न तदभिव्यक्तिरिति वाच्यं अस्य चैतन्यमे
वावृतमविद्याप्रतिबिंबजीवचैतन्यमहंकारानवच्छिन्नमप्यनावृतमित्यभ्युपगमात्

दिविषयदेशे सदा सत्त्वेन चाक्षुषादिवृत्तिमनपेक्ष्य सदा सर्वविषयावभासप्रसंग इति चेन्न सर्वत्र विद्यमानस्यापि तस्या
नुपादानतया घटादिविषयैः सह संबंधाभावेन संबंधार्थतया वृत्त्यपेक्षायाः प्रतिकर्मव्यवस्थायामुक्तत्वात् नन्वविद्याप्र
तिबिंबरूपजीवचैतन्ये शारीरांतर्गतविशेषणत्वेनोपाधित्वेन वा अहंकारनिरपेक्षे अनवच्छिन्ने प्राचीने स्वप्नाध्यासो
पगमे सति तस्यैव स्वप्नकाले द्रष्टृत्वं स्यात् न तु प्रमातुः तस्याहंकारतादात्म्यापन्नात्तदवच्छिन्नस्य ततो भिन्नत्वात् न च
ष्टापत्तिः स्वप्नकालेऽहं श्रीकृष्णं पश्यामीति प्रमातुः स्वप्नपदार्थद्रष्टृत्वानुभवविरोधापत्तेरित्यत आह

सि॰ ले॰ टि॰ ५०

कथमिति स्वाप्नगजादिचाक्षुषज्ञानानुभवो हि वासनामयेऽपीन्द्रिये व्यावहारिकेन्द्रिये वा सूक्ष्मेन्द्रिये वा आरोपयितव्य-
मानो वा समर्थनीयस्तत्पासंभवात् तेन यावत्केन प्रकारेण समर्थनीय इति प्रश्नार्थः चतुर्थप्रकारेण तत्समर्थनं प्रतिजा-
नीते उच्यत इति आद्यं प्रकारद्वयं निराकरोति न तावदित्यादिना वासनामये प्रातिभासिके इन्द्रिये चाक्षुषत्वानु-
भवसमर्थनप्रकारं प्रथमं दूषयति स्वाप्नदेहवदिति स्वाप्नदेहः स्वाप्नाश्च विषयाः प्रातिभासिकाश्चैतन्यविवर्त-
रूपास्त्वभ्युपगम्यन्ते न तथेन्द्रियाणां स्वरूपभूतचैतन्यविवर्तः प्रातिभासिकोऽभ्युपगन्तुं शक्यत इत्यर्थः वाच्यत्वा

40

स्वाप्नगजादिचाक्षुषत्वानुभवः कथं समर्थनीयः उच्यते न तावत्तत्समर्थनाय स्वाप्नदेहवद्विषयवच्चे-
न्द्रियाणामपि प्रातिभासिको विवर्तः शक्यते वक्तुं प्रातिभासिकस्याज्ञातसत्त्वाभावात् इन्द्रियाणां चातीन्द्रि-
याणां सत्त्वे अज्ञातसत्त्वस्यावश्यकत्वात् नापि व्यावहारिकाणामेवेन्द्रियाणां स्वगोलकेभ्यो निष्क्रम्य स्वा-
प्नदेहमाश्रित्य स्वस्वविषयग्राहकत्वं वक्तुं शक्यते स्वप्नसमये तेषां व्यापारराहित्यरूपोपरतिश्रवणात्

दिति तेषामज्ञातसत्त्वनियमस्यादर्शनाद्दृष्टानुसारित्वाच्च कल्पनाया इति भावः द्वितीयं प्रकारं निराकरोति
नापीति ननु व्यावहारिकैरिन्द्रियैः स्वाप्नगजादीनां चाक्षुषत्वानुभवसमर्थनप्रकारस्तूत्पत्तिरेव नास्ति तेषां
जाग्रद्देहस्थत्वेन स्वप्नदेहस्थत्वाभावादित्याशंक्याह स्वस्वेति श्रवणादिति यत्र सुप्ते सु जागर्तीत्यादिश्रु-
तिष्विति शेषः श्रुतौ सुप्तेष्विमनन्तरं करणेष्विति शेषः करणानां स्वापो नाम उपरतिः सा च स्वप्नसमये व्यापा-
रराहित्यरूपैव न तु तेषां स्वरूपोपरतिस्तस्याः स्वप्नाभावे ऽश्रवणादिति बोध्यम्॥

उ॰ ५०

नन्वेवं शुक्तिरजतादेरसाधारण्यं न स्यात् तदधिष्ठानचैतन्यस्यासाधारण्यादित्याशंक्य हेत्वसिद्धिमाह एवमिति वृत्तिमदन्तः
करणवृत्तिः शुक्तीदमंशाकारा तस्यां वृत्तौ शुक्तीदमंशावच्छिन्नब्रह्मचैतन्यस्य यः प्रतिबिम्बः तस्मिन्नध्यस्ते स च प्रतिबिम्बो वृत्ति
गतमेव तस्य वृत्तिवृत्तिमतोरभेदोपचारात् वृत्तिमदन्तःकरणगतत्वोक्तिरनन्यवेद्यत्वस्य रीकरणे प्रतिबोध्यं वृत्तिगत।
एवं च प्रतिबिम्बस्य शुक्तिरजताधिष्ठानत्वानुपगमे साधारण्यप्रसंगतादवस्थ्यमभिप्रेत्याह शुक्तीदमंशावच्छिन्नेति सु
खादेरिव शुक्तिरजतादेर्यदनन्यवेद्यत्वं तस्याभावप्रसंगादित्यर्थः देवदत्तस्य सुखदुःखरागद्वेषादिकं देवदत्तादन्यस्य वे।
द्यं प्रमत्वं न भवतीत्यनन्यवेद्यं तदित्यर्थः अधिष्ठानचैतन्यस्यासाधारण्येऽपि शुक्तीरजताद्युपादानाज्ञानस्यासाधारण्या

एवं शुक्तिरजतमपि शुक्तीदमंशावच्छिन्नचैतन्यप्रतिबिम्बे वृत्तिमदन्तःकरणगतेऽध्यस्ते शुक्तीदमंशाव।
च्छिन्नबिम्बचैतन्ये सर्वसाधारणे तस्याध्यासे सुखादिवदनन्यवेद्यत्वाभावप्रसंगादिति केचित् केचित्तु बिम्ब
चैतन्य एव तदध्यासमुपेत्य यदीयाज्ञानोपादानकं यत्तत्तस्यैव प्रत्यक्षं नान्यजीवान्तरस्येत्यनन्यवेद्यत्वमुपपाद
यन्ति ननु शुक्तिरजताध्यासे चाक्षुषत्वानुभवः साक्षात्काराधिष्ठानज्ञानद्वारा तदपेक्षणद्वारा समर्थ्यते॥

शुक्तिरजतादेरसाधारण्यमित्याह केचित्त्विति बिम्बचैतन्य एवेति वृत्तिगतप्रतिबिम्बं प्रतिबिम्बचैतन्यं तदुत्यर्थः यद्वा अवि
द्याप्रतिबिम्बं प्रतिबिम्बभूते ब्रह्मचैतन्ये शुक्तीदमंशावच्छिन्ने इत्यर्थः न तु साधारणे वृत्तिप्रतिबिम्बे इत्येवकारार्थः
यदीयेति यद्रजतं यत्पुरुषीयाज्ञानोपादानकं तद्रजतं तस्यैव पुरुषस्य प्रत्यक्षं नान्यस्येति कल्पनोपपत्तेः न शुक्तिरजता
देः साधारण्यप्रसंग इत्यर्थः एवं स्वप्नप्रपंचाध्यासस्याधिष्ठानं निरूप्य स्वाप्नपदार्थानुभवः किमैन्द्रियकः किंवा साक्षि
रूप इति संशये निर्णयायाक्षेपमवतारयति नन्विति साक्षात्कारेति इदं च शुक्तिरजतादेरैन्द्रियकत्वमिति कवितार्किक
मतानुसारेणेति बोध्यं शुक्तिरजतादेः साक्षिभास्यत्वमतानुसारेणाह अधिष्ठानज्ञानद्वारेति धर्मिज्ञानद्वारा चक्षुर

योग्यत्वाच्छुक्तिरजतादेरित्यर्थः॥

म्र· ले·
द्वि·
५२

पदार्थैः सह संबन्धो यो नितिष्ठति तथाव्यवहारसाधनत्वेनैव चक्षुरादिजन्यज्ञानयोर्विषयदेशं प्रति गच्छतीत्यर्थः व्यतिक
रः संपर्कः संसर्ग इति यावत् जागरे दुर्विवेकमिति संबन्धः दुःखेन विवेको निर्णयो यस्य तत् दुर्विवेकमनायासेन निर्ण
तुमशक्यमिति यावत् आत्मनः स्वयंज्योतिष्ट्वं नाम स्वप्रभानवभास्यत्वे सति स्वव्यतिरिक्तसकलावभासकत्वयोगपद्यं त
च्च जागरे गृहीतुमशक्यं तथाहि आत्मव्यतिरिक्तस्य सर्वस्यात्ममात्रावभास्यत्वं वक्तुं न शक्यते आदित्यादिज्योतिषां चक्षुरादि
जन्यवृत्तिज्ञानानां चालोके जगदवभासकत्वेन प्रसिद्धानां सत्वादात्मनोऽप्यहमिति ज्ञानप्रकाश्यत्वेन तस्यान्यानवभास्यत्व
स्य वक्तुमशक्यत्वाच्चेति शंकायाः जागरे परिहर्तुमशक्यत्वेन जागरे स्वयंज्योतिष्ट्वनिर्णयायोगात् स्वप्नावस्थायां तु जा
गरलोकप्रसिद्धानामादित्यादिज्योतिषां चक्षुरादिजन्यज्ञानानां चाभावादात्मचैतन्यमात्रावभास्यस्वाप्नजगदिति निर्णे

42

दुर्विवेकमात्मनः स्वयंज्योतिष्ट्वमिति स्वप्नावस्थामधिकृत्य तत्रात्मनः स्वयंज्योतिष्ट्वं प्रतिपादयति अन्यथेति
अस्य सर्वदा स्वयंज्योतिष्ट्वेऽत्रेति वैयर्थ्यात्

यः संभवति तथाहमिति ज्ञानं हि निरूपमात्मनः प्रकाशकं न भवतीति वस्तुतः तथा चान्यानवभास्यत्वे सति सकलजगदव
भासकत्वयोगपद्यरूपं स्वयंज्योतिष्ट्वमात्मनः स्वप्नावस्थायां साक्षित्वेन निर्णेतुं शक्यमित्यर्थः ननु स्वप्नदशायामेव तस्य स्वयंज्यो
तिष्ट्वं न त्ववस्थान्तर इति यथाश्रुतार्थ एव श्रुतेस्तात्पर्यं किं न स्यादिति चेत् तत्राह अन्यथेति श्रुतेः स्वप्नावस्थामाश्रित्य तत्सा
क्षित्वेन स्वयंज्योतिष्ट्वमात्मनः सुविवेकमिति तात्पर्याकल्पने इत्यर्थः सर्वदेति तमेव भान्तमनुभाति सर्वमित्यादि
श्रुतिपर्यालोचनया तस्य सर्वदा स्वयंज्योतिष्ट्वनिश्चयादिति भावः अत्रेतीति अत्रेति विशेषणस्य व्यावर्तकत्वा
संभवेन वैयर्थ्यापादनेन यथाश्रुतार्थे तात्पर्यं किं तूक्तार्थ एव तात्पर्यमिति भावः ॥

डु·
५२

त्वगिंद्रियमात्रे दोषांतरमाह व्यावहारिकस्येति स्वस्य स्पर्शनेंद्रियस्य उचितो योऽयं व्यावहारिकदेशः तत्संपत्तिविधुरे शरीरस्यां
तःप्रदेशे स्थितं व्यावहारिकत्वगिंद्रियपरिमाणं येन स्वप्नकदाचिदधिकपरिमाणवत्स्वाप्नदेहं कृत्स्नं न व्याप्नुयात् त्वगिं।
द्रियमित्यर्थः व्यावहारिकस्पर्शनेंद्रियस्योचितदेशकालसंपत्तिवैधुर्यविशेषणेन तस्य स्वाप्नदेहप्रवेशांतःशरीरे गमन
मेव संभवतीति सूचितं यद्व्यावहारिकस्पर्शनेंद्रियस्य कृत्स्नस्वाप्नदेहव्यापित्वायोगात् तर्हि स्वाप्नदेहैकदेशाश्रयत्वमेवास्तु को
दोषस्तत्राह तदेकदेशेति तस्येति स्पर्शनेंद्रियस्येत्यर्थः तृतीयप्रकारं निरस्यति अतएवेति व्यावहारिकस्पर्शनेंद्रिय।

व्यावहारिकस्य स्पर्शनेंद्रियस्योचितव्यावहारिकदेशसंपत्तिविधुरेंतःशरीरे स्वाधिकपरिमाणकृत्स्नस्वाप्नशरी
रव्यापकत्वायोगाच्च तदेकदेशाश्रयत्वे च तस्य स्वाप्नजलावगाहनजन्यसर्वांगीणशैत्यस्पर्शानिर्वाहात् अत
एव स्वप्ने जाग्रदिंद्रियाणामनुपरतावपि तैजसव्यवहारोपयुक्तानि सूक्ष्मशरीरावयवभूतानि सूक्ष्मेंद्रिया
णि संतीति तैः स्वाप्नपदार्थानामैंद्रियकत्वमित्युपपादनशंकापि निरस्ता जाग्रदिंद्रियव्यतिरिक्तसूक्ष्मेंद्रिया
प्रसिद्धेः किं चात्रायं पुरुषः स्वयंज्योतिरिति जागरेति आदित्यादिज्योतिर्व्यतिकराच्च स्त्र्यादिदृष्टिनिसंचाराच्च

स्यैव स्वाधिकपरिमाणकृत्स्नस्वप्नशरीरव्यापित्वायोगमिति तदवयवभूतसूक्ष्मस्पर्शनेंद्रियस्य तु कथं स्वप्नदेहव्यापकत्वा
योगादेवेत्यर्थः तैजसः स्वाप्नावस्थागतो जीवः सूक्ष्मशरीरस्थत्वेन व्यावहारिकाण्युच्यंते स्पर्शनेंद्रियमात्रे दोषमभिदर्शि
तदर्शितत्वासाधारणदोषमाह जाग्रदिंद्रियेति नन्वप्रसिद्धान्यपि स्वप्नकाले पदार्थानां चाक्षुषत्वाद्यनुभवानुरोधेन
कल्प्यंतामित्याशंक्य श्रुतिविरोधान्नैवमित्याह किं चात्रेति श्रुताविति पदेन स्वप्नावस्थायां ग्रहणं सूचितं तात्पर्यमाह जागरेत्
ति जागरे कार्यकारणसंघातानामासनगमनागमनादिलक्षणव्यवहारसाधनत्वेनादित्यादिज्योतींषि व्यवह्रियमाण

सि. ले.
टि.
५२

अनुपपत्तिरिति संस्काराभावादिति भावः ननु सुषुप्तावपि अविद्यावृत्तिर्न कल्पनीया सुषुप्त्यादिसाक्षिचैतन्यस्य नित्य-
त्वेपि साक्षिभास्यायाः सुषुप्त्यवस्थायाः विनाशित्वेन विषयभूतसुषुप्त्यवस्थाविशिष्टवेषेण तस्य साक्षिणो नाशलक्ष-
णसंस्कारसंभवात् सुषुप्तिसुखादीनामनुसंधानोपपत्तिरिति चेत्तर्हि स्वप्नसाक्षिणोपि प्रातिभासिकविषयविशि-
ष्टवेषेणानाशिलक्षणसंस्कारसंभवात्स्वप्नदृष्टगजाद्यनुसंधानोपपत्तिरित्याह सुषुप्ताविति तन्मते सुषुप्तिपरं

स्वप्नदृष्टगजाद्यनुसंधानानुपपत्तिः सुषुप्तिवत्तथाविद्यावृत्त्या तदुपपत्तेः सुषुप्तौ तदवस्थोपहित-
मेव स्वरूपचैतन्यमज्ञानसुखादिप्रकाशः उत्थितस्यानुसंधानमुपाधिभूतावस्थाविनाशजन्यसंस्का-
रेणेति वेदान्तकौमुद्यभिमते सुषुप्ताववियावृत्त्यभावपक्षे उक्तापि स्वप्नगजादिभासकचैतन्योपाधिभूत-
स्वप्नावस्थाविनाशजन्यसंस्कारादनुसंधानोपपत्तेश्च अथवा तदेतन्मतं येन स्वप्नं पश्यतीत्यादिश्रुतेः स्व-
प्नेपि कल्पतरुकारीत्या स्वप्नगजादिगोचरान्तःकरणवृत्तिः

42

अज्ञानसुखादिप्रकाश इति अज्ञानाद्यनुभव इत्यर्थः उक्तापीति स्वप्नावस्थायामपीत्यर्थः उपाधिभूतेति विषय-
तयोपाधिभूतेत्यर्थः जागरवत्स्वप्नेपि गजादिगोचरान्तःकरणवृत्तिरेवोपपद्यते अतो न संस्काराभावशंकाव-
काशः न च तदन्तःकरणस्य वृत्तौ सत्त्वे परिशेषात्सिद्धिरिति वाच्यं परिशेषस्यापि लोकदृष्ट्या उपपत्तेरिति मतां-
तरमाह अथवेति सत्वमाद्वितान्तःकरणस्य तीयाश्रुत्या स्वाप्नगजादिगोचरज्ञानकरणत्वं भाति तथा च श्रुतिप्रा-
माण्यात्स्वप्ने चक्षुरादिजन्यवृत्त्यभावेपि मानसवृत्तिरस्ति अतो न संस्कारानुपपत्तिरिति कल्पतरुकारीयेत्यर्थः

उ.
५२

एवंश्रुतितात्पर्येण निरूप्य स्वप्नकाले चक्षुरादिव्यापारकल्पनं तद्बाधितमित्याह तत्रेति स्वयंज्योतिष्ट्वं स्वप्नावस्थायां।
स्थितेन स्वग्रामाभिमित्यत्र श्रुतितात्पर्येण सिद्धमित्यर्थः ननु स्वप्नजगतोऽवभासकान्तराभावादात्ममात्रभासत्वमित्युक्तमयु
क्तमिति शंकते नन्विति अनुपरतमास्त इतीति तथा च मन एव स्वाप्नजगदवभासकत्वसंभवादवभासकान्तराभाव
रूपपरिशेषासिद्धिरित्यर्थः स्वप्नावस्थायां मनसो ज्ञानकारणत्वमसिद्धमतस्तस्य स्वाप्नजगदवभासकत्वासंभवात्
परिशेषासिद्धिरिति परिहरति मैवमिति आत्मा कर्ता भवितुमर्हति तथा सति कर्ता विज्ञानात्मा पुरुष इत्यादिशास्त्रस्या

तत्र यदि स्वप्नेऽपि चक्षुरादिवृत्तिसंचारः कल्प्येत तदा तत्रापि जागर इव तस्य स्वयंज्योतिष्ट्वं दुर्विवेचं स्यादित्युक्त
दाहृता श्रुतिः पीड्येत ननु स्वप्ने चक्षुराद्युपरमकल्पनेऽप्यन्तःकरणमनुपरतमास्त इति परिशेषासिद्धेर्न स्व
यंज्योतिष्ट्वविवेकः मैवं कर्ता शास्त्रार्थवत्त्वादित्यधिकरणन्यायनिर्णीतो ज्ञातात्मान्तःकरणस्य चक्षुरादिक
रणानां च निरपेक्षाणां ज्ञानसाधनत्वाद्वा तत्त्वदीपिकोक्तरीत्या स्वप्ने तस्यैव जागराद्याकारेण परिणामेन ज्ञानक
र्मतयावस्थितत्वेन तदानीं ज्ञानसाधनत्वायोगाद्वा परिशेषोपपत्तेः न च स्वप्नेऽन्तःकरणवृत्त्यभावे उत्थितस्य स्व

प्नवत्त्वोपपत्तेरिति सूत्रार्थः उक्तरीत्येति मनस उपादानत्वेन स्वतो ज्ञानकरणत्वं नास्तीत्युक्तरीत्येत्यर्थः तत्त्वदीपिकोक्तरी
त्येति स्वप्ने मनस एव विविधसंस्कारविशिष्टस्य स्वप्नप्रपंचाकारेण परिणमितत्वं न तु विद्यायाः तस्याः संस्काराश्रयत्वाभावेन
विचित्रपदार्थपरिणमितत्वायोगादित्युक्तरीत्येत्यर्थः कर्मतयेति विषयत्वेनैवोपक्षीणस्य विषयित्वरूपप्रकाशकत्वाभा
वादित्यर्थः तदानीमित्यनेन अस्तु वा जागरणे ज्ञानकारणत्वं तथापि स्वप्ने तज्ज्ञोपपत्ते तस्य विषयत्वेनैवावस्थितत्वादि

सि॰ ले॰
द्वि॰
४३

नन्वेतावान्भ्रमो दुर्घटघटनायाः संभवात् किमिव हीति दुर्घटमपि भ्रमं माया किमिव न करोतीति संबंधः किमिव केन दृष्टं तेन
न करोति दुर्घटघटनाकरणे मायायाः दृष्टांतो नास्तीत्यर्थः अत्रैतस्यास्तत्कारित्वमैन्द्रजालिकमायादौ प्रसिद्धमिति हि शब्दार्थः वि
यदादिप्रपंचभ्रमहेतुभूतामायादुर्घटमपि प्रपंचभ्रमं व्यवस्थितरूपं घटयति निद्रारूपेण परिणता त्वस्मात्ततो विलक्ष
णमेव भ्रमं कारयतीति मत्वा विशेषणद्वयमुक्तं यस्माद्विति निद्रारूपेण परिणताया इत्यर्थः स्वप्ने चाक्षुषत्वाद्यनुभवस्य
गतिनिरूपणमुपसंहरति तस्माद्धिति स्वप्ने चक्षुरादीनां व्यापारासंभवादित्यर्थः येनाधिकारिणैवं कृतविधज्ञानकर्मानु
ष्ठानाद्यासादितनिरतिशयपरमेश्वरप्रसादमहिम्ना नितांतनिर्मलीकृतांतःकरणेः सतः जागरेऽपि स्वप्नादि शेषं न प ।

किमिव हि दुर्घटमपि भ्रमं माया न करोति विशेषतो निद्रारूपेण परिणतायास्तस्या माहात्म्यात्स्वप्ने रथः प्रतीतः
क्षणेन मनुष्यः प्रतीयते स च क्षणेन मार्जारः स्वप्नदृष्टश्च न पूर्वापरविरोधानुसंधानं तस्मादन्यथानुपपत्त्यानुवि ।
धानप्रतीतिर्नो कल्प्यापि जाग्रज्ज्ञानाद्यनुभव एव चक्षुरादिजन्मो न स्वाप्नजाग्रज्ज्ञानाद्यनुभवः दृष्टिसृष्टिवादिनस्तु
कल्पितस्याज्ञातसत्त्वमनुपपन्नमिति कृत्स्नस्य जाग्रत्प्रपंचस्य दृष्टिसमसमयां सृष्टिमुपेत्य घटादिदृष्टेश्चक्षुः
सन्निकर्षानुविधानप्रतीतिं दृष्टेः पूर्वं घटाद्यभावेनासंगच्छमानां स्वप्नवदेव समर्थयमाना जाग्रज्ज्ञानाद्यनुभ
वोऽपि न चाक्षुष इत्याहुः

प्रपंचितान् ब्रह्मविद्याकामान् यकृत्स्नप्रकृतां कृत्स्नस्य जगतः प्रबोधस्वापावस्था
योः प्रभवप्रलयप्रतिपादिकां श्रुतिमनुसृत्य दृष्टिसृष्टिवादः पूर्वाचार्यैर्निरूपितः तं स्वप्नविचारेण बुद्धिमारूढं दर्शय
ति दृष्टिसृष्टिवादिनस्त्विति दृष्ट्या सह समः समयो यस्याः सा तां सृष्टिं कृत्स्नस्य जाग्रत्प्रपंचस्योपेत्येतत्पूर्ववाक्येन हे
तुमाह कल्पितस्येति स्वाप्नप्रपंचस्येवेत्यर्थः घटादिदृष्टेर्याऽनुविधानप्रतीतिः तामसंगच्छमानां स्वप्नवदेव भ्र
मरूपां समर्थयमाना इति संबंधः असंगच्छमानत्वे हेतुर्दृष्टेः पूर्वं घटाद्यभावेनेति तत्र च हेतुः दृष्टिसमसमया
सृष्टिः न चाक्षुष इति किं तु स्वप्नानुभववदेव केवलसाक्षिरूप इत्यर्थः ॥

43

टी॰
४३

नवतादात्म्यस्यांतःकरणवृत्तिसद्भावमात्रेणेत्यर्थः अंतःकरणस्य सर्वात्मना जीववच्चैतन्येनाध्यस्ततया अहं पश्यामी।
त्यादिरूपेण द्रष्टृतया स्फुरमाणस्यांतःकरणस्याहंदृष्टानस्माच्चिदात्मनः सकाशाद्भेदाप्रसिद्ध्या परिशेषार्थं लोक
प्रसिद्धद्रष्टृव्यतिरिक्तकरणादिव्यापाराभावस्यैवापेक्षितत्वात् तावता परिशेषासिद्धिरित्येवेत्यर्थः एतदुक्तं भवति अंतः
करणवृत्तिलक्षणो व्यापारो वस्तुतः करणव्यापारोपि प्रतीतितो द्रष्टृव्यापारो भवति अंतःकरणस्य द्रष्टृत्वेन गृहीतत्वा
ल्लोके इति स्वयंज्योतिष्ट्वनिर्णयप्रकारं दर्शयति प्रसिद्धेति पूर्वमुक्तं तदात्म्यमनेन सूचितं स्वाप्नपदार्थप्रचाक्षुषत्वा

न च तावता परिशेषासिद्धिः अंतःकरणस्याहमिति गृह्यमाणस्य सर्वात्मना जीवैक्येनाध्यस्ततया लोके द्र
ष्टृत्वेन तद्व्यतिरेकाप्रसिद्धेः परिशेषार्थं चक्षुरादिव्यापाराभावमात्रस्यैवापेक्षितत्वात् प्रसिद्धं स्वप्नमात्रे
दृगवभासयोग्यमिति निश्चयसत्त्वेन परिशेषार्थमन्यानपेक्षणात् तस्मात् स्वप्ने सर्वथापि चक्षुरादिव्या
पारासंभवात् स्वाप्नगजादेश्चाक्षुषत्वाद्यनुभवो भ्रम एव न तु स्वप्नेपि चक्षुरुन्मीलनेन गजाद्यनुभवस्तन्निमील
नेनेति जागरवद् गजाद्यनुभवस्य चक्षुरुन्मीलनाद्यनुविधानं प्रतीयत इति चेत् चक्षुषा रजतं पश्यामीत्यनु
भववदयमपि कश्चित् स्वाप्नभ्रमो भविष्यति यत्केवलसाक्षिरूपे स्वाप्नगजाद्यनुभवे चक्षुराद्यनुविधानं त

द्यनुभवस्य गतिमिदानीं प्रपंचयति तस्मादिति पंचमीं व्याचष्टे सर्वथेति पूर्वोक्तसर्वप्रकारैरपीत्यर्थः स्वप्नानुभवस्य भ्रा
न्तिरूपत्वे चक्षुराद्यनुविधानविरोधमाशंक्य दृष्टान्तेन समाधत्ते स्वप्नेपीत्यादिना तदनुविधायिनीति जागरे चक्षु
राद्यनुविधायिनी प्रसिद्धा वृत्तिः सा स्वप्नसाक्षिण्यध्यस्यत इति यथा शुक्तौ पीनयोगः अन्यथाख्यातिप्रसंगात्
कितत देतत्सत्यं येन स्वप्ने पश्यतीति श्रुत्यनुसारेण कल्पितरूपकारैर्यो गजादिगोचरमानसवृत्तिरूपेण तस्या तद
नुविधायित्वेनाध्यस्यत इत्यर्थः तथा च केवलसाक्षिरूपे स्वाप्नगजाद्यनुभवे चक्षुराद्यनुविधानं तदनुविधायिनी

सि. बि.
४४

येत्यादिना किंचिदन्यथेति किंचिदविद्यादिकमन्यथान्यादित्वेन कल्प्यते पूर्वपूर्वोविद्योपहितेनात्मनेत्यर्थः तावतान
त्वनामात्रेणेत्यर्थः ननु प्रमदेविषयस्य कारणत्वेन तथा च घटादिदृष्टेः पूर्वमज्ञातो घटादिर्वाच्यः अन्यथा कार्यकारणवि
भागो न स्यात्तथाविद्योपहितस्य चिदात्मनः एकस्यैव कल्पितसंसारकल्पने संसारवतो जीवस्यैकत्वेन गुरुशिष्य
विभागो दैवतिर्यङ्मनुष्यादिविभागश्च न स्यादित्यत आह एतेनेति साधनादिविभागोपपत्तिकथनेनेत्यर्थः व्या
ख्यातउनिवलतः प्रमदेविषयस्य कारणत्वेपि सततकारणत्वेन कल्प्यते तथा अन्यदपि स्वप्नभ्रमवदेव सर्वमूह
मित्यर्थः कल्पकस्याविद्योपहितस्यान्तत्वापरिहारायसाधनादिविभागान्यथा च दृष्टिसृष्टेः संकोचमाह अन्येति
ति वस्तुतउतिस्वरूपतउत्यर्थः तर्हि दृष्टिसृष्टिः कुत्रापि नोपयामानाभावादितिशंकते किंत्विति स्वाप्नप्रबोधयोः

44

यथा स्वप्ने कल्प्यमानं गोपुरादिकं किंचित्पूर्वसिद्धत्वेन कल्प्यते किंचिन्नूतनत्वेन एवं जागरेपि किंचित्कल्प्य
मानं सादित्वेन कल्प्यते किंचिदन्यथेत्येतावता साधनादिविभागोपपत्तेः एतेन कार्यकारणविभागोपि व्याख्या
तउति अन्ये त्ववस्तुतेत्वाद्यविद्यादितत्र दृष्टिसृष्टिर्नोपपद्यते किंतु ततोन्यत्र प्रपंचमात्रउत्याहुः नन्वेव
मपिश्रुतिमात्रप्रतीतस्य वियदादिसर्गस्य तत्क्रमादेः कः कल्पकः

कार्यप्रपंचमात्रस्य कल्पप्रभवपास्कवकृश्रुतिसिद्धितामैवमिति परिहरति तत्तोन्यत्रेति अविद्यादेः सकाशादिति
शेषः मात्रपदं कात्स्न्यार्थकं ननु दृष्टिसमय एव प्रपंचसृष्टिरिति मतेपि दृष्टिशब्देन प्रत्यक्षप्रतीतिरेव विवक्षिता न प
रोक्षप्रतीतिः अपरोक्षप्रतीतेरेव विषयाविनाभूतत्वेन प्रातिभासिकविषयसाधकत्वात् परोक्षप्रतीतेरज्ञातपाकात्
तथात्वे तस्मिन्निवाधकमाशंकते नन्वेवमपीति अविद्योपहितस्यात्मनः प्रत्यक्षवस्तु कल्पकत्वेपीत्यर्थः यदि वियदा
दिसर्गस्य श्रुत्या परोक्षेण च प्रतीतो भवेत्तदा प्रत्यक्षवत् घटादेरिव तस्यापि प्रातिभासिकत्वसिद्धिः संभवेन्न तु तद
प्रतीत्यायेन मात्रदत्तं वाक्यादिसंग्रहार्थं प्रथमादिपदं वियदादिकल्पतत्क्रमसंग्रहार्थं द्वितीयादिपदं कउतिकल्प

उ.
४४

कल्पितत्वोपगमइति प्रातिभासिकत्वोपगमं इत्यर्थः निरुपाधिरिति किं च शाद्बसृष्टिचिंतं विकल्पं दर्शयति निरुपाधिरि
ति निरपेक्षस्त्रिदात्मैव संसारकल्पक इति प्रथमकल्पं दूषयति सोऽपीति अनुष्टम्भेति अनुष्टत्वापत्तेरित्यर्थः अवि
द्यायाअपीति तस्या अपि कादाचित्कत्वाभ्युपगमे अविद्यासृष्टेः पूर्वमेवाविद्योपहितस्य चिदात्मनो विद्यादिकल्पकस्य
वक्तव्यत्वात्तदभावादविद्यादिसृष्टिर्न संभवति तथा च सदा संसारानुपलंभप्रसंगइतिभावः नन्वेवमपि प्रथमाविद्या
याः कः कल्पकः तत्राह अनादित्वमिति इदं प्रथमत्वाभावात् प्रथमाविद्यैव काचिन्नास्ति अतो न चोद्यावकाश इतिभावः
तर्हि अनवस्थेत्याशंक्य समानदोषतयाविद्योपहितात्मनः प्रपंचकल्पकत्वेन श्रुतिसिद्धस्य पूर्वपूर्वअविद्यांविनात कल्पक

न त्वहं दृष्टिसृष्टिमवलंब्य कृत्स्नस्य जगतस्तदंपं च तस्य कल्पितत्वोपकल्पको निरुपाधिरात्मा वाविद्योपहितो
वानाद्यः मादेपिसाध नांतरनिरपेक्षस्य कल्पकस्य सत्वेन प्रपंचानुवृत्त्या संसाराविशेषप्रसंगात् नद्वितीयः
यः अविद्याया अपि कल्पनीयत्वेन तत्कल्पनायाः गौर्वकल्पिकासिद्धेर्वक्तव्यत्वात् अत्र केचिदाहुः पूर्वपू
र्वकल्पिताविद्योपहित उत्तरोत्तराविद्याकल्पकः अविद्याप्रथमत्वाच्च कल्पककल्पनाप्रवाहस्यानानवस्था
दोषः न चाविद्यायाअनादित्वोपगमात् शुक्तिरजतवत्कल्पितत्वं न युज्यते अन्यथा साद्यनादिविभागा

तन्निर्वाहाभावादित्याशयेनाह नानवस्थादोषइति नन्वजीवईशोविशुद्धाचित्तथा जीवेशयोर्भिदा अविद्यातच्चि
तोर्योगः षडस्माकमनादय इति सिद्धांतविरुद्धमविद्यायाः अवाह्यत्वादिकल्पनं तेषाः स्वरूपानादित्वस्यैव सिद्धांत
संग्रहश्लोकोक्तैतत्पदवत् प्रतीतिरितिशंकते नचेति सिद्धांतमङ्गीकृत्य प्रश्नेना वापिदोषमाह अन्यथेति अविद्या
दीनां स्वरूपानादित्वानुपगमइत्यर्थः अनुपपत्तेरिति उक्तविभागस्य लोकशास्त्रसिद्धित्वादितिभावः श्रुते
कस्य मध्येगम्य विशुद्धचैतन्यव्यतिरिक्तमात्रे दृष्टिसृष्टिमुपेत्य वसाद्यनादिविभागो वा परलौकिकवैदिकप्रमा
णानां सिद्धांतप्रवाहस्य चावलंबनत्वेन अमविशेषसदृष्टांतमाह

सि॰ ले॰ द्वि॰ ६४

तात्पर्याविषये विसमानस्यापि श्रुतिविरोधस्याकिंचित्करत्वादिति भावः परिहरति नचार्थ इति न्यायेति वियत्पत्राणपादस्थ
यगतादिकरणेऽनिरूपितापि सिद्धान्तन्यायाः तेषां बोधार्थमित्यर्थः तेषां न्यायानां सृष्ट्यादिवाक्यार्थाविरोधनिर्णाया
यानपेक्षितानामपि श्रुतितात्पर्यविषये किंचिदेवं विरोधप्रसक्तौ तत्समाधानाय तदुपयोगस्तेषां भविष्यतीत्याशयेन
प्रवृत्तः सूत्रकारादिप्रयत्नोऽर्थवानित्यर्थः तत्प्रवृत्तेरिति वियत्पत्राणपादयोः प्रवृत्तेरित्यर्थः सृष्ट्यादिश्रुतीनां स्वार्थे
तात्पर्यमभ्युपेत्यैव वियत्पादादिप्रवृत्तिमत्र कल्पतरुकारसंमतिमाह उक्तं हीति इदमिति विरोधसमाधानमि
त्यर्थः यद्वेति वियत्पत्राणपादयोरित्यर्थः तथाह्यवधारणे तासां सृष्ट्यादिश्रुतीनां ब्रह्मात्मैक्यपरत्वादेव तत्ता

45

नचार्थः न्यायमूलत्वमर्थमभ्युपेत्य तत्प्रवृत्तेः उक्तं हि शास्त्रदर्पणे श्रुतीनां सृष्टितात्पर्यं स्वीकृत्येदमिहेरितं
ब्रह्मात्मैक्यपरत्वात्तु तासां नत्वेवं वियतइति ज्योतिष्टोमादिश्रुतिबोधितानुष्ठानात्फलसिद्धिः स्वाप्नश्रुति
बोधितानुष्ठानप्रयुक्तफलसंवादतस्या

त्पर्येनात्यैव तासां स्वार्थेपि तात्पर्ये वाक्यभेदप्रसंगात् स्वार्थे फलाभावाच्चेत्यर्थः एवं दृष्टिसृष्टिवादे सृष्ट्याश्रुती
नां निरालंबनत्वं परिहृत्य कर्मोपासनावाक्यानामपि निरालंबनत्वं परिहरति ज्योतिष्टोमेत्यादिना ज्योतिष्टोमा।
दिश्रुत्या स्वर्गादिसाधनत्वेन बोधितस्य यागादेरनुष्ठानात् स्वर्गादिफलसिद्धिरित्यर्थः स्वाप्नेति स्वप्ने हि कश्चित्
कदाचिज्ज्योतिष्टोमादिश्रुतिकल्पितात्ततः साधनविशेषमुपलभ्य तदनुष्ठानात्फलं लभते न तु स्वप्नजागरणापि
स्वर्गादिफललभनमित्यर्थः वस्तुतस्तु श्रुतिमात्रप्रतीतवियदादिसर्गतत्क्रमादेरिव श्रुतिमात्रप्रतीतस्वर्गादिफ
लस्याप्यसत्त्वमेवाभिप्रेतं कल्पिकाभावस्य तुल्यत्वादिति बोध्यं॥

ॐ. ६४

कल्पनाभावे दुष्टापत्तिमाह द्वाभ्यां सृष्ट्यादीनां कोऽपीति तर्हि सृष्ट्यादिश्रुतिप्रतिपाद्यस्य वियदादिसृष्टितत्क्रमादेः शशशृंगा
यमानतया श्रुतेरालंबनाभावादप्रामाण्यं स्यादिति शंकते किमिति तात्पर्यविषयीभूतार्थस्य सत्त्वात्प्रामाण्योपपत्तिरिति
परिहरति निष्प्रपंचेति ननु सृष्ट्यादिवाक्यानां श्रुतार्थपरित्यागेनाश्रुतार्थे तात्पर्यकल्पनमयुक्तं किं तु श्रुत्यनुसारेण
वियदादिसर्गस्य तत्कल्पकस्य च कल्पनमेव युक्तमित्यत आह अध्यारोपेति यथा लोके गगनतत्त्वबोधनाय प्रवृत्तः क
श्चित्तत्प्रथमं नेत्यवैयात्यात् अध्यारोपेण गगनं ग्राहयित्वा पश्चात् नेदं तलं तन्नैल्यादि युक्तमिति तदपवादेन नी
रूपत्वाद्युपक्रमदामीनं गगनतत्त्वमिति बोधयति तथा वेदांता अपि प्रथमं यद्वियदादिसर्गप्रलयादिकारणं सृष्ट्या
दिवाक्यैः प्रतीयते तद्ब्रह्मेत्यध्यारोपितसर्गादियुक्तं तथा ब्रह्म ग्राहयित्वा पश्चात् निषेधवाक्यैरध्यारोपितसर्गाद्य

नकोपि किमालंबनात्सोत्मन आकाशः संभूत इत्यादिश्रुतिः निष्प्रपंचब्रह्मात्मैक्यावलंबनेत्यवेहि ।
अध्यारोपापवादाभ्यां निष्प्रपंचब्रह्मप्रतिपत्तिर्भवतीति तत्स्मृतिपरत्वं यापकतया श्रुतिसृष्टिप्रलयोपन्यासो
न तात्पर्येणेति भावाद्दोषः यद्येवं तर्हि तात्पर्याभावेपि यत्प्रामाण्यापादयोर्वियदादिसर्गतत्क्रमादिविषयश्रुती
नां परस्परविरोधपरिहाराय यत्नः

पवादेन निष्प्रपंचब्रह्मात्मैक्यं प्रतिपादयंति तथा च सृष्ट्यादिवाक्यानां नि
षेधवाक्यापेक्षितनिषेध्यसमर्पकतया तदेकवाक्यतापन्नानां निष्प्रपंचब्रह्मप्रतिपत्तिप्रयोजकत्वमेव न तु स्वार्थेऽपि स
ष्ट्यादिप्रतिपादनमात्रेण चारितार्थ्यमर्थवादादीनामिव तेषां स्वार्थप्रतिपादने फलाभावान्निष्फलत्वेऽपि वेदतात्पर्यगोचरता
दतो युक्तमेव स्वार्थत्यागेन निष्प्रपंचब्रह्मात्मैक्ये तात्पर्यकल्पनं तज्ज्ञानस्य मुक्तिफलकतायाः श्रुतिसिद्धत्वादेवं च प्रथम
मध्यारोपेण सप्रपंचब्रह्मप्रतिपत्तिर्भवति पश्चात्प्रपंचापवादेन तस्यैव ब्रह्मणो निष्प्रपंचत्वप्रतिपत्तिर्भवति पूर्वं प्र
तिपत्तिश्चोत्तरप्रतिपत्तेः शेष एव न स्वतंत्रेति निष्कर्षः प्रपंचत्वमाष्यादिष्वेव हृदयमुत्तरपद्यः शंकते यद्यपीति
तर्हीत्यस्य व्याख्या तात्पर्याभावेऽपीति वियदादिसर्गतत्क्रमादाविति शेषः यत्नो व्यर्थः सूत्रकारभाष्यकारयोरिति शेषः

सि०ले०
द्वि०
पु०४६

ज्ञानादन्येकृतदृष्टयो भ्रांताः ज्ञानस्वरूपसत्तापेक्षयाभिन्नसत्ताकं प्रपंचं तीत्वतरार्थेन भेददृष्ट्युपवादाच्च तयोरभेदस।
त्ताकत्वसिद्धिरित्यर्थः स्मृतेश्चेतिचकाराच्छ्रुतेश्चेत्यर्थः सर्वंखल्विदंसर्वंमित्यादिश्रुतिरुदाहर्तव्या मनःप्रत्ययो मानसो
विश्वासः प्रामाणिकत्वनिश्चयः तमलभमाना इत्यर्थः तदलाभे च हेतुः जायमानप्रपंचस्यापि प्रातिभासिकत्वा।
भ्युपगमो विपदादिसर्गाद्युपलापः कर्मोपासनाकांडार्थानुष्ठानाधीनस्वर्गलोकब्रह्मलोकाद्युपलापो जाय
तिचद्द्वारायनविधानप्रतीतेर्भ्रममात्रत्वाभ्युपगमइत्यादिरितिदृष्टव्यंसृष्टिदृष्टिपदं व्याचष्टे श्रुतिदर्शितेने

प्रपंचंप्रत्येकदृष्टयउलिस्मृतेश्चेतिसिद्धांतमुक्तावल्यादिदर्शितोदृष्टिसृष्टिवादः द्विविधोपिदृष्टिसृष्टि
वादेमनःप्रत्ययमलभमानाः केचिदाचार्याः सृष्टिदृष्टिवादं रोचयंते श्रुतिदर्शितेन क्रमेण परमेश्वर
सृष्टमत्वातसत्ताप्रवृत्तमेवविश्वं तत्तद्विषयप्रमाणैर्वतरणेतत्सत्तस्यदृष्टिसिद्धिरिति नचैवंप्रपंच
स्यकल्पितत्वाभावेश्रुत्यादिप्रतिपन्नसृष्टिप्रलयादिमतःप्रपंचस्यादिप्रतिपन्नार्थक्रियाकारिणश्च
तस्यसत्यमेवाभ्युपगतंस्यादितिवाच्यं॥

त्यादिना अपसिद्धांतशंकते नचैवमिति उक्तरीत्याप्रामाणिकत्वेप्रपंचस्यस्वीकृते सतीत्यर्थः कल्पितत्वाभावे
सत्यत्वमेवाभ्युपगतंस्यादितिसंबंधः प्रपंचःसत्यःश्रुतिसिद्धत्वात्ब्रह्मवत् नचतस्यप्रपंचस्यासिद्धस्यश्रुतिसिद्धत्व
मसिद्धमितिवाच्यं तस्यस्वरूपेणप्रपंचस्यासिद्धत्वेपिसृष्टिप्रलयादिविशिष्टतयाश्रुतिस्मृत्यादिसिद्धत्वात् तथाप्र
पंचःसत्यःअर्थक्रियाकारित्वात्सृष्ट्याद्यर्थक्रियाकारिब्रह्मवत् नचहेत्वसिद्धिः पृथिवीजलादीतस्यप्रपंचस्यादि

सिद्धान्तलेशसंग्रहः
उ० ४६

46

नहि तत्साम्प्रामाण्यं स्यादिति चेत्तत्राह ज्योतिष्टोमादिश्रुतीनां चेति कर्मवाक्यैरुपासनावाक्यैश्च विहितानि कर्मोपासनान्य
नुतिष्ठतः सत्वशुद्धिर्भवति शुद्धसत्वस्य चाधिकारिणो वेदान्तशास्त्रं ब्रह्मप्रमितिं जनयति तथा च कर्मोपासनाकांडयोरधि
कारिसंपादनद्वारा ब्रह्मप्रमितिशेषत्वात्तन्मोक्षे नैव तात्पर्यं न स्वार्थे स्वर्गसाधनत्वादाविति नाप्रामाण्यप्रसंग इति भावः
न च वेदान्तानां शेषतो ब्रह्मप्रतिपत्तिपरत्वेनास्तिमानमिति वाच्यं सर्वे वेदा यत्पदमामनन्ति तमेतं वेदानुवचनेन ब्राह्म
णा विविदिषन्तीत्यादिश्रुतिसहस्रसमन्वयमानत्वादित्यादिकमभिप्रेत्याह इत्यादिदृष्टिसृष्टिव्युत्पादनप्रक्रियाप्रपंचात्वि
ति अथ एवमेको दृष्टिसृष्टिवाद इति संबंधः अन्यत्तु सिद्धान्तमुक्तावल्यादिदर्शितः दृष्टिसृष्टिवाद इति संबंधः द्विती

ज्योतिष्टोमादिश्रुतीनां च सत्वशुद्धिद्वारा ब्रह्मणि तात्पर्यान्नाप्रामाण्यमित्यादिदृष्टिसृष्टिवादव्युत्पादनप्रक्रि
याप्रपंचस्त्वाकरे एव द्रष्टव्यः अयमेको दृष्टिसमसमया विश्वसृष्टिरिति दृष्टिसृष्टिवादः अन्यस्तु दृष्टिरेव वि
श्वसृष्टिः दृश्यस्य दृष्टिभेदे प्रमाणाभावात् ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः अर्थस्वरूपं भ्राम्यन्तः

यं निरूपयति दृष्टिरेवेति दृष्टिर्दर्शनं स्वप्रकाशज्ञानस्वरूपमित्यर्थः एतदुक्तं भवति दृश्यप्रपंचस्य तादात्म्याप
न्नं ज्ञानस्वरूपमेव प्रपंचस्याध्यस्तत्वेनावच्छिन्नं सत्तस्य दृष्टिरित्युच्यत इति ननु दृग्दृश्ययोर्भिन्नयोरभिन्नसत्ताक
त्वरूपं तादात्म्यमसिद्धमित्याशंक्याह दृश्यस्येति दृष्टिर्दर्शनं तस्माद्भेदे भिन्नसत्ताकत्वे इत्यर्थः अन्यथा सन्घ
ट इत्यादिरूपेण सद्रूपस्य ज्ञानस्य घटादेश्च सामानाधिकरण्यप्रत्ययो न स्यादिति भावः ज्ञानावदिति ग्रन्थ
स्यासिद्धमित्यर्थः अर्थस्वरूपमिति अर्थपदं तत्र परं दृश्यपर इति ज्ञातं केवल दूषितज्ञाना इत्यर्थः तथा चैत

सि॰ ले॰ टि॰ ५७

न तृतीये लक्षणेऽपि परमताविशेषइत्यभिप्रायेणाह सत्यत्वपक्षइति दृष्टिसृष्टिवादेष्वाशंकते नन्वेवमिति ज्ञानैक
निवर्त्यत्वादेः मिथ्यात्वस्वरूपत्वे सतीत्यर्थः अहंकारतद्धर्माणामपि उक्तरूपमिथ्यात्वं वियदादिवत्सिध्यतीति संबंधः
कल्पितत्वाभावेऽपीति प्रातिभासिकत्वाभावेऽपीत्यर्थः तत्सद्भावमहंकारादिपरं चिदात्मनोऽधिष्ठानत्वादिसमर्पणमादिपदा
र्थः अभिमतमिति भाष्यकारादीनामिति शेषः तथा च तत्संपादनादिप्रयत्नः सफलइति भावः अहंकारतद्धर्माणां के
वलसाक्षिवेद्यत्वेऽपि शुक्तिरजतादिवत् प्रातिभासिकत्वं वक्तुमयुक्तं व्यवहारकालेऽबाध्यत्वोपलंभादतो वस्तुगत्या ते

47

सत्यत्वपक्षे प्रपंचे उक्तरूपमिथ्यात्वाभावेन ततो भेदात् नन्वेवमहंकारतद्धर्माणामप्युक्तरूपमिथ्यात्वं
वियदादिवत्कल्पितत्वाभावेऽपि सिध्यतीति भाष्यटीकाविवरणेषु तदध्यासे कारणत्रितयसंपादनादिप्रयासो
व्यर्थ इति चेत् अहंकारादीनामपि केवलसाक्षिवेद्यतया शुक्तिरजतवत् प्रातिभासिकत्वमभिमतमिति
चित्सुखाचार्याः अभ्युपेत्यवादमात्रं तद्द्वितीयाधिष्ठानब्रह्मात्मप्रमाणस्यैव चैतन्यस्य प्रमादित त्वमकार
णत्रितयसंपादनग्रंथस्य चैतन्यस्य प्रमाकरणत्वादिकल्पनाभंगप्रसंगेन प्रौढिवादतयासरूपत्वादितिरा

षां प्रातिभासिकत्वाभावेऽपि तदभ्युपेत्य कारणत्रयसंपादनादिप्रयत्नः तैः कृतइति परिहारांतरमाह अभ्युपेत्येति
तद्भाष्यादिप्रातिभासिकत्वमभ्युपेत्यवचनमेव न वस्तुगतिमनुरुध्येत्यर्थः अद्वितीयाधिष्ठानब्रह्मात्मनि प्रमा
णं चैतन्यमिति प्रतिपादयत टीकाविवरणादिग्रंथस्य प्रौढिवादित्वस्य स्पष्टत्वादिति संबंधः प्रौढिवादित्वमुप
पत्तिमाह चैतन्यस्य प्रमाकरणत्वइति ब्रह्मप्रमाकरणत्वइत्यर्थः औपनिषदत्वश्रुतिअनुसारेण वेदांताना
मेव ब्रह्मप्रमाकरणकल्पनेत्यर्थः वेदांतजन्यब्रह्मप्रमायाः अपरोक्षत्वकल्पनमादिपदार्थः

उ॰ ५७

प्रपंचस्य ब्रह्मवत्पारमार्थिकसत्त्वे हेतुद्वयमप्रयोजकमतो नापसिद्धान्तापत्तिरित्याशयेन परिहरति शुक्तिरजतादिवदिति वि
यदादिप्रपंचे शुक्तिरजतादिवत्कल्पनासमसमयसत्त्वस्य दृष्टिसृष्टिवाद्यभिमतस्याभावेपि पारमार्थिकसत्त्वविरुद्धस्य मि
थ्यात्वस्याभ्युपगमादिति संबंधः वियदादिप्रपंचे कल्पनासमसमयसत्त्वाभावे कारणत्रयाजन्यत्वे हेतुः संप्रयोगस्य स्वप्न
भ्रमव्यापित्वाभावात् संप्रयोगस्थाने अधिष्ठानसामान्यज्ञानं निक्षिपति अधिष्ठानज्ञानेति मिथ्यात्वनिर्वचनं त्रेधा
दर्शयति ज्ञानैकेत्यादिना अधिष्ठानतत्त्वज्ञानमात्रनिवर्त्यत्वरूपस्यैतस्यार्थः सद्विलक्षणत्वमात्रे असत्यप्रसक्तिव्याप्तं अस
द्विलक्षणत्वमात्रे सति ब्रह्मण्यप्रसक्तिव्याप्तं अतः उभयोपादाने प्रपंचस्य तदुभयविलक्षणत्वं प्रमाणसिद्धमिति भावः शुक्ति

शुक्तिरजतादिवत्संप्रयोगसंस्कारदोषरूपेणाधिष्ठानज्ञानसंस्कारदोषरूपेण वा कारणत्रयेणाजन्य
त्वात्कल्पनासमसमयसत्त्वाभावेपि ज्ञानैकनिवर्त्यत्वरूपस्य सदसद्विलक्षणत्वरूपस्य प्रतिपन्नोपाधिगतत्रै
कालिकनिषेधप्रतियोगित्वरूपस्य वा मिथ्यात्वाभ्युपगमात्

पन्नेति ब्रह्मणि प्रतिपन्नस्य प्रतीतस्याध्यारोपितस्येति यावत् ब्रह्मोपाधिरधिष्ठानं तत्र ब्रह्मणि तस्य त्रैकालिको
निषेधः श्रुतिगम्योऽस्ति ताभावोस्ति तत्प्रतियोगित्वं तस्यास्तीति भावः तत्राद्यलक्षणे घटादेः सत्यत्वपक्षेपि
घटादिकं नाशयामीत्यादिज्ञानं निवर्त्यत्वसत्त्वादेकपदं दत्तं ज्ञानमात्रनिवर्त्यत्वस्य च सत्यत्ववादिभिरनंगीकारा
त्तन्न सत्यत्वपक्षाविशेषः तथा प्रपंचे परैः सद्रूपत्वांगीकारेण सद्विलक्षणत्वानंगीकारात् द्वितीयलक्षणेपि न
सत्यत्वपक्षाविशेषः प्रपंचस्य तदुपादाने ब्रह्मणि सिद्धांते उक्तवद्घटाद्युपादाने वस्तुनि घटादेस्त्रैकालिकनिषेधस्य

सि. ले.
टि.
५८

इदानीं स्वप्नादिपदार्थानामपि सत्यार्थक्रियाकारित्वदर्शनात्तद्दृष्टान्ततैवासम्भवमिति परिहारान्तरमाह अद्वैतेति प्रबोध
बाध्या अर्थक्रिया प्रातिभासिकी प्रबोधाबाध्यार्थक्रिया स्वप्नकालीनापि व्यावहारिकसत्यैवेति विभागस्तथा च स्वाप्नप
दार्थानां प्रातिभासिकार्थक्रियाकारित्वमात्रं केवलं न भवति किं तु व्यावहारिकार्थक्रियाकारित्वमप्यस्तीति स्वप्नाङ्गनादी ।
नां प्रबोधाबाध्यसत्त्वजनकत्वस्य स्वप्नभुजङ्गादीनां प्रबोधाबाध्यभयकम्पादिजनकत्वस्य च दर्शनादेवं च व्यावहारिकज्ञा
नाबाध्यपदार्थानां व्यावहारिकार्थक्रियाकारित्वं कैमुतिकन्यायसिद्धमिति मिथ्यात्वपक्षेनार्थक्रियाकारित्वानुपपत्तिरिति ।
भावः ननु स्वाप्नभुजङ्गमाङ्गनादिरूपविषयाणां प्रबोधबाध्यत्वदर्शनात् तत्कार्यभयसुखादीनां कथं प्रबोधाबाध्य

48

अद्वैतविद्याचार्यास्त्वाहुः स्वाप्नपदार्थानां न केवलं प्रबोधबाध्यार्थक्रियामात्रकारित्वं स्वाप्नाङ्गनाभुजङ्गमादे
नां तदबाध्यसुखभयादिजनकत्वस्यापि दर्शनात् स्वाप्नविषयजन्यस्यापि हि सुखभयादेः प्रबोधानन्तरं न बा
धोऽनुभूयते प्रत्युत प्रबोधानन्तरमपि मनःप्रसादशरीरकम्पादिना सह तदनुवृत्तिदर्शनात्स्वाप्नाङ्गनापि सत्यमेवावबोधि

टि प

तमिममर्थं व्याह स्वाप्नविषयेति नहि प्रबोधानन्तरं स्वप्नकाले सुखभयादिकं मम मा भूदिति सुखभयादेर्बाधोऽनु
भूत इत्यर्थः प्रत्युतेति वर्तमानसुखानुभवकार्यं मनःप्रसादः वर्तमानभयदुःखानुभवकार्यं गात्रकम्पादिः ततश्च
प्रबोधानन्तरमनुवर्तमानत्वेन गमकं मनःप्रसादत्वादितया तावत्तदनन्तरमनुवर्तमानसुखभयादेः सत्त्वात् प्रबोधात्
प्रागपि तस्य सत्यत्वं निश्चीयत इत्यर्थः स्वप्नकालीनमपि सुखभयादिकं जाग्रत्सुखादिवद्व्यावहारिकसत्यमेव
न प्रातिभासिकं प्रबोधानन्तरं बाधाभावात् तदनन्तरमप्यनुवर्तमानत्वाच्चेति निष्कर्षः

उ.
५८

प्रपंचस्य परमार्थत्वे पूर्वमर्थक्रियाकारित्वमप्रयोजकमिति सूचितं तदयुक्तं मिथ्याभूतस्य शुक्तिरूप्यादेः स्वकार्यार्थ
क्रियाकारित्वादर्शनादिति मत्वा शंकते नन्विति अर्थक्रियाकारित्वं सत्यत्वव्यभिचारीति परिहरति स्वप्नवदिति
स्वाप्नजलादाववगाहनादिरूपार्थक्रियाकारित्वमस्ति तत्र सत्यत्वं नास्तीति व्यभिचार इत्यर्थः नन्वर्थक्रिया।
कारित्वमात्रं न हेतुः किंतु सत्यार्थक्रियाकारित्वं तच्च स्वाप्नजलादौ नास्तीति न व्यभिचार इति शंकते नन्विति अ
समेव न तु सतीत्यर्थः असत्येवेति पाठे असत्या न तु सत्येत्यर्थः तर्हि प्रपंचः सत्यार्थक्रियाकारित्वादित्यत्र हे
त्वसिद्धिमाह सिद्धांती किंत्विति जाग्रज्जलादिसाध्या सार्थक्रिया सत्या किमिति संबंधः त्वया इत्यवधारणे किं

ननु दृष्टिसृष्टिवादे सृष्टिदृष्टिमिथ्यात्वसंप्रतिपत्तेः कथं मिथ्याभूतस्यार्थक्रियाकारित्वं स्वप्नवदि
ति ब्रूमः ननु स्वाप्नजलादिसाध्यावगाहनादिरूपार्थक्रियाऽसत्यैव किं तु जाग्रज्जलादिसाध्या
सा सत्या अविशिष्टमुभयत्रापि स्वसमानसत्ताकार्थक्रियाकारित्वमिति केचित्

आहुः असत्येत्यर्थः सा सत्या न भवत्येवेत्यर्थः अतो हेतुत्वसंप्रतिपत्तिपरिहाराय अर्थक्रियाकारित्वमात्रं सत्यत्वप्रयो
जकं वाच्यं तच्च स्वाप्नजलादावस्त्येवेति व्यभिचारतादवस्थ्यमिति भावः ननु स्वाप्नजलादौ सत्यार्थक्रिया।
कारित्वाभावेऽपि स्वसमानसत्ताकार्थक्रियाकार्थक्रियाकारित्वमस्त्येव तर्हि जाग्रत्प्रपंचस्यापि तदस्तु नैतावता त
दभिमतपरमार्थसत्यत्वसिद्धिरित्याशयेन परिहरति अविशिष्टमिति उभयत्रापीति जाग्रत्स्वप्नावस्थाद्वयेऽपीत्य
र्थः स्वपदं अर्थक्रियाहेतुभूतवस्तुपरं स्वप्नवदिति ब्रूम इति समाधाने स्वप्नतावदर्थक्रिया समाना भवति जागरेऽ
सा सत्येति देश्यशंकायां प्रतिवंद्या केषांचित्समाधानं दर्शितं

सि-ले.
द्वि.
५९

दर्शनादित्यादिना कामिन्याः दर्शनात्तस्याः स्पर्शने तस्या एव यदा स्पर्शनात् पाणिना स्पर्शने सुखविशेषस्यानुभवसिद्धत्वेनेति
संबंधः भुजंगमस्यामर्मस्थले पुच्छादौ स्पर्शनात् मर्मस्थले शिरसि स्पर्शने च भयविशेषस्यानुभवसिद्धत्वेनेति संबंधः
स्वप्नेपीति यथा जागरे सुखविशेषभयविशेषादेर्दर्शनस्पर्शनादिरूपवृत्तिविशेषविशिष्टविषयापरोक्ष्यजन्यत्वेन ब
विषयापरोक्ष्यमात्रजन्यत्वं तन्मात्रस्यैकरूपत्वेन कार्यविशेषाप्रयोजकत्वात् तथा स्वप्नेपि तथा च तत्तद्विषयापरोक्ष
मात्रस्य साक्षिरूपस्य समत्वेपि सुखभयादिजनकस्य प्रातिभासिकदर्शनस्पर्शनादिवृत्तिविशेषविशिष्टस्य तत्तद्विष

49

दर्शनात् स्पर्शनस्पर्शने कामिन्या यदा स्पर्शनात् पाणिना स्पर्शने भुजंगमस्यामर्मस्थले स्पर्शनात् मर्मस्थले स्प
र्शने च सुखविशेषस्य भयविशेषस्य चानुभवसिद्धत्वेन स्वप्नेपि तत्तत्सुखभयादिविशेषस्य कल्पितदर्शन
स्पर्शनादिविशेषजन्यत्वस्यैव वक्तव्यत्वादिति तथा जागरे घटादिप्रकाशानन्तरं तत्र तमःप्रसरणान्तरं निरीक्ष
माणालोकवदपवरके सद्यः प्रविष्टेन कल्पितस्य संततमसस्य प्रसिद्धसंततमसोऽनिवर्तकप्रकाशरहितत्वं दृष्टं ते
नतं प्रति घटाद्यावरणं दीपाद्यानयनेन तदपसरणं तत्र यत्नेन नरावरणमित्यादिदर्शनादिमपि केचित्

यापरोक्ष्यस्य प्रातिभासिकत्वात् प्रातिभासिकत्वाद्व्यावहारिकसुखभयादिसंभवतु इत्यर्थः एवं स्वप्नावस्थायामसत्यास
त्यार्थक्रियासमुदाहृत्य जागरेपि तामुदाहरति तथेति प्रकाशानन्तरमिमाम: तत्र तमेरपवरके सद्यः प्रकाशान्तरैः निरीक्ष्यमा
णालोकः तद्धीत्यर्थः अपवरकं स्वल्पगृहं तत्र यालोका सत्वप्रकाशव्याहृत्तये तु तदन्तरं निरीक्ष्यमाणत्वविशेष
णादृष्टमित्येतत्प्रपंचयति तेनेति संततमसेनेत्यर्थः अपिपाहृ सतथा जागरेपीति संबंधः ॥

उ.
५९

स्वाप्नस्वाप्नभयादेः सत्यत्वेऽगमकांतरमाह अतएवेति स्वाप्नभयादेः प्रातिभासिकत्वादेवेत्यर्थः रागद्वेषयोः सत्यस्वप्नदृः ए
गोचरत्वनियमादितिभावः ननु स्वप्ने सर्वस्य वासनामात्रत्वात्कथं सत्यस्य भयादेः संभव उत्पत्तआह संभवतिचेति तदे
तत्सत्वयेन स्वप्ने पश्यतीतिश्रुत्यनुसारेण कल्पित रज्जुकार्येर्मानसवृत्तिरूपज्ञानस्वीकारात्तद्वदंतःकरणपरिणामरू
पभयादेर्व्यावहारिकस्य संभवः तदतिरिक्तपदार्थानामेव वासनापरिणामत्वेन प्रातिभासिकत्वाभ्युपगमादितिभा
वः ननु स्वाप्नभयादिकं न भुजंगमांगनादिपदार्थजन्यं किंतु तज्ज्ञानजन्यं तथा च तज्ज्ञानस्य सत्यत्वादसत्यात्सत्यस्या
पिकार्यस्य जन्मस्वप्नेऽदृष्टमित्यनुपपन्नमितिशंकते नचेति तज्ज्ञस्येदेवेतिवदतावक्तव्यं किं तन्मनोमात्रजन्यवृत्तिरू

अतएवप्राणिनां पुनरपि भयादिजनकविषयगोचरस्य स्वप्नेवांछापनाहदृशो स्वप्नेचप्रद्वेषः संभवतिच स्वप्नेज्ञान
वदंतःकरणवृत्तिरूपस्य स्वाप्नभयादेरुदयः ननत्वस्वांगनादिज्ञानमेव स्वाप्नादिजनकं तच्च सदेवेति वाच्यं
तस्यापि दर्शनस्पर्शनादिरूपस्य स्वप्नप्रपंचसाक्षिण्यध्यस्तस्यकल्पनामात्रसिद्धत्वात् नचस्य परतोद्विषयस्य
चक्षुरादिवृत्तित्वः सत्याभवंति नचतद्विषयापरोक्षमात्रं स्वाप्नजनकं तच्च साक्षिरूपं सदेवेति वाच्यं

यं किं चक्षुरादिजन्यवृत्तिरूपं केवलसाक्षिरूपं वाद्याद्ये पि किं वृत्तिमात्रं भयादिहेतुरुत तत्त्वान्भुजंगमादिरूपवि
षयविशेषितं नाद्यः यत्किंचिज्ज्ञेय वृत्तिज्ञानादपि भयादिप्रसंगात् नद्वितीयः वृत्तिमात्रस्य सत्यत्वेपिविषय
स्यासत्यत्वात्तद्विशिष्टस्यापि प्रातिभासिकत्वान्न्यथा च प्रातिभासिकज्ञानाद्व्यावहारिकार्थक्रियोत्पन्नेति तदुदाहर
णं भवत्येवेति मत्वाद्यपक्षविकल्पनत्रयमयुक्तमित्येतद्दूषयति नत्स्यापीति ज्ञानस्यापीत्यर्थः ननुचक्षुरादिज
न्यमेवदर्शनस्पर्शनादिवृत्तिरूपसत्यज्ञानं ततो नोपपत्तेर्न तत्राह नहीति वृत्तीयशंकते नचतदिति दूषयति

सि. ले.
द्वि.
५०

प्रयोजकेति प्रसिद्धोदकस्य शुचितार्थक्रियापानादिरूपा तस्या उदकत्वजातिः प्रयोजिका दन्यत्र पानादेरदर्शनात्तथाप्र
सिद्धरजतादेरुचितार्थक्रियाकटकादिलक्षणा तत्र च रजतत्वादिकं मृदादौ कटकाद्यर्थक्रियादर्शनादिति भावः तद
प्रसंगादिति प्रसिद्धोदकाद्युचितार्थक्रियाकारित्वप्रसंगाभावादित्यर्थः मरीचिकोदकादावर्थक्रियाकारित्वप्रयो
जकजातिमभ्युपगम्याप्युक्तातिप्रसंगं परिहरति तत्रापीत्यादिना मरीचिकोदकादावपीत्यर्थः अन्यथेति तत्प्रज
लत्वादिजात्यभावे सतीत्यर्थः तत्रेति मरीचिकोदकादावधिष्ठानावच्छेदकजलत्वादिवैशिष्ट्यभानं विना तद्दर्शनस्त

प्रयोजकोदकत्वादिजात्यभावादेव तदप्रसंगात् तत्राप्युदकत्वादिजातिरस्त्येव पानादेस्तु शिष्टाज्ञैर्विभ्रम
विरोधादुदकार्थिनस्तत्र प्रवृत्त्यभावप्रसंगाच्चेति प्रातिभासिके पूर्वदृष्टसजातीयव्यवहारानुरोधिनां मते
क्वचिदधिष्ठानविशेषज्ञानेन समूलाध्यासनिवृत्तिसंभवात् क्वचिदधिष्ठानसामान्यज्ञानोपरमेणैकैकस्या ।
ध्यासनाशात् क्वचिच्छुक्त्यादौ चक्षुषा वह्न्याद्यध्यासस्थले दाहपाकत्वादिप्रयोजकस्योष्णस्पर्शादेरनध्यासा
च्चतत्तत्कार्यक्रियाभावोपपत्तेः

च प्रवृत्तिर्न संभवतीति भावः किंच शुक्तिरजतादौ सत्यरजतादौ च रजतत्वादिजातेरेकस्या भावे प्रातिभासिकाध्यासे
षु पूर्वदृष्टसजातीयव्यवहारो भाष्यादिगतो न स्यात्तदनुरोधेनापि तत्र जातिरंगीकर्तव्येत्याशयेनाह प्रातिभासिक
इति क्वचिदिति दूरे मरीचिकोदकभ्रमानंतरं स्नानाद्यर्थं समीपगतस्य नेदं जलं मरीचिमात्रमिदमिति विशेष
दर्शने सति जलाध्यासस्य समूलाज्ञानेन सहैव नाशात् न ततोऽर्थक्रियोत्पत्तिरापादयितुं शक्येत्यर्थः क्वचिदधि
ष्ठानेति शुक्त्यादौ रजताध्यासानंतरं यत्र विशेषदर्शनमस्ति तत्र पूर्वोक्तरीतिर्यत्र तन्नास्ति तत्राधिष्ठानसामा
न्यज्ञानरूपकारणनाशेन रजताध्यासमात्रनाशसंभवात्तत्रापि क्रियोत्पत्तिरापादयितुं शक्येत्यर्थः ॥

उ.
५०

50

ग्रन्थेविति जगत्सत्यत्ववादिभिरपि हि अर्थक्रियाकारित्वमेव सत्यत्वमिति वक्तुं न शक्यते अर्थक्रियानुत्पत्तिदशापन्नघटादे
रसत्यत्वप्रसंगात् किंतु सत्यमर्थक्रियाप्रयोजकमिति वक्तव्यं तथा च किं सत्यमर्थक्रियाकारणमभिप्रेतं किं वा कारणतावच्छे
दकं नोभयथापीत्याह यानेत्यादिना जलादिपदं जलत्वादेरपि संग्राहकं बोध्यं उपयोगीति जलादिस्वरूपं कारणत।
याजलत्वादिस्वरूपं कारणतावच्छेदकं तयोरिति विभागः मात्रपदव्यवच्छेद्यमाह न तज्ज्ञानमिति सत्यत्वस्य जलादिस्वरूपा
तिरिक्ततया कारणताभावादिति प्रसक्तं तया कारणतावच्छेदकत्वाभावाच्चेत्यर्थः किं तेनेति सत्यत्वेनेत्यर्थः तथा च
सत्यत्वाभावेपि प्रपंचस्यार्थक्रियाकारित्वसंभवान्न मिथ्यात्वविरोध इति भावः ननु सत्यत्वस्य तदर्थक्रियाकारिताया

ग्रन्थे तु पानावगाहनाद्यर्थक्रियायां जलादिस्वरूपमात्रमुपयोगि न तज्ज्ञानं सत्यत्वं तत्स्वकारणत्वं तदवच्छेदक
तयोरभावादिति किं तेन न चैवं सत्यमरुमरीचिकोदकस्यापि रजतादेरपि प्रसिद्धोदकाद्युचितार्थक्रियाका
रित्वप्रसंगः मरीचिकोदकादावुदकत्वादिजातिर्नास्तीति तद्विषयकभ्रमस्योदकशाब्दोल्लेखित्वं तदुल्ले
खिपूर्वानुभवसंस्कारजन्यत्वप्रयुक्तमिति तत्तच्छुद्धिकारादिमतेत्यर्थक्रिया

मतिप्रसक्तत्वेप्यर्थक्रियाकारित्वसामान्यसत्वमनतिप्रसक्तत्वादवच्छेदकमेवान्यथाबाधकं शंकते नचैवं सतीति स
त्वस्य कारणतासामान्यानवच्छेदकत्वे सतीत्यर्थः एवं सति प्रसंगापत्तिं न चेत्यत्र हेतुमाह मरीचिकोदकादाविति
मरुत्वभूमिसंसृष्टासु मरीचिकासु समारोपितं तोयं मरीचिकोदकं तस्य तोयाभासत्वात् न ततो पत्वं नास्ति कथं तर्हि तोयमिदमु
दकमिति शाब्दोल्लेखि प्रत्ययस्तत्राह तद्विषयकभ्रमस्येति मरीचिकोदकविषयकभ्रमस्येत्यर्थः
उदकशाब्दोल्लेखीयः पूर्वानुभवः सत्योदकविषयकः तज्जन्यसंस्कारजन्यतान्मरीचिकोदस्य तत्प्रयुक्तं तच्छब्दो।

सि. ले.
द्वि.
५२

मिथ्याभूतमिति सप्रपंचत्वं प्रपंचतादात्म्यं निष्प्रपंचत्वं च प्रपंचात्यंताभाववत्त्वं तच्च वास्तवं व्यावहारिकप्रपंचात्यंताभावस्य ब्रह्म
णि परमार्थत्वाभ्युपगमादतः सप्रपंचत्वनिःप्रपंचत्वयोर्व्यापकयोरविरोधवत्वामि मिथ्यात्वसमत्वयोरप्यविरोध इति भावः मि
थ्यात्वधर्मो मिथ्याभूत इति पक्षमेव परिगृह्य समाधत्ते ब्रह्मोक्तमिति समानस्वभावमिति समानसत्ताकमित्यर्थः वियदादि
प्रपंचस्य व्यावहारिकसत्ताक इति भावः ननु रोपितघटत्वादेरारोपाधिष्ठानभूते ब्रह्मण्यपेक्षविरुद्धघटत्वादिप्रतिक्षेपक ।
त्वादर्शनात् सत्यमेव घटत्वादिसापेक्षविरुद्धधर्मप्रतिक्षेपकत्वेन कल्पनीयमिति कथं मिथ्याभूतं मिथ्यात्वं स्वधर्मिणि

52

मिथ्याभूतं ब्रह्मणः सप्रपंचत्वं निःप्रपंचत्वविरोधीति तद्व्यावृत्त्या मिथ्याभूतमिथ्यात्वस्य सत्यत्वाविरोधित्वात्
ब्रह्मोक्तमद्वैतदीपिकायां वियदादिप्रपंचसमानस्वभावं मिथ्यात्वं तच्च धर्मिणः सत्यत्वप्रतिक्षेपकं धर्मस्य स्ववि
रुद्धधर्मप्रतिक्षेपकत्वे हि भवत्वादिसिद्धं धर्मिसमसत्त्वं तत्र च न पारमार्थिकत्वं घटत्वादिप्रतिक्षेपके च तादृ
वस्यावं पारमार्थिकत्वासंप्रतिपत्तेः ब्रह्मणः सप्रपंचत्वं न धर्मिसमसत्ताकमिति न निःप्रपंचत्वप्रतिक्षेपकं

प्रपंचसत्यत्वप्रतिक्षेपकं भवेदित्याशंक्याह धर्मस्येति घटत्वादौ परमतरीत्या पारमार्थिकत्वरूपं सत्यत्वं मलितपाधर्मि
समानसत्ताकत्वं मतद्वयसंमतमलितपा च घटत्वादिधर्मस्य स्वाभाविकापेक्षविरुद्धधर्मप्रतिक्षेपत्वे प्रयोजकं कां
न्तायां संप्रतिपन्नमेव प्रयोजकं कल्पनीयं न विप्रतिपन्नमित्यर्थः दृष्टान्तं विघटयति ब्रह्मण इति न धर्मीति ब्रह्मणः
पारमार्थिकत्वात् सप्रपंचत्वस्य च व्यावहारिकत्वादिति भावः

उं.
५२

स्वप्नवदिति भ्रमइत्यादि पूर्वोक्तेऽर्थे प्रातिभासिकपदार्थानामपि अर्थक्रियाकारित्वस्य दर्शितत्वादुक्तातिप्रसंगेनुष्टाप
त्तिरपीत्याह कचित्कासांचिदिति इदानीं प्रातिभासिके अर्थक्रियाकारित्वराहित्यमनुपेत्यापि सत्यत्वंकारणतावच्छे
दकं नवक्तव्यमित्याह मरीचिकोदकादेरिति यथाश्रोत्रार्थः सुगमं मिथ्यात्वश्रुतीत्यर्थः तद्रूपा इत्यत्र रजतादिकार्य
संभवति तद्विलक्षणं शुक्तिरजतानन्तरं संभवतीत्यन्वयव्यतिरेकसहकृतप्रत्यक्षेणाहितत्वात्सत्वमर्थक्रियाका
रितायामवच्छेदकत्वात्संतताह यांचसत्वं मिथ्यात्वविरुद्धकालत्रयाबाध्यत्वरूपं भवतीति तत्सप्रत्यक्षायोग्यत्वाद्दृ

कचित्कासांचिदर्थक्रियाणां मिथ्याभूतत्वाच्च मरीचिकोदकादिव्यावर्तकस्यार्थक्रियोपयोगिरूपस्यवक्त
व्यत्वेच श्रुतिविरुद्धं प्रत्यक्षादिनाकुण्ठे हत्रिकालाबाध्यत्वं विहायदोषविशेषाजन्यत्वजनकतादेरेव रजत
युक्तितार्थक्रियोपयोगिरूपस्य वक्तुं शक्यत्वाच्च तस्मान्मिथ्यात्वेप्यर्थक्रियाकारित्वसंभवान्मिथ्यैवप्रप
ञ्चोनसत्यइति ननु मिथ्यात्वस्य प्रपंचधर्मस्य सत्यत्वे ब्रह्माद्वैतहानिः तदपि मिथ्यैव वक्तव्यमिति कुतः प्रपंच

स्यैव किंचित्तदवच्छेदकं वाच्यमित्याशयेनाह प्रत्यक्षादिनेति प्रत्यक्षादिपदमनुमानादिसंग्रहार्थं प्रत्यक्षश्रुतिविरो
धेनानुमानादेरपि प्रपंचकालत्रयाबाध्यत्वरूपसत्वसाधकस्यानुदयादेव तस्यानुमानादिनापि दुर्ग्रहत्वमुक्तमितिवा
र्थः रजतत्वादेरितिव्यवहारकालीनबाधरहितरजतत्वादिकमादिपदार्थः तस्मादिति सत्यत्वस्यार्थक्रियांप्रत्यप्रयो।
जकत्वादित्यर्थः प्रकारांतरेण प्रपंचस्य सत्यत्वंशंकते नन्विति वक्तव्यमित्यत्र ब्रह्मसिद्धांतिनेतिशेषः ननु मिथ्याभूत
स्यापि मिथ्यात्वस्य स्वाश्रयप्रपंचस्वविरोधि सत्यत्व प्रत्यक्षेपवानात्तस्य सत्वज्ञातिरपरिहार्येत्याशंक्याह सिद्धांतमतेह

सि॰ ले॰
द्वि॰
५२

योधर्मो यस्य धर्मिणो धर्मिगोचरसाक्षात्कारानिवर्त्यः स धर्मः तत्र धर्मिणीत्यन्वयार्थः उक्तप्रयोजके हेत्वंतरमाह शुक्त्यादि
ति तस्मद्शुक्तिपरं अशुक्तित्वविरोधीति अशुक्तित्वस्य प्रतिक्षेपकमित्यर्थः तत्रैवेति शुक्तावेव रजततादात्म्यरूपो धर्मो
वर्त्तते स च स्वविरुद्धस्य रजतत्वस्य रजतभिन्नत्वस्य शुक्तिगतस्याविरोधी प्रतिक्षेपको न भवतीत्यत्र हेतुगर्भविशेषणं ।
तन्निवर्त्यमिति शुक्तिसाक्षात्कारनिवर्त्यमित्यर्थः एवं चेति स्वाश्रयसाक्षात्कारानिवर्त्यधर्मस्य स्वाश्रये स्वविरुद्धधर्म

52

शुक्तौ शुक्तितादात्म्यं तद्विषयप्रमासाक्षात्कारानिवर्त्यम् अशुक्तित्वविरोधि न त्वेवं रजततादात्म्यं तन्निवर्त्यमरज
तत्वाविरोधीति व्यवस्थादर्शनात् एवं च मिथ्यात्वं कल्पितमपि प्रपंचसाक्षात्कारानिवर्त्यमिति सत्यत्वप्रति
क्षेपकमेव ब्रह्मणः स प्रपंचत्वं तु ब्रह्मसाक्षात्कारनिवर्त्यमिति न निःप्रपंचत्वप्रतिक्षेपकमिति एतेन शा
स्त्रगम्यस्य ब्रह्मणः सत्यत्वे शास्त्रयोग्यतापातः शास्त्रधीप्रामाण्यस्य च सत्यत्वं वक्तव्यं प्रातिभासिकयोग्यतावत्त्वा
ऽनाप्तवाक्येन व्यावहारिकार्थस्य व्यावहारिकयोग्यतावत्ताग्निहोत्रादिवाक्येन तात्त्विकार्थस्य वा सिद्ध्यभावे
न योग्यता समानसत्ताकस्यैव शास्त्रार्थस्य सिद्धिनियमात्

स्थितिविरोधित्वे प्रमाणेन निश्चिते स
तीत्यर्थः अनिवर्त्यमिति यथा शुक्तिसाक्षात्कारे सति शुक्तितादात्म्यं न निवर्त्यते तथा घटादिरूपप्रपंचसाक्षात्का
रे सति शुक्तिन्यायसिद्धं मिथ्यात्वं न निवर्त्तत इत्यर्थः चो यावत्स्वमपि वक्ष्यमाणहेतुनानिरस्तमित्याह एतेनेति शास्त्र
गम्यस्य ब्रह्मणः सत्यत्वे शास्त्र निष्ठयोग्यतापातः सत्यत्वं वक्तव्यमित्यत्र हेतुमाह योग्यता समानसत्ताकस्यैवेति वा
क्यार्थवाक्यनिष्ठयोग्यतयोः समानसत्ताकत्वनियमस्याभ्युपगमेति प्रातिभासिकयोग्यतावेति व्यावहारिकार्थस्य सि

ध्यभावेनेति संबंधः ॥

३॰
५२

ननु प्रपंचगतमिथ्यात्वस्य मिथ्यात्वपक्षेण व्यावहारिकमेव वाच्यं ब्रह्मज्ञानैकनिवर्त्यस्य मिथ्यात्वधर्मस्य प्रातिभासिकत्वपारमा
र्थिकत्वयोरयोगात् तस्य व्यावहारिकत्वेन प्रपंचगतं सत्यत्वं पारमार्थिकं सिध्यतीति तस्यापि सत्वं तद्वद्घटादि प्रमसिद्धस्याबाध
तत्वज्ञानमनुवर्तमानस्य प्रातिभासिकत्वायोगात् व्यावहारिकमिथ्यात्वधर्मवति प्रपंचे तत्सत्यत्वस्य व्यावहारिकस्यायोगाच्च
तथा च प्रपंचगतस्य सत्यत्वधर्मस्य पारमार्थिकत्वसिद्धौ धर्मिणः प्रपंचस्यापि पारमार्थिकत्वमनिवार्यमिति शंकायां तद्दूति
रितिकस्यचिच्चोद्यं वस्तुप्रमाणेहेत्वानिरस्तमित्याह अतएवेति नियमादिति मिथ्यात्वधर्मस्य धर्मिसमानसत्ताकत्वप्रयुक्ते
व्यावहारिकत्वस्यापेक्षमिथ्यात्वधर्मिणि प्रपंचे सत्यत्वपर्यवसायिनः प्रपंचसत्यत्वे पारमार्थिकत्वापादानस्य विरोधेनासंभ

अतएव मिथ्यात्वस्य व्यावहारिकत्वे तद्विरोधिनो प्रातिभासिकस्य प्रपंचसत्यत्वस्य पारमार्थिकत्वं स्यादिति निर
स्तं धर्मिसमसत्ताकस्य मिथ्यात्वस्य व्यावहारिकत्वे धर्मिणोऽपि व्यावहारिकत्वनियमात् अथवा योग्यसत्वविषय
साक्षात्काराऽनिवर्त्यो धर्मः स तत्रस्वविरुद्धधर्मप्रतिक्षेपकः

वादिमर्थः ननु प्रपंचे पारमार्थिकस्य सत्यत्वस्याभावे प्रातिभासिकव्यावहारिकसत्यत्वयोरपि प्राक्-निरस्तत्वात् तत्र सत्वानुभ
वविरोधः इति वाच्यं व्यावहारिकस्यैव सत्वस्य प्रपंचे स्वीकारेणानुभवविरोधाभावात् न च मिथ्यात्वसत्यत्वयोर्व्यावहारिकत्वेन
समानसत्ताकयोरेकत्र विरोधः इति वाच्यं मिथ्यात्वाविरुद्धस्य यावत्तत्वज्ञानं बाधरहितस्वरूपत्वलक्षणसत्वस्य प्रसत्वादि
विषयस्यासकृद्ज्ञातत्वादिति भावः सर्वं च ब्रह्मसत्तैव भातीयते न तद्व्यतिरेकेण व्यावहारिकं प्रातिभासिकं वा सत्वमस्तीति
मते धर्मिसमसत्वं तत्र मिति समाधानं न संभवतीति मत्वा समाधानान्तरमाह अथवेति धर्मस्य स्वविरुद्धधर्मप्रतिक्षे
पकत्वे हि स्वाश्रयसाक्षात्कारानिवर्त्यत्वं प्रयोजकं कल्प्यते संप्रतिपन्नत्वपारमार्थिकत्वं तत्स्यास्माकमसंप्रतिपत्तेरिति भावः

सि॰ ले॰
द्वि॰
प॰

53

ब्रह्मणः समस्तेऽपि तज्ज्ञाननिष्ठप्रामाण्यस्य न सत्यत्वं सिध्यतीति तस्य ब्रह्ममात्रत्वाभावादित्याह घटज्ञानेति तदतिरिक्तेति ब्र
ह्मत्ववति ब्रह्मत्वप्रकारकानुभवत्वरूपतत्प्रामाण्यस्यापि ब्रह्मातिरिक्तब्रह्मत्ववैशिष्ट्यघटितत्वेनेत्यर्थः यद्वि ब्रह्मज्ञा
नगतं प्रामाण्यमबाधितार्थानुभवत्वरूपं तच्च विवक्षितविवेकेन बाधायोग्यविषयत्वरूपमात्रं पर्यवस्यति तन्मात्रप
र्यवसितप्रामाण्यस्य चाद्वैतार्थपरवेदान्तेषु ब्रह्ममात्रत्वमेव न तदतिरिक्तघटितत्वमिति ब्रह्मज्ञानप्रामाण्यस्य सम
त्वं संभवतीत्युच्यते तर्हि ब्रह्मगोचरयथार्थप्रामाण्यस्य समस्तेऽपि न तवेष्टसिद्धिः तस्य ब्रह्ममात्रत्वेन ब्रह्मातिरिक्त
समवस्त्वसिद्धेरिति भावः तस्मादिति विरोधाभावादित्यर्थः प्रपंचत्वस्य मिथ्यात्वपक्षे प्रत्यक्षादिविरोधाभावा

घटज्ञानप्रामाण्यस्य घटत्ववत्त्वसत्यभूतब्रह्मज्ञानप्रामाण्यस्यापि तदतिरिक्तघटितत्वेन मिथ्यात्वोपपत्ते
श्च तस्मादारंभणाधिकरणोक्तन्यायेन कृत्स्नस्य वियदादिप्रपंचस्य मिथ्यात्वं वज्रलेपायते नन्वारंभण
शब्दादिभिरचेतनस्य वियदादिप्रपंचस्य मिथ्यात्वसिद्धावपि चेतनानामपवर्गभाजां मिथ्यात्वायोगाद्देह
नीय ब्रह्मणि समन्वयो न युक्तः न च तेषां ब्रह्माभेदः प्रागुक्तो युक्तः परस्परभिन्नानां तेषामेकेन ब्रह्मणा
भेदासंभवात् न च तद्भेदासिद्धिः सुखदुःखादिव्यवस्थयातत्सिद्धेरिति चेत् ॥

निरूपतः इदानीं सर्वेषु शरीरेष्वात्मन एकत्वपक्षे सुखदुःखादिव्यवस्थाविरोधमाशंक्य तन्निरूपयितुं प्रसंगमाह न
न्वादित्यादिना अपवर्गेति जीवानां स्वरूपेण मिथ्यात्वे तत्त्वज्ञानेन निवृत्त्यापत्त्या तेषां मुक्तिभाक्त्वं न स्यादित्यर्थः न युक्तो
वानां ब्रह्माभेदस्य वेदान्तप्रमाणकस्य प्रथमपरिच्छेदावसाने उक्तत्वात् ब्रह्मणो नाद्वितीयत्वानुपपत्तिरित्याशंक्य
निराकरोति न च तेषामिति जीवानां परस्परभेदासिद्धिमाशंक्याह न च तदिति एकस्य यदा दुःखं भवति तथा
जीवान्तरस्य सुखं भवतीति सुखदुःखव्यवस्था एवं रागद्वेषादिव्यवस्थाप्यनुभवसिद्धा दृष्टत्वात्तेषां परस्पर

सिद्धान्तलेश ८६

द्वि॰
पत्र

शाब्दानुगमस्य ब्रह्मणः सत्यत्वे ब्रह्मगोचरशाब्दज्ञाननिष्ठस्य प्रामाण्यस्य सत्यत्वं वक्तव्यमित्यत्र हेतुमाह अर्थाबाधरूपेति तथा च
वेदान्तार्थस्य ब्रह्मणः सत्यत्वस्य तत्प्रामाण्यतन्त्रत्वात् प्रामाण्यस्य सत्यत्वं वक्तव्यमिति भावः ननु ब्रह्मव्यतिरिक्तस्य निरुक्तयोग्यता
देः सत्यत्वसिद्धावपि पूर्ववाद्यभिमतं निखिलद्वैतसत्त्वं कथं सिध्यतीत्यत आह तथा चेति द्वैताबाधप्रभाव इति अद्वैतभंगाव
बाधप्रभाव इत्यर्थः वेदान्तशब्दनिष्ठयोग्यतायाः सत्यत्वं किं तस्याः शाब्दबोधरूपार्थक्रियाकारित्वसिध्यर्थमपेक्ष्यते किं वा ब्र
ह्मणः सत्यत्वसिध्यर्थं नाद्य इत्याह व्यावहारिकस्येति प्रपंचस्येति शेषः योग्यतायाः इति पंचमी सत्यस्य ब्रह्मणः सिद्धिः
शाब्दबोधः द्वितीये योग्यतायाः सत्यत्वाभावेऽपि ब्रह्मणः सत्यत्वं सिध्यतीत्याह ब्रह्मण इति अग्न्यादिपदं सत्यदादिसंग्रहार्थं

अर्थाबाधरूपप्रामाण्यस्य सत्यत्वे योग्यसत्यत्वाद्ययोगाच्च तथा च ब्रह्मातिरिक्तसत्यवस्तुसत्त्वेन द्वैताबाधप्रभा
व इति विपदादिप्रपंचोऽपि सत्योऽस्तीति निरस्तं व्यावहारिकस्यार्थक्रियाकारित्वस्य व्यवस्थापितत्वेन व्यावहा
रिकयोग्यतायाश्च अपि सत्यब्रह्मसिद्धिसंभवात् ब्रह्मपरे वेदान्ते सत्यादिपदसत्त्वाद्ब्रह्मसत्यत्वसिद्धेः अग्नि
होत्रादिवाक्ये तादृशपदाभावात् तत्सत्त्वेऽपि प्रबलब्रह्माद्वैतश्रुतिविरोधान्न तदसिद्धिरित्येवं वैषम्योपपत्तेः शा
ब्दार्थयोग्यतयोः समानसत्ताकत्वनियमस्य निःप्रमाणकत्वात्

तस्याग्निहोत्रादिधर्मस्यापि सत्या
दिपदात्सत्यत्वसिद्धिः स्यादिति नेत्याह अग्निहोत्रादीति ननु यो वै स धर्मः सत्यं वै तदिति धर्मेऽपि सत्यपदं श्रुतं तत्प्रश्न
कमस्तीत्यत आह तत्सत्त्वेऽपीति तदसिद्धिरिति यो वै स धर्म इति वाक्यस्याग्निहोत्रादौ परमार्थत्वप्रतिपादने तात्पर्यलि
ङ्गानामभावेनान्यपरस्य तस्य तत्परत्वेन प्रबलपाठे नस्युमावाधाद्धर्मस्य न ब्रह्मवत्परमार्थत्वसिद्धिरित्यर्थः श्रुता
वग्निहोत्रादेरवगतार्थत्वेन सत्यत्वमनूद्यमानावस्थत्वेन धर्मत्वं च विवक्षितं यो वै स धर्मः सत्यं वै तदिति सत्य

अंतःकरणस्येति तद्धर्माणामित्यत्र तत्पदमंतःकरणपरं एतदुक्तं भवति आत्मनश्चैतन्यरूपत्वेपि भेदकल्पनया चैतन्य
मात्मधर्मः तथाचात्मांतःकरणयोरैक्याध्यासे सति तयोर्धर्माणां चैतन्यकर्तृत्वादीनां सामानाधिकरण्यं संपद्यत इति न
तदनुभवविरोध इति चेतन इति चैतन्याश्रय आत्मा संसारी कर्तृत्वादिधर्मवान्न स्यादित्यर्थः चेतनस्य स्वतः संसाराश्र
यत्वाभावेपि बुद्धिनिष्ठस्य संसाराश्रयत्वस्य स्यादित्यनुभूयमानस्यात्मन्यारोपोपपत्तेः आरोपितस्तु संसाराश्रयत्वमस्ती
ति परिहरंति कर्तृत्वादीति अहंकारस्य चेतनेन सह ग्रंथितत्वोपलक्षितादात्म्यरूपो ध्यासस्तदधिष्ठानत्वमेवेत्यर्थः
संसार इति संसाराश्रयत्वभ्रांतिप्रयोजक इत्युपगमादित्यर्थः तावतैवेति उपायैः संसाराश्रयत्वमात्रेणेत्यर्थः भी

अंतःकरणस्य चेतनतादात्म्येनाध्यस्तत्वात्तद्धर्माणां चैतन्यसामानाधिकरण्यानुभवोपपत्तेः नचांतःक
रणस्य कर्तृत्वादिधर्माश्रयत्वे चेतनः संसारी न स्यादिति वाच्यं कर्तृत्वादिधर्माश्रयाहंकारग्रथिततादात्म्या
ध्यासाधिष्ठानभाव एव तस्य संसार इत्युपगमात् तावतैव भीषणत्वाश्रयसर्पतादात्म्याध्यासाधिष्ठाने र
ज्ज्वादावयं भीषण इत्यभिमानवदात्मनो नर्थाश्रयत्वाभिमानोपपत्तेः एतदभिप्रायेणैव ध्यायतीव ले
लायतीत्वहंकारविमूढात्मा कर्ताहमिति मन्यत इत्यादिश्रुतिस्मृतिदर्शनाच्च

षणत्वं भयहेतुत्वं तच्च सर्पधर्मः अभिमानो भ्रांतिः नचात्मनि दृष्टसंसाराश्रयत्वस्यात्मन्यारोपे अन्यथाख्यातिप्रसंग
इति वाच्यं अनुभूयमानारोपस्थले आरोप्याधिष्ठानयोः संसर्गस्यानिर्वचनीयस्योत्पत्त्युपगमेन तदप्रसंगादिति
भावः एतदिति बुद्धिनिष्ठसंसारस्यात्मन्यारोपाभिप्रायेणैवेत्यर्थः बुद्धौ ध्यायंत्यामात्मा ध्यायतीव भातितस्याम
वलेलायंत्यां चलंत्यामात्मा चलतीव न तु वस्तुतो ध्यानाद्याश्रय इति इवशब्दार्थः ध्यानादिग्रहणमशेषबुद्धिधर्मो
पलक्षणार्थं अहंकारेण कर्तृत्वाश्रयेण सह विमोहितादात्म्याध्यासमापन्नः सन्नात्मा स्वात्मानमहंकर्तेति

नन्वारंभणेत्यादिना श्रान्तं प्रतिपादीतमात्मभेदपक्षं प्रतिक्षिपति नेति उपपत्तेरिति नात्मभेदः प्रामाणिक इत्यर्थः ।
तदभेदेति आत्मभेद इत्यर्थः कथं घटादृष्टचिन्तामनुपपत्तिमाह नहीति तदतिरिक्तस्येति विरुद्धस्वभावद्वयः बोधाश्रया
तिरिक्तस्य कस्यचिदहमनुभवागोचरस्येत्यर्थः अंतःकरणमेवं बंधाश्रयोऽहमनुभवगोचरश्चेतनत्वात्मा तत्स्वरूपकूट ।
स्थत्वात् तथा चाश्रयभेदादेव धर्मव्यवस्थेति समाधत्ते अत एव केचिदाहुरिति मन एवेति मनोऽन्तःकरणं कामसंकल्पादी
नां तत्परिणामत्वात् सामानाधिकरण्यं विज्ञानमन्तःकरणं तन्नु तनोतीति यज्ञं यागादीन् कर्म आदिपदेन कामाद्युपसंह

नतेषामभेदेप्युपाधिभेदादेव तद्व्यवस्थोपपत्तेः ननूपाधिभेदेपि तदभेदानपायात् कथं व्यवस्था न सा
श्रयभेदेनोपपादनीयो विरुद्धधर्माऽसंकरस्तदतिरिक्तस्य कस्यचिद्भेदोपगमेन सिद्ध्यति अत एव केचिदाहुः ।
सिद्धमेवान्तःकरणोपाधिभेदेन स्वभावद्वयव्यवस्था कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्री
र्धीर्भीरित्येतत्सर्वं मन एव विज्ञानं यज्ञं तनुत इत्यादिभिः श्रुतिभिस्तस्यैव निखिलानर्थाश्रयत्वप्रतिपादना
दसंगोऽयं पुरुषः असंगो न हि सज्जत इत्यादिश्रुतिभिश्चेतनस्य सर्वात्मनोदासीन्यप्रतिपादनाच्च न चैवं सति
कर्तृत्वादिधर्मस्य चैतन्यसामानाधिकरण्यानुभवविरोधः

दिष्विनात इत्यादिश्रुतिर्या सा चिदात्मनः कूटस्थत्वे प्रमाणमाह असंगोऽयमिति असंगो न हि सज्जत इति संगाभो ।
गपत्वादित्यर्थः आदिपदेन साक्षी चेता केवलो निर्गुणश्च अनश्नन्नन्योऽभिचाकशीतीत्यादि श्रुतिसंग्रहः न चैवं स
तीति अंतःकरणस्यैव बंधाश्रयत्वे सतीत्यर्थः अहं कर्तास्म्यहं सुख्यहं दुःख्यहमनुपलभ इत्यादिरूपेणोपलब्धि
रूपचैतन्यस्य कर्तृत्वसुखदुःखबोध्यात्मकबंधसामानाधिकरण्यमनुभूयते तद्विरोध इत्यर्थः यथायो दग्धृता
दाहत्वेनाध्यस्ते रजते रजतत्वस्य इदंत्वसामानाधिकरण्यानुभवः तद्वदिति समाधत्ते ।।

सर्वशरीरेष्वात्मनि एकत्वे सुखादिव्यवस्था न स्यादिति पूर्ववाद्युक्तदोषे अन्यसमाधानमाह अन्येत्विति पूर्वोक्तं बुद्धेर्बं
धाश्रयत्वं दूषयति जडस्येति अनुपपत्तेरिति बंधस्य चेतनधर्मत्वप्रसिद्धिविरोधादिति भावः बुद्धेरेव कर्तृत्वं न चे
तनस्य तस्य कूटस्थत्वादिति सांख्यमतनिराकरणपूर्वकं चेतनस्यैव कर्तृत्वव्यवस्थापकसूत्रान्तरमाभाषेत्याह कर्तेति चे
तनः कर्ता भवितुमर्हति तथा सत्येव चेतनस्य कर्तृत्वप्रतिपादकं कर्ता विज्ञानात्मा पुरुष इति शास्त्रमर्थवद्भवति अन्यथान
र्थकं स्यादिति सूत्रार्थः चिदाभास इति ननु साक्षाच्चिदात्मैव तस्य कूटस्थत्वेन बंधपरिणामित्वायोगादिति भावः
चिदाभासस्य बंधाश्रयत्वेऽपि कथं व्यवस्था सिद्धिरत आह तस्येति बिंबप्रतिबिंबयोरभेदेऽपि प्रत्यंतःकरणं प्रति

अन्ये तु जडस्य कर्तृत्वादिबंधाश्रयत्वानुपपत्तेः कर्ता शास्त्रार्थवत्त्वादिति चेतनस्यैव तदाश्रयत्वप्रति
पादकसूत्रेणांतःकरणे चिदाभासो बंधाश्रयस्तस्य चासंगस्य बिंबाद्भिन्नस्य प्रत्यंतःकरणभेदाद्विद्वद
विद्वन्नविदुः विकर्त्रोः कर्त्रादिव्यवस्था न चैवमसत्यस्य बंधाश्रयत्वे बंधमोक्षयोर्वैयधिकरण्याप
त्तिः अस्य चिदाभासस्यांतःकरणावच्छिन्नस्वरूपतः सत्यतयासत्त्वेऽपि पारमार्थिकजीवेऽध्यस्ततया
कर्तृत्वाश्रयचिदाभासतादात्म्याध्यासाधिष्ठानभावत्वस्य बंधतदुपगमादित्याहुः

बिंबभेदो लभ्यते उपाधिभेदेन तन्निरूपितप्रतिबिंबानामपि कल्पितभेदाभ्युपगमात्तथापि प्रतिबिंबमिथ्यात्वमतए
व तस्य बंधाश्रयत्वं स्वाभाविकं संभवतीति तन्मिथ्यात्वमतमाश्रित्य नन्वेवमिति बिंबप्रतिबिंबयोर्भेदांगीकार इत्यर्थः
सत्यस्य बिंबचैतन्यस्य ब्रह्मभावलक्षणमोक्षाश्रयत्वे च सतीति शेषः मुक्त्यन्वयिनो बिंबभूतावच्छिन्नचैतन्यस्य त्व
तः संसाराश्रयत्वाभावेऽपि भ्रांतिसिद्धस्य तदाश्रयत्वस्य संभवान्न वैयधिकरण्यदोष इत्याह अस्येति चिदाभासगतबं
धस्य चिदात्मन्यध्यासे चिदात्मचिदाभासयोस्तादात्म्याध्यासे हेतुमाह अध्यस्ततयेति अस्य चिदाभासस्य परमार्थ

ननु बुद्धेः स्वतः संसाराश्रयत्वं चिदात्मनस्तु भ्रान्तिसिद्धं संसाराश्रयत्वमिति विभागाभ्युपगमे प्रतिशरीरं बुद्धिभेदात्तद्धर्मव्यव-
स्थासिद्धावपि प्रतिशरीरमात्मभेदाभावात्तत्कृतस्य बन्धस्य न व्यवस्था सिध्यतीति शंकते न चैकस्मिन्नेवेति विचित्राणां सुख-
दुःखानामाश्रयभूतानि तन्न्यदन्तःकरणानि तेषामेकस्मिन्नेवात्मन्यध्यासाद्धेतोर्य आत्मन्याभिमानिकः सुखदुःखादिः
तस्य व्यवस्था न सिध्यतीत्यर्थः एवमपीति बुद्धिधर्मव्यवस्थासिद्धावपीत्यर्थः यथाश्रयत्वस्यैव बुद्धिगतस्य परस्परभे-
दाश्रयस्यात्मन्यारोपोऽभ्युपगमात्तद्व्यवस्थेति परिहरति आध्यासिकेति नन्वारोपितेन भेदेन कथं व्यवस्थेत्याशंक्य व्यव-
स्थापनीयस्याध्यात्मन्यारोपितत्वात्तद्व्यवस्थापकत्वं तादृशभेदस्येत्याह यादृशमिति आत्मसाक्षिचैतन्ययोरभेदेऽपि भे-

न चैकस्मिन्नेवात्मनि विचित्रसुखदुःखाद्याश्रयतन्न्यदन्तःकरणानामध्यासादात्मन्याभिमानिकसुखदुःखादि-
व्यवस्थैवमपि न सिध्यतीति वाच्यं आध्यासिकतादात्म्यापन्नान्तःकरणगतानर्थजातस्यैव तत्कृतपरस्परभे-
दस्याप्यभिमानतश्चात्मोपलभ्यात्मनो यादृशमनर्थभाक्त्वं तादृशेन भेदेन तद्व्यवस्थोपपत्तेः एतेन सुखदुःखादीना-
मन्तःकरणधर्मत्वेऽपि तदनुभवः साक्षिरूप इति तस्यैकत्वात् सुखदुःखानुभवरूपभोगाव्यवस्था न सिध्यतीति
निरस्तं तन्न्यदन्तःकरणतादात्म्यापन्नात्तदन्तःकरणभेदेन भेदवतः साक्षिणस्तदन्तःकरणसुखदुःखाद्यनुभवरूप

देकत्वमपि त्वाकल्पितत्वं यथाश्रयस्यात्मन एकत्वप्रयुक्तो दोषो निरस्तः इदानीं साक्षिचैतन्यस्य सर्वशरीरेष्वेकत्वप्रयुक्तदोषमा-
शंक्य निराकरोति एतेनेति वक्ष्यमाणहेतुनेत्यर्थः तदनुभवश्चेति सुखाद्यनुभवश्चेत्यर्थः साक्षीति देवदत्तस्य यः सुखानु-
भवः स एव चेद्यज्ञदत्तस्यापि तदा देवदत्तस्य सुखानुभवकाले तमेव सुखानुभवमादाय यज्ञदत्तस्याप्यहं सुखीति भो-
गप्रसंग इत्यर्थः यथाश्रयत्वःकरणभेदस्यात्मन्यारोपः तथा साक्षिचैतन्यरूपे सुखाद्यनुभवेऽपि तत्कृतभेदारोपाभ्युपग-
मात्तन्न भोगाव्यवस्थेति परिहरति तत्तदिति भेदेनेति तत्तदन्तःकरणभेदेन साक्षिण्यारोपितेन भेदविशिष्टस्य

तेन तद्व्यवस्था

वेत्यर्थः धान्येन धनवानित्यत्रेव तृतीयासा-
क्षिण्यन्तःकरणभेदारोपे हेतुः ॥ तादात्म्या-
पन्नेति

सि-ले-
सि-
५९

न्वयिनः केवलात्मन्यप्यन्वयः सिद्ध इति । अंजसा बंधमोक्षयोः सामानाधिकरण्यमाह इतरेति । स्फटिकेति यथा लोहित्या
श्रयस्य जपाकुसुमादेः सन्निधानात् स्फटिके उपाधिगतलोहित्यापेक्षया तत्प्रतिबिंबभूतस्य लोहित्यांतरस्योत्पत्तिः तथा
चिदात्मनि बुध्यादिगतबंधापेक्षया अन्यस्य कर्तृत्वादिबंधस्याध्यासात्मकस्योपगमादित्यर्थः । न च बुध्यादौ साक्षिणानु
भूयमानस्य चिदात्मनि संसर्गमात्राध्यासोपगमेन वैयधिकरण्यशंकापरिहारसंभवात् तत्र बुध्यादिनिष्ठकर्तृत्वादि
सदृशकर्तृत्वप्रमुखबंधोत्पत्तिकल्पनं न प्रामाणिकमिति वाच्यं । बुद्धेर्गुणेनाराग्रमात्रो ह्यवर इति श्रुत्या अवरशब्दि

56

इतरे तु अस्तु केवलस्य चेतनः कर्तृत्वादिबंधाध्यासः स्फटिकलोहित्यन्यायेनांतःकरणस्य तद्विशिष्टस्य वा क
र्तृत्वाद्यध्यासस्य सन्निधानाच्चेतनेपि कर्तृत्वांतराध्यासोपगमात् । न च तस्यैकात्म्याद्व्यवस्थानुपपत्तिः उपाधिभे
दादेव तदुपपत्तेः । न चान्यभेदादन्यत्र विरुद्धधर्मव्यवस्थानुपपन्ना इति वाच्यं । मूलाग्रवृक्षोपाधिमात्रेण वृक्षे
संयोगतदभावव्यवस्थादर्शनात् । तत्तत्पुरुषकर्णप्रदेशोपाधिभेदेन श्रोत्रभावमुपगतस्याकाशस्य तत्तत्प्रश
ब्दोपलंभकत्वानुपलंभकत्वतारमंदेष्टानिष्टशब्दोपलंभकत्वादिवैचित्र्यदर्शनाच्चेत्याहुः ॥

तर्ह्येवमाराग्रमात्रशब्दितमल्पपरिमाणं बुद्धिगुणप्रयुक्तं बुद्धिपरिमाणहेतुकमिति प्रतिपादनेन तुल्यन्यायतया क
र्तृत्वादिकमपि बुद्धिधर्मसदृशमात्मन्युत्पद्यत इति अस्यार्थस्याप्रतीतेः समतत्त्वेन प्रामाणिकत्वात् । न च तस्येति कर्तृत्वाद्य
ध्यासाधिष्ठानस्यात्मन इत्यर्थः । मूलेति परमतेनेदं दृष्टांतद्वयं तद्द्वयं सिद्धांते मूलावच्छिन्नवृक्षस्याग्रावच्छिन्नवृक्षस्य
च काल्पनिकभेदाभ्युपगमेनैव संयोगतदभावस्योपगमात् । श्रोत्रेंद्रियस्य दिगारब्धत्वोपगमाच्चेति बोध्यं । तारेति
तारशब्दोपलंभकत्वमंदशब्दोपलंभकत्वेष्टशब्दोपलंभकत्वादिलक्षणस्य वैचित्र्यस्य दर्शनादित्यर्थः ॥

उ.
५९

सर्वशरीरेषु चिदात्मन एकत्वेपि न एककेवलस्यैव बंधाश्रयत्वं नोपपद्यते किंतु बुद्धिविशिष्टस्य चिदात्मनस्तथा च बंधाश्रयस्य
विशिष्टस्य प्रतिशरीरं भेदान्न सुखदुःखादिसांकर्यमिति मतांतरमाह अपरे त्विति विशिष्टस्य भोक्तृत्वे मानमाह आत्मेति
आत्मशब्दो देहपरः युक्तावात्मानमित्यध्याहार इति शब्दो द्वितीयासमानार्थकः ततश्च देहेंद्रियांतःकरणयुक्तमात्मानं भो
क्तारमाहुर्विद्वांस इत्यर्थः नन्वदेहस्य विशेषणतया भोक्तृकोटौ निवेशो न संभवति तस्यात्मनो भोगाश्रयत्ववच्छेदकतयाउपक
रणत्वादिंद्रियाणामपि भोक्तृकोटौ निवेशो न संभवति तेषामुपकरणमात्रत्वात् तस्य सत्त्वे तेषामभावेपि भोगदर्शनाच्च तस्मा
देहेंद्रिययुक्तस्यात्मनो भोक्तृत्वश्रुतिरनुपपन्नेत्याशंक्य युक्तपदोदितयोगं प्रयोगं दर्शयति सहकारित्वेनेति आ
त्मनि तावत्कामसंकल्पादयो नानुभूयंते ते च मनोधर्मत्वेन श्रुतिसिद्धास्तथा च कामादिमन्मनस्तादात्म्यं विनात्मनः कामा

अपरे त्वात्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः इति सहकारित्वेन देहेंद्रियैस्तादात्म्येन मनसा च युक्तचेतनस्य
भोक्तृत्वश्रवणादंतःकरणभेदेन तद्विशिष्टभेदाद्व्यवस्थानन्त्वेवं विशिष्टस्य बंधः शुद्धस्य मोक्ष इति वैयधिकर
ण्यं विशिष्टगतस्यैवं धर्मस्य विशेष्ये अनन्वयाभावात् विशिष्टस्यानतिरेकादित्याहुः

द्याश्रयत्वानुपपत्तेस्तत्तादात्म्येन तद्विशिष्टस्य भोक्तृत्वं युक्तमित्याशयेनाह तादात्म्येनेति ननु बुद्धिविशिष्टात्माके।
वलात्मनः सकाशाद्भिन्नः विशिष्टं केवलं न भवतीति प्रतीतेः विशिष्टं हंति केवलं प्रतियोगिकभेदस्य विशेष्यवृत्तित्व
नियमात्तथा च विशिष्टात्मगतस्य बंधस्य विशेष्यान्वयापत्तेपि मुक्त्यन्वयापि केवलचैतन्यैवं यानन्वयाद्वैयधिकरण्यं तादव
स्थ्यमिति तत्राह विशिष्टगतस्येति विशिष्टांतर्गतविशेष्यस्य केवलादनतिरेकादित्यर्थः अयं भावः लोके दंडविशिष्ट
पुरुषे केवलपुरुषाभेदस्य प्रत्यभिज्ञायमानत्वात् तस्य प्रत्यभिज्ञाया बाधकाभावाच्च विशिष्टांतर्गतविशेष्यस्य केवलस्य
च स्वाभाविकमेकत्वं विशिष्टत्वाविशिष्टत्वरूपभेदेन काल्पनिको भेदश्च कल्प्यते तथा च विशिष्टगतबंधस्य विशेष्या

तत्राद्यपक्षमादाय प्रतिवचनं निरूपयति अत्र केचिदाहुरिति तत्रान्वयव्यतिरेकौ प्रमाणयति शरीरावच्छिन्नेति भोगा
यतनं स्वावच्छेदकतासंबन्धेन भोगाश्रयः स च देहः तदवयवहस्तादिश्च भवतीत्याशयेनाह चरणेति अननुसंधान
मेव दर्शयति हस्तावच्छिन्न इति हस्तावच्छिन्नात्मनः पादावच्छिन्नात्मगतदुःखानुसंधानत्वाभावे बाधकं शंकते
कथं तर्हीति अयं हस्तव्यापारो हस्तावच्छिन्नस्यानुसंधानान्न भवति किं तु तदनुसंधानादिति संबन्धः तस्य शरीराव
च्छिन्नस्य यच्चरणावच्छिन्नगतवेदनानुसंधानं तस्मादित्यर्थः ननु चरणावच्छिन्नगतवेदना कथं शरीरावच्छिन्ने।

अत्र केचिदाहुः भोगायतनाभेदतद्भेदाभ्यामनुसंधानाननुसंधानप्रयोजकाउपाधी शरीरावच्छिन्नवेदना।
यास्तदवच्छिन्नेनानुसंधानात् चरणावच्छिन्नवेदनाया हस्तावच्छिन्नेनानुसंधानाच्च हस्तावच्छिन्नोऽहं पादा
वच्छिन्नवेदनामनुभवामीत्यप्रत्ययात् कथं तर्हि चरणलग्नकंटकोद्धाराय हस्तव्यापारः नायं हस्तव्यापा
रो हस्तावच्छिन्नानुसंधानात् किं त्ववयवावयविनोश्चरणशरीरयोरभेदसत्त्वेन चरणावच्छिन्नवेदना
शरीरावच्छिन्नेनाहं चरणे वेदनावानित्यनुसंधीयत इति तदनुसंधानात् एवं चैत्रमैत्रशरीरयोरभेदा
भावाच्चैत्रशरीरावच्छिन्नवेदना मैत्रशरीरावच्छिन्नेन नानुसंधीयते

नानुसंधीयते अवयवावयविनोर्भेदात् भेदेऽप्यनुसंधानोपगमे चैत्रशरीरावच्छिन्ना वेदना मैत्रशरीरावच्छिन्नेनाप्य
नुसंधीयेत भेदाविशेषात् तथा चैत्रशरीरलग्नकंटकोद्धाराय मैत्रशरीरस्य स्वारसिको व्यापारः प्रसज्येत अवय
वावयविनोरिति अवयवानां परस्परभेदेऽपि शरीरतदवयवयोस्तादात्म्योपगमादित्यर्थः एवं चेति शरीरा
वच्छिन्नस्य चरणावच्छिन्नवेदनानुसंधानं प्रति शरीरचरणयोस्तादात्म्यस्य नियामकत्वमस्तीत्यर्थः

यदि दृष्टांतयोरुपाधिभेदेन तदुपहितवृत्त्यादिभेदं परोक्षापरोक्षत्वादिरूपं प्रयोजनं तत्कृतं तत्पितमुपाधिभेदेनाह एकैवेति निकृष्टइति ।
अंतःकरणविशिष्टेषां भिन्नेष्वंतदुपहितेषु चिदात्मसु नैरित्यर्थः ननु सत्यभेद एव व्यवस्थाप्रयोजक इति नेत्याह अक
ल्पितेति घटादिभेदस्यापि सत्यत्वस्यास्माकमसंमतत्वादित्यर्थः ननु स्वाभाविकभेद एव व्यवस्थाप्रयोजको न तदौ
पाधिकभेद इत्याशंक्याह मणीति मुखे हि मलिनमणिदर्पणकृतेन भेदेन श्यामत्वावदातत्वव्यवस्था संप्रतिप
न्नेः कृपाणमणिमयस्तंभादिकृतेन भेदेन वर्तुलत्वदीर्घत्वाभावादिव्यवस्था संप्रतिपन्नेरित्यर्थः न च बिंब प्रतिबिंब
योरभेदे स्वाभाविके केवलभेदश्चौपाधिक इति सिध्यति न तद्दशाया व्यवस्था चित्सिध्यति तयोरभेद एव कार्य सिद्ध इति भा

एकेनेत्यत्राश्रयभेदादेव विरुद्धधर्मव्यवस्थोपपादनीया न दाष्टांतेन निकृष्टे एवोपाधिवशाद् भेदकल्पनास्तु
अकल्पिताश्रयभेद एव व्यवस्थाप्रयोजक इति कारणात्संप्रतिपन्नेः मणिमुकरकृपाणाद्युपाधिकल्पितेन भे
देन मुखे श्यामावदातत्वर्तुलदीर्घत्वाभावादिधर्माणां अन्यत्र पटे औपाधिकल्पितेन भेदेन दीपशाखायां स्वपोरत्व
भावादिधर्माणां च व्यवस्थायां संप्रतिपत्तेरित्याह एवमुपाधिवशाद्व्यवस्थोपपादने संभाविते जीवानां परस्प
रस्वाभाविकभेदेनानुसंधानप्रयोजक उपाधिः क इति निरूपणीयं ॥

चं तस्य प्रयोजकस्य अधिनत्वादिति भावः अवच्छेदपक्षे औपाधिकभेदस्य व्यवस्थापकत्वे संप्रतिपत्तिं दर्शयति अंगुलीभे
ति जीवानामुपाधिभेदाद्ब्रह्मावच्छेदादिव्यवस्था सिद्धौ तेषां वस्तुतः परस्परभेदे प्रमाणाभावादेकब्रह्माभेदः सिध्यति
तत्सिद्धौ च जीवाभिन्ने निष्प्रपंचे ब्रह्मणि वेदांतसमन्वयः सिद्ध इति प्रतिपादितं संप्रति विचारांतरमारभते एवमिति
उक्तप्रकारेणेत्यर्थः क इति अनुसंधानाननुसंधानयोः किं भोगायतनाभेदतद्भेदौ प्रयोजकौ किं वा विशिष्टभोगा
यतनाभेदतद्भेदौ अथवा शरीराभेदतद्भेदौ अंतःकरणाभेदतद्भेदौ वा अज्ञानाभेदतद्भेदौ वा इति प्रश्ने प्रतिवचनं

[illegible]

सि॰ ले॰
द्वि॰
५८

नचेति दोर्दण्डाः बाहुदण्डाः कबन्धाः छिन्नशिरस्कदेहाः उद्दण्डे भूमौ वा अत्र वचने चैत्रमैत्रशरीरयोरिव विश्लिष्टयोः क-
बन्धशिरसोर्भेदे सत्यपि शिरोवच्छिन्नस्य कबन्धावच्छिन्नगतयोः कृत्वानुसंधानत्वमवगम्यत इति व्यभिचार इत्यर्थः तत्रानु-
संधानमुपेत्य चैत्रमैत्रशरीरवैलक्षण्येन समाधत्ते तत्रापीति चरत्वादिति पूर्वमनुप्रविष्टत्वादित्यर्थः अस्य वचनस्य
स्वार्थमानत्वाभावाद्व्यभिचारशंके वा युक्तेत्याशयेनाभ्युपगमं परित्यजति शिरःछेदानन्तरमिति कबन्धाश्रयिप्रमातर्यं।
न्ति किमुताभ्यामुत्पत्तियोगदृष्टेः मुक्ता हानिशायंप्रशंसमेतद्वचनमित्यर्थः ननु शिरश्छेदानन्तरमपि पुनरनुसंधानादि कंयो

नन्वेतद्युद्धप्रबन्धे दोर्दण्डाः पतितान्यपि शिरोभिः पश्यन्तः पातयन्ति स्म कबन्धाश्च प्रत्यरीनुद्धेतिभारतोक्त्या विश्ले-
षेऽप्यनुसंधानमवगतमिति वाच्यं तत्रापि शिरःकबन्धयोरेकस्मिन्नेव पत्यन्यवयवभावेनानुप्रविष्टत्वा-
त् शिरश्छेदानन्तरं मूर्छामरणयोरन्यतरावश्यंभावेन दृष्टविरुद्धार्थस्य तादृशवचनस्यैकेनु मत्यायेन यो-
द्धृतसाहातिशयप्रशंसापरत्वात् तादृक्प्रभावयुक्तपुरुषविशेषविषयत्वेन भूतार्थवादत्वेऽपि निरुक्तस्यौत्स-
र्गिकानुसंधानतंत्रत्वाविघातात्व अत एवोक्तवक्ष्यमाणपदेषु योगिनां जातिस्मराणां च शरीरान्तरवृत्ताना-
नुसंधानेन दोषप्रसक्तिः

गमहिम्ना तपोमहिम्ना वा वरदानमहिम्ना वा केषांचित्संभवति ततोऽविद्यमानार्थकमेवेदं वचनमित्याशंकायां पुनरनुसं-
धानमुपेत्य व्यभिचारं परिहरति तादृशीति विश्लिष्टभोगायतनभेदेऽनुसंधानप्रयोजकउत्सर्गउपगमादुदाहृ-
तानुसंधानस्य तत्तदपवादस्थलत्वाभ्युपगमात् तत्र व्यभिचारो न दोषायेति भावः अत एवेति उत्सर्गरूपत्वाभ्युप-
गमादेवेत्यर्थः न दोषप्रसक्तिरिति भोगायतनभेदादेरनुसंधानप्रयोजकत्वनियमाभ्युपगमे हि योगिषु जातिस्मरे-
षु च भोगायतनभेदादिप्रयोजकचतुष्टयसत्त्वेऽप्यनुसंधानाभावेन व्यभिचाररूपदोषप्रसक्तिर्भवेदित्यर्थः॥

ऊ॰
५८

ननु हस्तावच्छिन्नस्य चरणावच्छिन्नगतवेदनानुसंधातृत्वाभावेपि चरणलग्नकंटकोद्धाराय हस्तव्यापारवत् मैत्रशरीराव
च्छिन्नस्य चैत्रशरीरावच्छिन्नगतवेदनानुसंधातृत्वाभावेपि चैत्रशरीरलग्नकंटकोद्धाराय मैत्रशरीरव्यापारप्रसंगः परिह
र्तुं न शक्यते तत्राह नापीति चैत्रमैत्रशरीरद्वयानुस्यूतेत्यर्थः चैत्रशरीरावच्छिन्नवेदना उभयानुस्यूतावयवांतरावच्छि
न्नेनापि नानुसंधीयत इति संबंधः अतो न दृष्टांतसाम्यमिति भावः चरणलग्नकंटकोद्धाराय हस्तव्यापारानुरोधे न हस्ता
वच्छिन्नस्यैव चरणावच्छिन्नवेदनानुसंधातृत्वमपेक्ष्यते न च तथा सति भोगायतनभेदस्यानुसंधानप्रयोजकत्वेन
स्वाश्रयणे हस्तभेदव्यभिचारादिति वाच्यं तद्वारणे पविशेषणदानोपपत्तेरिति मत्वा द्वितीयं उपाधिं निरूपयति प्र

नाप्युभयशरीरानुस्यूतावयवांतरावच्छिन्नेनानुसंधीयते उभयानुस्यूतस्यावयविनो भोगायतनत्वाभावादि
ति न चैत्रशरीरलग्नकंटकोद्धाराय मैत्रशरीरव्यापारप्रसंगाद् इति अन्ये तु विशिष्टोपाधिभेदो नानुसंधानप्रयो
जकः तथा च हस्तावच्छिन्नस्य चरणावच्छिन्नवेदनानुसंधानाभ्युपगमेपि न दोषः न चैवं सति गर्भस्य समात
वेदनानुसंधानप्रसंगः एकस्मिन्नवयविन्यवयवभावेनाननुप्रविष्टयोर्विशिष्टयोरेव विवक्षितत्वात् मा
तृगर्भशरीरयोस्तथात्वादित्याहुः

अन्ये त्विति उपाधिपदं भोगायतनपरं न दोष इति भोगायतनयोर्हस्तचरणयोर्भेदे सत्यपि तयोर्विशिष्टभोगाय
तनभेदस्यानुसंधानप्रयोजकस्याभावात् न तत्र व्यभिचारदोष इत्यर्थः न चैवं सतीति विशिष्टत्वविशेषणदाने
सतीत्यर्थः गर्भस्य जीवस्य पृथग्भोगायतनेन तस्य मातृशरीरस्य च विश्लेषाभावादिति भावः विशिष्टपदार्थानभिज्ञस्ये
दं चोद्यमिति परिहरति एकस्मिन्निति तथात्वादिति एकस्मिन्नवयविनि अवयवभावेनाननुप्रविष्टत्वादित्यर्थः न
चाच विशिष्टोपाधिभेदसत्त्वात् गर्भस्य जीवस्य मातृहस्तानुसंधानप्रसंग इति भावः निरुक्तानुसंधानप्रयोजक

सि॰ ले॰
टि॰
५९

अवयवोपचयक्रमेण शरीरान्तरारंभानुपगमे कस्मिन्न् शरीरे विरुद्धपरिमाणयोगस्तु स्यात्तत्राह विवर्तवादे
चेति चतुर्थपक्षमादाय प्रतिवचनं ददाति इतरे त्विति प्रमिणोति स्वावेद्धः व्यादिव्यवस्थोपपादनप्रयत्न इत्यर्थः॥
पंचमपक्षमाह केचित्त्विति प्रतिजीवमज्ञानभेदे प्रमाणं ब्रह्मलक्षणविचारावसरे दर्शितं एवमेकात्मवादे।
व्यवस्थामुपपाद्य तन्नानात्ववादे व्यवस्थानुपपत्तिमाह अन्ये त्विति अंशो ब्रह्मणो जीवः श्रुतिषु जीवब्रह्मणोर्नाना
त्वव्यपदेशाच्च ब्रह्मणो निरंशत्वात् कथं जीवस्यांशत्वमिति वाच्यं अवच्छिन्नाकाशो महाकाशस्य यथांशस्तथावच्छि

59

विवर्तवादे चैन्द्रजालिकदर्शितशरीरवद्विनैवावयवोपचयं मायया शरीरस्य वृद्ध्युपपत्तेरित्याहुः इत्थं तावत्
करणभेदतद्भेदाभ्यामनुसंधानाननुसंधानव्यवस्थामाहुः प्रपंचपक्षः प्रागुपपादितः केचित्तु अन्तःकरणानि
जीवभेदोपाधिभूतानि नानेति स्वीकुर्वन्तस्तद्भेदाभेदाभ्यामनुसंधानाननुसंधानव्यवस्थामाहुः अन्ये केचित्तु
अंशो नानाव्यपदेशादित्यधिकरणे अदृष्टानियमात् अभिसंध्यादिष्वपि चैवं प्रदेशादिति चेन्नान्तर्भावा।
दिति सूत्रतद्भाष्यरीतिमनुसरन्त एकस्मिन्नात्मन्युपाधिभेदेन व्यवस्थानुपगमे कणभुगादिरीत्यात्मभेद
वादेपि व्यवस्थानुपपत्तिरित्याहुः

तच्चैतन्मतद्वयस्य ब्रह्मणोंशत्वप्रमाणादिति सूत्रभागार्थः अदृष्टानियमादित्यादिसूत्रत्रयस्य व्याख्यानं भविष्यति कण
भुगादिभिर्हि प्रतिशरीरमात्मभेदाभावे व्यवस्थानसंभवतीत्यात्मभेद आश्रितः न चात्मन एकत्वेपि उपाधिकृता व्यव
स्थासंभवतीति तद्भेदाश्रयणं तेषां व्यर्थमिति वाच्यं उपाधिकृतव्यवस्थायाः क्लिष्टत्वात् अतो न सा व्यवस्थासि
द्ध्येऽयात्मभेदस्तैराश्रितः तदेतन्मतं दूषयति कणभुगादिरीत्येति व्यवस्थेति व्यवस्थाया असंभावस्तत्वल्पत्व
माहुरित्यर्थः

३॰
५९

अदृष्टविशेषोपासहकृतस्य भोगायतनभेदादेवाननुसंधानप्रयोजकत्वस्य विवदितत्वात्तु योग्यतादिवद्व्यभिचार इति तात्पर्यं ।
तृतीयपक्षमादाय प्रतिवचनं निरूपयति अपरे त्विति तत्र मानमाह बाल्येति बाल्येऽनुभूतस्य वार्धिके अनुसंधानं दृ
श्यते बाल्यवार्धकयोः शरीराभेदात्तु तद्भेदादेव भवान्तरानुभूतस्यास्मिन् जन्मन्यननुसंधानं दृश्यत इत्यर्थः शंकनीयः
इति परिमाणभेदादिति भावः बाल्याद्यवस्थाभेदेऽपि तद्देवेदं शरीरमिति प्रत्यभिज्ञादर्शनात् न शरीरभेद इति परि
हरति प्रत्यभिज्ञानादिति शंकाबीजमनूद्यान्यथासिद्धिमाह न चेत्यादिना आरंभवादमाश्रित्य शंकते नन्विति
पूर्वसिद्धमिति पूर्वसिद्धशरीरे उपादानत्वायोगात् पूर्वसिद्धशरीरनाशपूर्वं तदवयवैरुपचितावयवैश्चमिति

अपरे तु शरीरैक्याभेदावनुसंधानतदभावप्रयोजकोपाधी बाल्यभवान्तरानुभूतयोरनुसंधानतदभावदृष्टेः
न च बाल्ययौवनयोरपि शरीरभेदः शंकनीयः प्रत्यभिज्ञानात् न च परिमाणभेदात्तद्भेदावगमः एकस्मि
न्नपि वृक्षे मूलाग्रभेदेनेव कालभेदेनैकस्मिन्ननेकपरिमाणान्वयोपपत्तेः ननु अवयवोपचयमन्तरेण न परिमा
णभेदः अवयवाश्च यस्मादापतितास्तेन पूर्वसिद्धशरीरं परित्यज्यत इति परिमाणभेदे शरीरभेद आवश्यक इति
चेन्न प्रदीपारोपणसमसमयसौधोदरव्यापिप्रभामण्डलविकासतत्पिधानसमसमयतत्संकोचाद्यननु
रोधिनः परमाण्वाद्यारंभवादस्यानभ्युपगमात्

त्वाशरीरान्तरं द्व्यणुकत्र्यणुकादिक्रमेणारब्धव्यमिति परिमाणभेदे शरीरभेद आवश्यकः प्रत्यभिज्ञा च शरीरत्व
सामान्यविषया भविष्यतीत्यर्थः समसमयत्वं विकासविशेषणं समयपश्चाद्भावे द्व्यणुकक्रमो वा स्यात् तत्पदं उपादानोपा
देययोः सामानाधिकरण्यानुभवादिरादिपदार्थः अननुरोधिन इति द्व्यणुकादिक्रमेण स्थूलावयव्युत्पत्ति
पक्षे विलंबापत्तेः समसमयत्वानुभवविरोधात् परमाणुसंयोगनाशक्रमेण प्रभादिनाशेऽपि विलंबापत्तेरारंभ
वादे उपादानोपादेययोरत्यन्तभेदाभ्युपगमेन सामानाधिकरण्यानुभवविरोधाच्च तद्वादस्य हेयत्वमेवेत्यर्थः

श्रि· ले· क्षि· ६०

प्रदेशादिति चेन्नान्तर्भावादिति सूत्रं व्याचष्टे अप्येवं प्रदेशकृतां व्यवस्थामाशंक्य निराकरोति नन्वात्मनामिति बंधः सुखदुः
खादिः तन्नदात्मासाधारणप्रदेशविशेषाद्व्यवस्थेति चेदिति सोऽयं शंकाभागार्थः एकस्मिन्शरीरे एकस्यैवात्मनः प्र
देशो नात्मान्तराणामिति नियमोऽप्रसिद्ध इति दूषयतीति न यस्मिन्निति अदृष्टसुखादेरव्याप्यवृत्तित्वादात्मनो यः प्रदेशो
अदृष्टाश्रयः स एवात्र प्रदेशशब्दार्थः तथा च यस्मिन्नात्मनादिप्रदेशे चैत्रशरीरं स्थितं मैत्रे च समसुखाद्यापतनं भवति तत
स्मिन्नेव प्रदेशे चैत्रशरीरापक्रमणानंतरं मैत्रशरीरमागत्य स्थितं मन्ये च समसुखाद्यापतनं दृश्यते अतस्तत्र पश्चादाग

60

नन्वात्मनां विभुत्वेऽपि तेषां प्रदेशविशेषा एव बंधभाजस्तस्मादात्मान्तराणां चैत्रशरीरे न तत्प्रदेशविशेषाभावात्सु
खादिव्यवस्था भविष्यतीति न यस्मिन्प्रदेशे चैत्रः सुखाद्यैदिदर्शनेन शरीरान्तरे आत्मान्तरप्रदेशविशेष
स्याप्यन्तर्भावात् तस्मादात्मभेदेऽपि व्यवस्थानुपपादेवकथंचित्तदुपादानेन च श्रुत्यनुरोधाल्लाघवा च
च्चैकात्म्यमंगीकृत्य तत्रैव तदुपपादनं कर्तुमुक्तमिति सत्वतर्क्षण्णव यवात्मानो यदि विभुत्वे व्यवस्थानह च

नुभूयतस्मात्प्रदेशादपक्रान्ते तस्मिन्नेव मैत्रे समागते तस्यापि तत्र सुखदुःखा मूल ३

तन्मैत्रशरीरे चैत्रमैत्रात्मप्रदेशयोरदृष्टाश्रययोः प्रदेशान्तरस्थशरीरे चैत्रमैत्रयोरुभयोरपि भोगप्रसंगः न च पूर्वश।
रीरापक्रमणसमये तच्छरीरगतस्य चैत्रात्मप्रदेशस्याप्यपक्रमणमेवास्त्विति वाच्यं प्रदेशवतः आत्मनः स्थिरत्वेन
प्रदेशस्य चलनानुपपत्तेरेवमन्येषामप्यात्मनां प्रदेशान्तराभावेऽप्युक्तभोगसांकर्यमूह्यं तस्मादिति आत्मनां व्याप
कत्वाभ्युपगमादित्यर्थः नन्वात्मैक्यमते तत्रानात्ममतेऽपि कथंचिद्व्यवस्थासिद्धिः किमर्थं सांख्यमाह श्रुतीति
आत्मैक्यश्रुतीत्यर्थः तत्रैवेति एकस्मिन्नेवात्मनीत्यर्थः जीवा एतत्तामकश्रुतिप्रक्रमबद्धभोगार्थं जीवब्रह्मा

भट्टमाधवीयं मिलितं ॥

उं· ६०

यथा चैतस्य तथाऽन्येषामपीत्यर्थः कंटकवेधादीत्यादिपदं वेदनाज्ञानादिसंग्रहार्थं शरीरस्यात्मविशेषं प्रतिसाधारणमसिद्धमि
ति दूषयति सर्वात्मसंनिधाविति अदृष्टानियमादिति सूत्रमवतारयति यदृष्टेति सूत्रं व्याचष्टे अदृष्टस्यापीति अनियमं
साधयति यदा हीति तदात्मैरप्यात्मभिः संयुज्यतइत्यर्थः ततः किं तत्राह कथमिति आत्ममनःसंयोगरूपासमवायिका
रणस्य समवायिकारणीभूतात्मनश्च साधारणत्वादित्यर्थः संयोगमात्रेति मात्रपदमभिसंध्यादिसाधारण्यव्यवच्छेदा

तथा हि चैत्रचरणलग्नकंटकेन चैत्रस्य वेदनोत्पादसमये ऽन्येषामप्यात्मनां कुतो वेदना न जायेत सर्वात्मनां सर्व
गतत्वेन चैत्रशरीरांतर्भावाविशेषात् न च यस्य शरीरे कंटकवेधादि तस्यैव वेदना नान्येषामिति व्यवस्था सर्वा
त्मसन्निधावुत्पद्यमाने शरीरे कस्यचिदेव नान्येषामिति नियंतुमशक्यत्वात् न च यददृष्टोत्पादितं यच्छरीरं त
त्तदीयमिति नियमः अदृष्टस्यापि नियमासिद्धेः यदा हि तददृष्टोत्पादकोऽनचिदात्मना संयुज्यते मनः संयु
ज्यत एव तदान्यैरपि कथं कारणसाधारण्ये कस्यचिदेव तददृष्टमुत्पद्येत ननु मनःसंयोगमात्रसाधारण्येऽप्य
दृष्टमिदं फलं प्राप्नुयामित्यभिसंधिरदृष्टोत्पादककर्मानुकूलकृतिरित्येवमादिव्यवस्थितमिति तत एवादृष्ट
नियमो भविष्यतीति चेन्न अभिसंध्यादीनामपि साधारणमनःसंयोगादिनिष्पाद्यतया व्यवस्थित्यसिद्धेः ननु
स्वकीयमनःसंयोगाभिसंध्यादिकारणमिति मनःसंयोगसाधारण्यं भविष्यतीति तन्न नित्यसर्वात्मसंयुक्ते
मनः कस्यचिदेव स्वमिति नियंतुमशक्यत्वात् न चादृष्टविशेषादात्मविशेषेण मनसः स्वस्वामिभावसि
द्धिः तस्याप्यदृष्टस्य पूर्ववदव्यवस्थितत्वासिद्धेः

यं न तु समवायिकारणस्यात्मनो व्यवच्छेदार्थमिति बोध्यं अभिसंधिः फलेच्छा आदिपदेन कृतिजनककार्यताज्ञानचिकी
र्षयोः संग्रहः अभिसंध्यादिष्वपि चैवमिति सूत्रं योजयन्नुत्तरमाह नेत्यादिना मनसोऽप्यसाधारण्यमाशं
कां निराकरोति ननु स्वकीयेति तथा च तत्संयोगासमवायिकारणकं सर्वं न साधारणं भविष्यतीति भावः

सि. ले.
द्वि.
६२

62

जीवाणुत्वपक्षेनकेवलमनुपपत्तिसामान्याभावः किंतुलाभोप्यस्तीत्याह एवंचेति जीवस्याणुत्वेसतीत्यर्थः असं
कराद्दिति एकस्मिन्शरीरे सर्वेषांजीवानांप्रवेशाभावादित्यर्थः विभोरिति जीवस्यापिविभुत्वेलक्षणाभेदाभा
वादीशात्मभेदोनसिध्येत् अणुत्वेत्वसंनवेलक्षण्यात्भेदः स्यादागमइतिभावः अर्वाचीनकल्पनंदूषयति
अत्रोक्तमिति एवमपीति जीवस्याणुत्वसांशत्वकल्पनेपीत्यर्थः जीवस्यसांशत्वात्तत्सुखाद्यनुसंधानंजीवांत
रगतसुखाद्यननुसंधानंचाभ्युपगच्छतात्वयाभेदोननुसंधानप्रयोजकः अभेदश्च तदनुसंधानप्रयोजकइतिव

एवंचजीवानामणुत्वेनासंकरात्सुखदुःखादिव्यवस्थाविभोरीश्वराद्भेदश्चेति अत्रोक्तमद्वैतदीपिकायां
एवमपिकथंव्यवस्थासिद्धिः चैत्रस्यपादेवेदनाशिरसिसुखमितिस्वांशाभेदगतसुखदुःखाद्यनुसंधा
नवन्मैत्रगतसुखदुःखाद्यनुसंधानस्यापिदुर्वारत्वात् अविशेषोपिहि चैत्रजीवात्तदंशयोर्मैत्रस्यचभे
दः कायव्यूहस्थलेविप्रजन्यान्यत्रसंस्मरणसमर्थानामंशानांजीवाद्भेदाव्यवस्थाभावादंशांशिनोस्त्वयाभेदा
भेदाभ्युपगमाच्च

ऋत्वंतत्रानानुसंधानप्रयोजकभेदोभेदमात्रंवास्तुद्विभेदोवाआद्येचैत्रःस्वांशगतसुखादिकंनानुसंदध्यादनु
संधानप्रयोजकभेदस्यसत्वात् यदिसत्यपिभेदेस्वांशगतमनुसंदध्यात्तदाचैत्रोमैत्रगतसुखादिकमप्यनुसंदध्या
दित्याह चैत्रस्येति अंशांशिनोरननुसंधानप्रयोजकभेदासिद्धिमाशंक्यान्तंसाधयति कायव्यूहेति विप्रजन्येति
अंशिनःसकाशाद्विभागंप्राप्येत्यर्थः अन्यत्रेति योगिनोनिजशरीरादन्यत्रकायव्यूहइत्यर्थः तयोर्भेदोनास्मा
भिः साधनीयइत्याशयेनाह अंशांशिनोरिति ॥

उ.
६२

निराकरोति नैवमिति अधिष्ठानस्य चेति युगपत्करादिदेशेष्वंगेषु स्तनयर्थः जीवस्याणुत्वेपि सर्वशरीरव्यापिसुखादिकं संभव
तीतिशंकते यदचेति कल्पनाप्रकारस्तेषामणुत्वेपीत्यादिना भविष्यतीत्यादे तस्याणुत्वेमानमाह उत्क्रान्तीति तमुत्क्राम
न्तमित्यादिश्रुतिषूत्क्रान्त्यादिकं श्रूयते इतिभावः ननु मध्यमपरिमाणस्य जीवस्योत्क्रान्त्याद्यन्यथानुपपत्त्या चेदणुत्वं कल्प
ते तर्हि जीवस्य ब्रह्मभावश्रवणेनानुपपत्त्यातस्य विभुत्वं कल्प्यते श्रुतार्थापत्तेरविशेषादित्याशंक्य श्रुतिमप्याह अणुरिति
य मात्मानमेते सिनीतः वध्नीतः केतेनत्राह पुण्यं चपापं च एषआत्माअणुर्हीत्यर्थः वालः केशः शतधाकल्पितस्य चभागो
जीवः सविज्ञेय इतिवाक्यमादिपदेन गृह्यते वालाग्रस्यशतभागः शततमोभागः तस्यापिशतधाविभक्तस्य योभागस्तत्तुल्यपरि

नैवं आत्मनामणुत्वे कदाचित्सर्वांगीणसुखोदयस्य करशिरश्चरणाधिष्ठानस्य चानुपपत्तेः यदत्रार्वाचीन
कल्पनमुत्क्रान्तिगत्यागतिश्रवणान्यथानुपपत्त्या अणुरेषआत्मायं वापते सिनीतः पुण्यं चपापं चवा
लाग्रशतभागस्येत्यादिश्रुतिषु स्थाद्वादणुत्वश्रवणेन चाणवएव जीवाः ते षामणुत्वेपिचन्दनसुखादीनां प्रदीप
प्रभान्यायेनाश्रयातिरिक्तप्रदेशविशेषव्यापिगुणतयासर्वांगीणसुखाद्युपलम्भः श्रोणं गृहस्यतेर्भोगामि
त्यादिस्मृत्यनुरोधेन जीवानां मध्यमत्वात् करशिरश्चरणाद्यनुगते सुखदुःखादियोगपद्यं कायव्यूहग
माणो जीव इत्यर्थः जीवस्याणुत्वसाधकप्रमाणाणि
तेषु योगिनां भोगवैचित्र्ये चेतिनकाचिदनुपपत्तिः
सारिणमर्वाचीनकल्पनाप्रकारंदर्शयति तेषामणुत्वेपीति यथाप्रभायाः स्वाश्रयं प्रदीपं विहायप्रदेशान्तरव्यापि
त्वं तथाज्ञानादीनां स्वाश्रयमणुमात्मानं विहायकदाचिच्छरीरव्यापित्वं कल्प्यतइत्यर्थः नन्वात्मनः शरीरव्यापित्वे
सतियुगपत्सुखदुःखे एवमप्यल्पादयउत्पद्यमानाः तस्मिन्नवदेहे दकमेदेन संभवंतीति तस्याणुत्वेन कथं तेषां योगप
द्यनिर्वाहः तत्राह श्रोणमिति अनुगतेष्विष्टमनंतरं जीवांशोऽधिष्ठितिशेषः व्यूहः समूहः कायव्यूहगतेष्विष्टमनंतर
मपिजीवांशोऽधिष्ठितिशेषः भोगानांभुज्यमानसुखादीनां वैचित्र्यं युगपज्ज्ञानाविधत्वं युगपदनेकशरीराधिष्ठानं च

सि॰ ले॰
द्वि॰
६२

नापीत्यादिना जीवस्याणुत्वेन प्रदेशासंभवाद् अणुत्वेनैव बुद्धेर्धीभावापत्तेश्चेत्यर्थः ननु एषां कथं भिन्नाभिन्नेति जीवांशानां जी
वेन सह भिन्नत्वे सत्यभिन्नद्रव्यत्वं मुख्यं मंशत्वमभिमतं तदेव चानानुसंधानप्रयोजकं शरीरे निवेश्यते तथा च भिन्नाभिन्नद्रव्य।
त्वासहचरितभेदः शुद्धभेदः सचानानुसंधानप्रयोजक इति निष्कर्षः तत्र दूषणमाह तथा सतीति जीवेश्वरयोस्तथाभिन्नाभि
न्नद्रव्यत्वाभ्युपगमात्तयोर्भेदः शुद्धभेदो न भवति तथा जीवांशानां परस्परं भिन्नाभिन्नद्रव्यत्वस्य तथा स्वीकारात्तेषां भेदोपि शुद्ध
भेदो न भवति तथा चानुसंधानप्रयोजकाभावात् जीवेश्वरयोर्जीवांशानां च भोगसांकर्यप्रसंगादित्यर्थः चेतनत्वादिनेति।
समद्रव्यत्वसंग्रहार्थमादिपदं दूषणान्तरमाह समूहेति समूहस्य समूहिनां च परस्परं भिन्नत्वे सत्यभिन्नत्वमंगीकुर्वतस्त

62

नापि महाकाशं प्रति घटाकाशादीनामिव प्रदेशत्वं टंकच्छिन्नपाषाणशकलादीनामिव खंडत्वं वा अणुत्वेन निःप्र
देशत्वात् अच्छेद्यत्वाच्च भिन्नाभिन्नद्रव्यत्वमंशत्वमभिमतमिति चेत् न तथा सतीति जीवेश्वरयोर्जीवांशानां च भोगसां
कर्यप्रसंगात् स्वतोभिन्नानां तेषां चेतनत्वादिनाऽभेदस्यापि तथांगीकारात् समूहसमूहिनोर्भेदाभेदवादिनस्तवम
ते एकसमूहान्तर्गतानां जीवानां परस्परमप्यभेदसत्त्वाच्च स्वाभिन्नसमूहाभिन्नेन स्वस्याप्यभेदस्य दुर्वारत्वात्

वमते समूहिनामपि परस्परं भिन्नत्वमावश्यकं तथा च उत्सवादावेकत्र मिलितानां जीवानां भिन्नानां परस्परमभिन्नद्रव्यत्व
स्यापि सत्त्वात्तेषां परस्परभेदः शुद्धभेदो न भवति भिन्नाभिन्नद्रव्यत्वसहचरितत्वात्तथा च परस्परं तेषां स्यादेवानुसंधान
प्रसंगादित्यर्थः ननु समूहिनां समूहाभिन्नत्वेपि न तेषां परस्पराभिन्नत्वमस्मन्मतेऽस्ति अतो नोक्तदोष इत्याशंक्याह स्वा
भिन्नेति स्वयमेकः समूही देवदत्तः तदभिन्नः समूहः तदभिन्नो यज्ञदत्तः तेन सह स्वस्यापि देवदत्तस्याप्यभेदसत्त्व
मते दुर्वारत्वात् तथा तदभिन्नाभिन्नस्य तदभिन्नत्वनियमाभ्युपगमादित्यर्थः

डु.
६२

ननु भेदमात्रेणानुसंधानप्रयोजकत्वमाने घटते येन जीवः स्वांशगतमपि सुखादिकं नानुसंदध्यात् परस्य नु संदध्यात्तदाज्जीवांत
रगतमपि तदनुसंदध्यादिति दोषः प्रसज्येत किं तु विशेषतो भेद इति द्वितीयं शंकते नचेति प्राथ्येकल्पे जीवेश्वरभेदस्यां
शांशिभावसहचरितत्वेन शुद्धभेदत्वाभावात्तयोः परस्परं सुखाद्यनुसंधानं स्यादित्याह नाम्युइति जीवेश्वरयोरंशांशि
भावे मानमाह अंशो हीति परमस्य परमात्मनः जीवलक्षणो लोको जीवलोकः ननु भेदस्यांशांशिभावमोनासहचरि
तत्वं शुद्धत्वं न भवति किं तु सुखांशांशांशिभावासहचरितत्वं जीवेश्वरयोरंशांशित्वं तु न सुखमतः तयोर्भेदे सुखांशांशि

नत्वशुद्धभेदेनानुसंधानप्रयोजकत्वमिति वाच्यं शुद्धत्वं हि भेदस्यांशांशिभावासहचरितत्वमभेदासहचरितत्वं वा स्या
त् नाद्यः अंशो ह्येष परमस्य ममैवांशो जीवलोके अंशो नानाव्यपदेशादिति श्रुतिस्मृतिसूत्रैर्जीवस्य ब्रह्मांशत्व
प्रतिपादनेन ब्रह्मजीवयोर्भोगसांकर्यप्रसंगात् ननु जीवांशानां जीवं प्रतीव जीवस्य ब्रह्म प्रति नांशत्वं किं त्व
चंद्रबिंबस्य गरुविंदः शालांशाङ्गुलिवत्सदृशत्वे सति ततो न्यूनत्वमात्रमौपचारिकांशत्वमिति चेत् किं तदेतदति
रेकेण सुखांशत्वं जीवांशानां जीवं प्रति पादत्वानानुसंधानप्रयोजकशरीरेनिवेश्यते नत्वावत्पदं प्रति तत्
नामिवारंभकत्वं जीवस्यानादित्वात्

भावासहचरितत्वरूपशुद्धत्वस्यासत्त्वान्नोक्तदोष इति शंकते नन्विति जीवं प्रतीति तत्पाचजीवतदंशयोर्भेदे सुखांशांशि
भावसहचरितत्वस्यैव सत्त्वेन तदसहचरितत्वरूपशुद्धत्वाभावादनुसंधानोपपत्तिरिति भावः नांशत्वमित्यनंतरं सुखमिति
शेषः कांतिमत्त्वसादृश्यांसुखांशांशिभावासहचरितभेदोऽनुसंधानप्रयोजकः स च न सुखांशांशिभावो दुर्निरूप इत्याह ॥
किं तदिति यत्सुखांशत्वं न मत्प्रयोजकशरीरेनिवेश्यते तदेतदतिरेकेण किमिति योजना सुखमंशत्वमारंभकावयवत्वं
वा प्रदेशत्वं वा विद्धत्वं वा भिन्नाभिन्नद्रव्यत्वं वेति किंशब्दार्थः तत्राद्यं निराकरोति नतावदिति द्वितीयतृतीयौ क्रमेणाभूय

॥तिपप ७

जीवेश्वराद्यभेदापत्त्या जीवतदंशयोरभेदस्य विशेषं विषयतो निवक्ति धर्मैकरूप्याद्यप्रयुक्तत्वमिति उक्तविशेषासिद्धमाह
नजीवेति जीवस्य तदंशानां च चेतनत्वसत्त्वद्रव्यत्वादिधर्मैकरूप्यमस्ति तथा जीवस्य तदवयवानां चैकशरीरानुप्रवेश
कालेतच्छरीरावच्छेदेन समूहोऽप्यस्ति तथा योगिजीवावयवानां कायव्यूहशाच्छिन्नानेकशरीरेषु प्रविष्टानां कदाचित्तेषां
शरीराणां मेलने सति योगिजीवेनांशिना सह समूहोऽस्ति तथा च जीवतदंशयोरभेदे धर्मैकरूप्यादिप्रयुक्तत्वसंभ
वात्तदप्रयुक्तत्वमसिद्धमित्यर्थः ननु जीवानां चेतनत्वादिधर्मैकरूप्यादिप्रयुक्ताभेदसत्त्वेऽपि तेषामंशांशिभावा
भावात्तदंशांशिभावप्रयोजकाभेदोऽन्य एव स च न धर्मैकरूप्यादिप्रयुक्त इति शंकते धर्मैकरूप्यादि जीवान्तरसाधार

धर्मैकरूप्याद्यप्रयुक्तत्वमंशांशिनोरभेदे विशेष इति चेन्न जीवतदंशयोश्चेतनत्वादिति धर्मैकरूप्यसत्त्वे
नैकशरीरावच्छेदे कायव्यूहमेलने च समूहसत्त्वेन च तयोरभेदे धर्मैकरूप्यादिप्रयुक्तत्वस्यापि संभवात्
धर्मैकरूप्यादिप्रयुक्ताभेदान्तरसत्त्वेऽपि जीवतदंशयोरंशांशिभावप्रयोजकाभेदो न तत्प्रयुक्त इति चेत्
न तयोरभेदद्वयाभावात् त्वन्मते धिकरणे कोसति भेदस्याभेदस्य वा प्रतियोगिभेदेन तदाकारभेदे
नवानेकत्वानभ्युपगमात् तस्मादाद्यपक्षस्यैवेति प्रसंगः

एकाभेदस्य धर्मैकरूप्यादिप्रयुक्त
स्याप्यपरिहार्यत्वात्तस्याप्यनभ्युपगमे सति जीवतदंशयोरभेदद्वयमभ्युपगन्तृपरस्य मते प्रसज्यते उभमिति वदन्तं परं
प्रत्याह नतयोरिति अंशांशिनोरित्यर्थः तदाकारेति प्रतियोग्याकारेत्यर्थः प्रतियोगितावच्छेदकेति यावत् भेद
स्यानेकाभ्युपगमोऽस्माकमिष्टतार्थः तस्मादिति जीवेश्वरयोर्यः पूर्वमंशांशिभावो निरूपितः तदतिरेकेणाऽजीव
तदंशयोर्मुख्यस्यांशांशिभावस्य दुर्निरूपत्वादित्यर्थः तथा च जीवेश्वरयोर्भेदस निरूपितांशांशिभावसहचरित
त्वेन तदसहचरितत्वरूपस्य च भेदाभावे समानतन्त्रेऽसंप्रयोगप्रयोजकस्य च भेदाभावाज्जीवेश्वरयोः परस्परं भोगसांक
र्यप्रसंगरूपो दोषः स्थिर इत्यर्थः आद्यपक्ष इति अंशांशिभावासहचरितत्वस्वरूपत्वमिति पक्ष इत्यर्थः ॥

परप्रयुक्तनियमाभ्युपगमं साधयति यदीत्यादिना गुणगुणिनोर्जातिव्यक्त्योश्चाभेदवादिनं प्रतिदूषणपरोऽयं जीवाएत
वादिग्रन्थोपदेशीत्यादिः गुणगुणिनोरभेदमंगीकृत्यापदि गुणस्य संयोगविभागादित्वादेरनेकाश्रितत्वमभ्युपगमेतत्वपाजा
तिव्यक्त्योरभेदमुपेत्य यदि ज्ञातेरनेकाश्रितत्वमभ्युपगम्येत तदा पटादेरपि घटाभेदप्रसंग इत्यत्र हेतुगर्भविशेषणमाह
घटाभिन्नेति घटाभिन्नः संयोगः तदभिन्नत्वात्पटादेरित्यर्थः ननु जीवेश्वरयोर्जीवांशानां समूहाभिन्नजीवानां च यो पंचत
नत्वादिधर्मप्रयुक्ताभेदः एकसमूहाभेदप्रयुक्ताभेदश्च तदपेक्ष्यान्यएवाभेदो वतदंशयोरस्ति अतस्तयोर्भेदे सत्यपि
परस्परमनुसंधानं जीवेश्वरयोर्जीवांशानां समूहि जीवानां च तादृशाभेदाभावाच्चेतनत्वादि प्रयुक्ताभेदे सत्यपि न परस्

यदि संयोगादीनां जाते श्चानेकाश्रितत्वं स्यात् तदा गुणगुण्यादेरभेदात् घटाभिन्नसंयोगाभिन्नपटादेरपि घ
टाभेदः प्रसज्येतेत्यादि वदता त्वया तदभिन्नाभिन्नस्य तदभेदनियमाभ्युपगमात् न च जीवान्तरसाधारण
चेतनत्वादिधर्मैकरूप्यैकसमूहांतर्गतत्वादि प्रयुक्ताभेदविलक्षणमभेदांतरमंशांशिनोरस्ति भेदेप्यनुसंधा
नप्रयोजकं यदज्ञानाति प्रसंगमापादिवच्येत तथा सति तस्य वदिविशिष्यनिर्वक्तव्यत्वापत्तेः

रमनुसंधानमिति व्यवस्था तथा च भिन्नाभिन्नद्रव्यत्वासहचरितभेदः गुरुभेदः स चानुसंधानप्रयोजकउत्तत्र जी
वतदंशयोः परस्परानुसंधानप्रयोजकत्वाभिमतो विलक्षणभेद एव प्रविष्ट इति जीवेश्वरादौ तादृशाभेदघटितभिन्ना
भिन्नद्रव्यत्वासहचरितभेदसत्त्वान्नोक्तातिप्रसंग इति शंकानिराकरोति नचेति जीवतदंशयोरिव जीवांतराणाम
पि साधारणेऽपक्षे चेतनत्वादिधर्मैकरूप्यप्रयुक्त एकसमूहांतर्गमादिप्रयुक्तश्चाभेदः तद्विलक्षणमित्यर्थः जीवे।
श्वरगतस्यामात्यांशांशिभावस्य संग्रहार्थमादिपदं प्रमांशांशिनोर्भेदे सत्यपि तयोरनुसंधानप्रयोजकमभेदान्तरं न चा।
स्तिपदभेदांतरं जीवेश्वरादावति प्रसंगापरिहाय भिन्नाभिन्नद्रव्यत्व शरीरप्रविष्टतया विवक्ष्येतेति योजना नन्वभे
दांतरं कुतो नास्तीत्याशंक्याह तथा सतीति विलक्षणभेदस्यांशांशिनोः सत्त्वइत्यर्थः

सि॰ वे॰ हि॰ ६५

नचेत्युमपीति अभेदप्रसक्त्यमनुसंधानप्रयोजकमिति कल्पनापापीयस्त्वं: बलात्समन्वयपरमार्थो यो जीवानां तया भेदः तत्प्रसक्त्यमीश्वरस्या
वच्छेदकप्रमयाप्र सर्वज्ञत्वप्रसंगः स्यादित्यर्थः ननु सिद्धान्तेपि ब्रह्मणः सर्वज्ञत्वजीवाभिन्नत्वयोः सत्वात् उक्तदोषप्रसंग इति नेत्या
ह अस्मन्मत इति यत्तु जीवानां स्वावयववत्त्वात् करशिरश्चरणेनुगतेषु जीवांशेषु सुखदुःखादियौगपद्यं संभवति योगिनां
कायव्यूहगतेषु योगिजीवावयवेषु युगपत्सुखदुःखादिभोगवैचित्र्यं च संभवतीति न काचिदनुपपत्तिरिति तत्र जीवं प्रति
जीवांशानां मृदुत्वांशतस्तापि निरस्तता जीवं प्रति तदंशानां जीवसहस्रांशत्वे सति जीवापेक्षयान्यूनपरिमाणत्वरूपोपचारिकांश
त्वस्यापि जीवाणुत्वपक्षे बाधितत्वात् अणुपरिमाणस्यैव सर्वपरिमाणापेक्षयान्यूनपरिमाणत्वेन ततोपि न्यूनपरिमाणाभा
वात् सहस्रांशत्वे सति ततोन्यूनत्वरूपांशत्वस्य वं द्राविंशोवांशा रुदिववज्जीवांशानां जीवापेक्षयाभेदप्रयोजकत्वेन जीवस्यांशा

64

न चेत्यमर्थोपि प्रपंचतत्ववादिनः तद्व्यवस्थानिर्वाहः सर्वज्ञस्येश्वरस्य बलात्तस्य जीवानन्यभेदप्रसक्त्यावश्यंभावेन जीवेषु
दुःखवत्स्वदुःखानुभवापत्तेः अस्मन्मते तु ईश्वरः स्वाभिन्नजीवे संसारं प्रतिभाते मालिन्यमिव पश्यन्नपि मिथ्यात्व
निश्चयान्नशोचतीति नैष प्रसंगः स्यादेतन्माभूदंशाभेदः करशिरश्चरणादीनां कायव्यूहस्य चाधिष्ठानमात्म
दीपस्यानपायिनीत्तान प्रभाति व्यापिनी तयैव सर्वाधिष्ठानं भविष्यतीति चेत्

श्यानहस्त्वाद्यनुसंधानत्वासंभवाच्च तथा योगिजीवांशानां कायव्यूहाधिष्ठातृत्वेपि तेभ्योत्यंतभिन्नस्य योगिजीवस्य काय
व्यूहाधिष्ठातृत्वाभावप्रसंगात् यथा शरीराधिष्ठातुर्जीवस्य शरीरावयवशिरश्चरणाद्यधिष्ठातृणां जीवांशानां चात्यंत
भिन्नत्वेनैकस्मिन् शरीरे भोक्तृनानात्वप्रसंगात् जीवस्य स्वांशत्वे मानाभावाच्च द्रोणं बृहस्पतेर्भागमिति वचनस्य वार्णि
तयोमाउक्तांशपूरत्वाभावेन बृहस्पत्यादेर्योगप्रभावेन भूभारहरणादिदेवकार्यार्थं शरीरांतरपरिग्रहमात्रपरत्वात् एते
न श्रीरामकृष्णादेर्विष्ण्वंशत्वव्यवहारोपि व्याख्यातः तस्माज्जीवांशाविशेषस्य करशिरश्चरणाद्यधिष्ठातृत्वं कायव्यूहाद्यधि
ष्ठातृत्वं च न संभवतीति पूर्वग्रंथस्याशयेस्थिते शंकते स्यादेतदिति अधिष्ठानमिति प्रेरकमित्यर्थः भविष्यतीति जीवः
स्वयं मणुतया शरीरैकदेशस्थोपि स्वसमवेतेन व्यापिज्ञानेन करशिरश्चरणादीन् कायव्यूहं चाधितिष्ठतीष्ठतिष्ठतीति

…स्याप्यणोर्जीवस्य कृत्स्नशरीराधिष्ठातृत्वादिकं नानुपपन्नमिति भावः ६५

र्मभेदासहचरितत्वं शुद्धत्वं भेदस्येति यत्तं वक्ष्यमाणहेतुना निराकरोति एतेनैवेति उक्तरीत्येति चेतनत्वादिध
भैकत्र्यमुक्तरीतिः जीवतदंशयोरिव जीवब्रह्मणोर्जीवानां चाभेदमभ्युपेत्यापि पूर्वोक्तातिप्रसंगपरिहारं शंकते
नन्विति स्वस्येति अंशिनो जीवस्येत्यर्थः जीवान्तरेणेति स्वस्येतिनुषंगः जातिस्मरस्येति पूर्वजन्मस्मरणवतउ

एतेनैव द्वितीयपक्षोपि निरस्त अभेदासहचरितभेदस्यानुसंधानप्रयोजकत्वे उक्तरीत्या त्वन्मते जीवब्र
ह्मणोर्जीवानां चाभेदस्यापि सत्वेनातिप्रसंगस्य दुर्वारत्वात् नन्वभेदप्रत्यक्षमनुसंधाने तंत्रमिति तद
भावेऽननुसंधानं स्वपरस्याभेदः स्वांशयोरभेदप्रत्यक्षत्वमिति तद्दुःखादावयननुसंधानं जीवान्तरेणाऽभेद
सत्वेपि तस्याप्रत्यक्षत्वान्न तत्तद्दुःखाद्यनुसंधानं जातिस्मरस्य प्राग्भवीयात्मनाप्यभेदस्य प्रत्यक्षसत्वान्न
वृत्तांतानुसंधानमन्येषां तदभावान्नेत्यादि सर्वं संगच्छत इति चेन्न तर्हि ऐकात्म्यवादेपि सर्वात्मत्वावर
काज्ञानावरणाच्चैत्रस्य न मैत्रात्मनाऽभेदप्रत्यक्षमिति तत एव सर्वव्यवस्थोपपत्तेर्व्यर्थः श्रुतिविरुद्धात्म
भेदाभ्युपगमः

त्यर्थः सर्वेति सर्वात्मतावारकं यदज्ञानं तत्प्रयुक्तावारणादित्यर्थः तत एवेति चैत्रमैत्रादीनां सर्वेषां परस्परमभेदप्र
त्यक्षाभावादेव व्यवस्थिततत्पाह्याययनुसंधानोपपत्तेरित्यर्थः अभेदप्रत्यक्षस्यानुसंधानप्रयोजकत्वमुपेत्यपरम
ते आत्मभेदकल्पनागौरवं श्रुतिविरोधं च दर्शयित्वा परमते तत्प्रयोजकत्वमपि न संभवतीति प्रसंगादित्याह

सि॰ ले॰
ङि॰
७५

65

अंतरिति शरीरेऽवस्थितिरीषः आत्मानौ नियंतापरस्माद्देहस्थान महतीतीति परात्मौ परमसत्त्वहंहार्दौ कार्यांतस्मिन्पावुद्धिलक्षण
गुहां तां प्रविष्टौ जीवेश्वरावित्यर्थः प्रवेशादीति शारीरांतस्थत्वादिकमादिपदार्थः सउपक्रमे प्रकृतत्वेऽसः संनिहितः प्रति
माणुभाव प्रत्ययोनविवक्षितः सेहृदपंतरेषः प्रकृतो भावनूपत्वादिगुणकआत्मावर्ततेसचजीवसा॰ मेत्यत्पाणुत
यदुत्यर्थः अनन्यथासिद्धस्मादिवशेनविभुत्वमीश्वरस्याशंकते नन्विति ज्यायान्महत्तरः परस्यविभुत्वे लिंगमाह स
वैति परमाणुत्वस्फुतीनामन्यथासिद्धिमाह तदणुत्वेति उपासनार्थाइति अणीयान्व्रीहेर्वेत्यादिश्रुतिपद्युत्यर्थः
दुर्ग्रहत्वेति सर्षपाणीमेत्यादिश्रुतिपद्युत्यर्थः आत्मासूपासनाप्रकरणगतत्वाभावादितिभावः वाव्यवस्थितविकल्पवाची

अंतः प्रविष्टः शास्ता जनानां गुहां प्रविष्टौ परमेश्वरावित्युत्यादिश्रुतिषु प्रवेशादिश्रवणात् सर्षपाणिमाणघमसा
त्मांतर्हृदयाणीयान् व्रीहेर्वा यवाद्वेतिश्रुतेः साक्षादणुत्वश्रवणाच्च परोऽप्यणुरेवास्मि अन्यदिति कृतः परजी
वयोर्विभुत्वाणुत्वाभ्यां सिद्धिः ननु आकाशवत्सर्वगतश्च नित्यः ज्यायान्दिवो ज्यायानंतरिक्षादित्यादिश्रव
णात् सर्वप्रपंचोपादानत्वाच्च परस्य सर्वगतत्वसिद्धेः तदणुत्वश्रुतयः उपासनार्था दुर्ग्रहत्वाभिप्राया वा
उन्नेयाः प्रवेशश्रुतयश्च शरीराद्युपाधिना निर्वाह्याः न च जीवोत्क्रांत्यादिश्रुतयोऽपि बुद्ध्याद्युपाधिनानि
र्वोढुं शक्या इति शंक्यं तमुत्क्रामंतं प्राणोऽनूत्क्रामतीति प्राणस्य बुद्ध्युत्क्रांते प्रागेव जीवोत्क्रांतिवचनात्॥

वाकारः प्रवेशादिश्रवणस्यान्यथासिद्धिमाह प्रवेशश्रुतयोऽपीति परमेश्वरस्य स्वेच्छापरिगृहीतशरीरेंद्रियप्रवेशो
पाधिकः शरीरेष्वंतःप्रवेशउत्यर्थः ननु जीवाणुत्वश्रुतिलिंगानामप्यन्यथानयनसंभवाज्जीवस्यापि स्वाभाविकोवि
भुत्वं किं न स्यात् यथा च न तस्याणुत्वसिद्धिरितिसिद्धांतिनः शंकामनूद्य निराकरोति जीवाणुत्ववादेन च स्यादिना ननु
क्रामंतमिति न चानुश्रुतो प्राणोत्क्रांतेः प्रागेव जीवस्योत्क्रांतिश्रवणेऽपि न केवलस्य तस्योत्क्रांतिसिद्धिः बुद्धिविशिष्ट
स्योत्क्रांतिसंभवादितिवाच्यं बुद्धिप्राणयोर्भेदासिद्धेस्तयोरभेदस्यैवश्रुतिसिद्धत्वाच्च तथा च श्रुतिः सवै प्राणः सा

ॐ॰ ७५

ज्ञानमात्राश्रयेति ज्ञानधर्मत्वे हि सुखादेर्ज्ञानेऽवृत्तिः संभवेन्न तस्य ज्ञानस्याव्यापकत्वात् तदाश्रितस्य सुखादेरुपभोगस्यापि कर
शिरश्चरणादौ कायव्यूहे च युगपदुदयः संभवेन्न तत्त्वपासुखादेर्ज्ञानधर्मत्वमिष्यते न स्यात् ज्ञानवदात्मधर्मत्वाभ्युपगमाद्दृशि
ज्ञानस्याव्यापित्वेऽपि न करशिरश्चरणादौ कायव्यूहे च युगपद्भोगवैचित्र्यं संभवतीत्यर्थः कायव्यूहवत इति योगिन इति शे
षः तस्य च भोगवैचित्र्यं स्मर्यते आत्मनां च सहस्राणि बहूनि भरतर्षभ योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्
प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिवेति आत्मनां शरीराणां बलं योगाज्ज
निते सामर्थ्ये तर्हि ज्ञानधर्मत्वमेव सुखादेरस्तु यदि तद्धर्मत्वे भोगवैचित्र्यं संभवेन्नत आह सुखदुःखभोगादीति असि

न ज्ञानवदात्मधर्मस्य सुखदुःखभोगस्य ज्ञानमात्राश्रितत्वासंभवेन करचरणाद्यवयवभेदेन कायव्यूहवतः
कायभेदेन च भोगवैचित्र्याभावप्रसंगात् सुखदुःखभोगादिर्ज्ञानधर्म एव नात्मधर्म इत्युपगमे तद्वैचित्र्येण
आत्मगुणस्य ज्ञानस्याभेदसिद्धावप्यात्मनो भेदासिद्ध्या भोगवैचित्र्यादिना आत्माभेदप्रतिज्ञोपायोग्या ।
यात्र्यपस्यात्मनो गुणत्वेन प्रतिनियतशरीरं विच्छिन्नतया तद्व्यापित्वाद् दृष्टवत्तद्भेदवादः इव वचनधर्मसंकरापत्तिरिति
मतहानेश्चेतस्यात्रुटी वर्णाणुत्वोपगमेनव्यवस्थोपपादनं न युक्तं नापि तेन तस्येष्टाद्वैतसाधनं युक्तं उक्तान्या
दिश्रवणं साक्षाद् गुणत्वश्रवणं ज्ञाणुर्जीव इति वदतस्तवमतेन तच्छ्रुतान्देवान् प्राविशत् ॥

उक्तेति आत्मगुणज्ञाननिष्ठस्य भोगवैचित्र्यस्य व्यधिकरणतया आत्मभेदसाधकत्वासंभवादित्यर्थः सुखादेर्व्यापित्वज्ञानधर्मत्वं
स्वमतविरुद्धं चेत्याह भोगाद्याश्रयस्येति नैयायिकाद्रिमतद्वा हेतुद्वयं चेत्यर्थः तस्मादिति आत्मगुणस्य ज्ञानस्य सुखादेर्व्या
पित्वकल्पनायोगादित्यर्थः जीवाणुत्वाभ्युपगमस्य परामिमतप्रयोजनानां तद्वदनुपपत्ति नापि तेन तस्येति जीवस्याणुत्वे
नेत्यर्थः श्रुतिलिङ्गार्थापत्तिभ्यां जीवस्याणुत्वं वदतस्तवमतेनाप्यात्मैक्यं स्यात् तस्यापि त्वं वीरत्वाज्जेयरसविभुत्वसिद्धिस्तद्दर्शि
द्धौ च नतवेष्टसिद्धिरिति दूषयति उक्तान्यादीति वदतस्तवपक्षेणाणुरेव सिध्यतीति संबंधः नन्वेष्ट्रमत्र तत्त्वदहपंज

सि॰ ले॰
टि॰
६६

ब्रह्मप्रवेशोऽस्यार्थः पंचप्राणापानादिलक्षणा वृत्तयो यस्य स तथाभूतः प्राणस्य सः पंचवृत्तिः प्राणः श्रुतिषु व्यपदिश्यते वक्ष्यवृत्ति
मवमात्रे दृष्टान्तः मनोवदिति प्राणापानादिवृत्तीनां चोच्छ्वासादिकं कार्यमिति दृष्टान्तयोश्च दृष्टान्तदार्ष्टान्तिकभावे
न सूत्रे मनःशब्देन बुद्धेः प्राणस्य च भेदो निर्दिष्टः स च बुद्धीन्द्रियकार्यं विषयालोचनापेक्षया विलक्षणस्योच्छ्वासादिक्रि
यारूपकार्यस्य प्राणे दर्शनात् प्राणो वुच्छ्वासादिभ्यो भिन्न इत्यादिप्रकारेण भाष्ये साधित इत्यर्थः यो वै प्राणः सा प्रज्ञेति
श्रुतौ प्रज्ञाप्राणयोर्भेदे सत्यपि प्रज्ञाप्राणयोः सहितयोः प्रत्यगात्मन एकत्वात् सहितात्मप्राधान्येन तयोरेकीकरणम्
विरुद्धमिति प्रतर्दनाधिकरणभाष्ये प्रतिपादितत्वान्न श्रुतिविरोध इति भावः एतन्नामरूपोपाधिनिष्ठत्वं

पंचवृत्तिर्मनोवद्व्यपदिश्यत इति सूत्रभाष्ये बुद्धिप्राणयोः कार्यभेदान्भेदस्य प्रतिपादितत्वेन बुद्ध्यु
पाधिके जीवे प्रथममुत्क्रामति प्राणस्यानुत्क्रमणोपपत्तेः नामरूपमोक्षानंतरं ब्रह्मप्राप्तिश्रवणस्य ब्रा
ह्मरि जीव उत प्राप्ये ब्रह्मण्यपि विभुत्वविरोधित्वात् प्राकृतनामरूपविमोक्षानंतरमप्यप्राकृतलोकविग्र
हाद्युपधानेन ब्रह्मणः प्राप्तव्यत्वादिमते प्राप्तुर्जीवस्याप्यप्राकृतदेहेन्द्रियादिमत्वेन तदुपधानेन ब्रह्म
प्राप्तिश्रवणाविरोधात् स्वाभाविकात्मा अप्यपाक दृष्टान्तश्रवणमात्राज्जीवस्य स्वाभाविकगतिसिद्धेर्गु
हां प्रविष्टाविति स्वाभाविकप्रवेशश्रवणाज्जीवसममभिव्याहारेण ब्रह्मणोऽपि स्वाभाविकप्रवेशसिद्धिसंभवात्

तदं जीवस्य ब्रह्मप्राप्तिगतिश्रवणाज्जीवस्य विभुत्वविरोधीति तदसंगतं तस्य ब्रह्मण्यपि विभुत्वविरोधित्वेन ब्रह्मणोऽपि
तदसिद्धिप्रसंगात् लोके परिच्छिन्नस्यैव गतव्याप्तिनियमदर्शनादित्याह नामरूपेति ननु परमते ब्रह्मणोऽव्यापक
स्वरूपेणानन्तत्वप्राप्त्यं किंतु लोकविशेषाद्युपहितत्वेन उपहितरूपेण प्राप्तव्यत्वेन ब्रह्मणः स्वरूपेण व्याप
कत्वविरोधी स्यात् परमते तु त्वमते तत्त्वमते जीवस्यापीत्याह प्राकृतेति विद्वान्नामरूपाद्विमुक्त इति श्रुतौ प्राकृत
नामरूपाद्विमुक्त इत्यर्थकल्पितत्वात् यादृशो जीवस्याप्यप्राकृतनामरूपस्वीकारेणत्वतो विभोरपि जीव
स्याप्राकृतनामरूपोपाधिपरिच्छिन्नस्य ब्रह्मप्रतिगन्तृत्वसंभवान्न विभुत्वश्रुतयो जीवविषयावाधनीया इत्यर्थः

66

उ॰
६६

नाम तद्यथा हि तत्तोपाधिनिष्क्रमणं तदस्मपि जीवस्य ब्रह्मप्रतिगतिः श्रूयते तत्पश्च यथा उक्ता निरोपाधिकत्वेन संभवति तथा गतेर
प्यौपाधिकत्वेन संभवतीत्यात्ममध्यममपरिमाणस्य जीवस्य स्वाभाविकमणुत्वं लोकतेव्यमित्याशयेनाह तथा विद्वानिति परादि
रणगर्भात् जीवस्य स्वाभाविके गमनाभ्युपते सत्येव दृष्टान्तविशेषः संगच्छते न्यथा न देहं त्यक्त्वादित्याशयेनाह तद्यथेति
तत्र जीवस्य परलोकं प्रतिगमने दृष्टान्तं उच्यते अनः शाकटं सुसमाहितं गृहोपकरणैः पूर्णमुत्सर्जन् चाटुं कुर्वन्
यायात् गच्छेद्यथा एवं जीवः ईश्वरेणान्वारूढः प्रेरितो गच्छति परलोकं इत्यर्थः तथा च जीवस्याणुत्वे स्वाभाविके सि
सिद्धे सत्यणुत्वविभुत्वाभ्यां जीवेश्वरयोर्भेदसिद्धिरिति भावः सिद्धान्ती दूषयति नैतत्सारमिति यथा परमात्मप्रकर
तथा विद्वानात्मनूपाद्भिमुक्तः परात्परं पुरुषमुपैति दिव्यमितिनामरूपमोक्षानंतरमपि गतिश्रवणाच्च त
यथानः सुसमाहितमुत्सर्जन् यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति स्वाभावि
कगत्याश्रयणाकटदृष्टान्तोक्तेश्चेति चेत् नैतत्सारं स वा एष महानज आत्मा योऽयं विज्ञानमयः घटसंवृतमाका
शे नीयमाने घटे यथा घटो नीयेत नाकाशं तद्वज्जीवो नभोपम इत्यादिश्रुतिषु जीवस्यापि विभुत्वश्रवणात् तस्मा
ते श्रूते तेरेव जगदुपादानत्वेन ब्रह्मणो जगदुपादानत्वाभावात् जीवस्यकार्यवृहद्गतस्वाद्युः स्वोपादानत्ववद
णुत्वेपि जगदुपादानत्वसंभवाच्च ततस्तस्य सर्वगतत्वासिद्धेः तस्मात्श्रुतीनां भ्रमीरोपाधिकत्वकल्पने जीवो

णोश्रुतं परस्यैव विभुत्वमन्यथा नेत्यमणुक्तं तथा जीवप्रकरणे क्रान्त्यादिश्रुतीनामपि बुद्ध्युपाधिकत्वोपगमसंभवात्

श्रुतं जीवस्य विभुत्वमप्यन्यथा नेत्यमणुक्तमित्याशयेनकातमध्यात्मेत्यादि जीवप्रकरणगतं वाक्यजातमुदाहरति स वा इत्या
दिना विज्ञानमयो जीवो महान् व्यापक आत्मेति जीवस्य व्यापकत्वश्रवणादित्यर्थः नभोपम इत्यनेन स्वतो जीवस्य विभुत्वमु
च्यत इत्यर्थः इयं श्रुतिः श्रोत्रीव व्याख्यातविभुत्वेन्यथासिद्धश्रुतिसाम्यमुक्ता परस्य परो क विभुत्वलिंगं विघटयति
तस्मात् इति प्रकृतिर्मायापरस्य ब्रह्मणः सर्वप्रपंचोपादानत्वमुपेत्यापि न तद्विभुत्वसाधकमित्याह जीवस्येति अणो
रिति शेषः ततः सर्वोपादानत्वात्तस्यैश्वर्यस्येत्यर्थः जीवाणुत्वश्रुतिलिंगानामन्यथानयनमपि तुल्यमेवेत्याह तस्म

सि॰ ले॰
द्वि॰
६७

नन्वप्रविष्टा विभ्वत्र प्रविष्टपदं जीवे स्वाभाविकाप्रवेशार्थकं ब्रह्मणि तस्यौपाधिकानुप्रवेशार्थकमित्याशंकां तत्त्वास
ति सत्त्वाच्च तत्र प्रविष्टपदस्यार्थद्वैरूप्यप्रसङ्गेनेति मत्वाह ब्रह्मजीवोभयेति यद्यपि ब्रह्मणो विभुत्वश्रुत्याद्यनुरोधेन प्रवेशसामान्यपरत्वमेव प्र
विष्टपदस्य कल्प्यते तेन तत्तद्विशेषपरत्वमपि तर्हि जीवस्यापि विभुत्वश्रुत्यनुरोधेन शकटदृष्टान्तेन यामनादिसाम्यमात्र
विवक्षितेन तत्स्वाभाविकगमनाद्यपेक्षताद्विकमपीति न जीवस्य स्वाभाविकाणुत्वसिद्धिः तस्मात्सिद्धो वा ब्रह्मणोप्यणुत्वं तद्वा
र्यं विनियामनाविरहादिति भावः तत इति उक्तव्यवस्थितेरित्यर्थः ननु परमते जीवेश्वरयोरपि विभुत्वाणुत्वश्रुतिलिंगा
नामविशेषात्तूभयाणुत्वश्रुतिलिंगानामन्यथासिद्ध्यविशेषाच्च तयोरणुत्वविभुत्वे वा समानतयैव सिध्येतां नैकस्य विभुत्व
परमस्याणुत्वमिति व्यवस्थासिध्येदिति यथा दोषः प्रसज्येत तथा सिद्धान्तेपि जीवस्य परिच्छिन्नत्वविभुत्वश्रुतिलिंगाना
मविशेषात्स्वाभाविकं विभुत्वं परिच्छिन्नत्वमौपाधिकमिति व्यवस्थानासिध्येदिति दोषः प्रसज्यत एवेति नेत्याह ।

ब्रह्मजीवोभयान्वयिन एकस्य प्रवेशपदस्यैकरूपप्रवेशपरत्वस्य वक्तव्यत्वात् तत्र च स्वमते ब्रह्मात्मैक्य
परमहावाक्यानुरोधेनावान्तरवाक्यानां नेयत्वात् स्वरूपेण जीवस्य विभुत्वमौपाधिकरूपेण परिच्छेद इत्या
दिप्रकारेण जीवब्रह्मभेदज्ञापकश्रुतीनामुपपादनं भाष्यादिषु व्यक्तं तस्मादचेतनप्रपंचस्य मिथ्यात्वाच्चेतन
प्रपंचस्य ब्रह्माभेदाच्च न वेदान्तानां सद्वितीये ब्रह्मणि विशेषेकप्राप्त्यसमन्वयस्य कश्चिद्विरोध इति इति शास्त्रसिद्धं

अस्मन्मत इति ब्रह्मात्मैक्यज्ञानस्य मुक्तिसाधनत्वात्तज्ज्ञानजनकानि तत्त्वमस्यादिमहावाक्यानि वाक्यार्थज्ञानकारणी
भूततत्पदार्थज्ञानं प्रति साधनभूतानि जीवस्वरूपप्रतिपादकवाक्यानीश्वरस्वरूपप्रतिपादकवाक्यानि चावान्तरवाक्या
नि महावाक्यशेषत्वात्तदर्थप्रतिपादकवाक्यानामिति प्रधानवाक्यानुरोधेन गुणभूतवाक्यानां नेयत्वादित्यर्थः स्वरूपे
णेति जीवस्य स्वरूपेणाणुत्वे महावाक्यप्रतिपाद्यब्रह्माभेदानुपपत्तेर्ब्रह्मणश्च स्वरूपेणाणुत्वाभावे वक्तृश्रुत्यादिविरोधा
दिति भावः अद्वितीये ब्रह्मणि वेदान्तसमन्वयाविरोधसमर्थनरूपं परिच्छेदार्थमुपसंहरति तस्मादिति पंचम्यंतप
चम्यर्थौ विवृणोति अचेतनस्येति इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीदिव्यश्री
चरणारविंदसंलग्नस्वांतभूतस्याच्युतकृष्णानंदतीर्थकृतौ शास्त्रसिद्धान्तलेशसंग्रहव्याख्यायां कृष्णालंकाराख्यायां

67

त

68